KĀLIDĀSA'S

KUMĀRASAMBHAVAM

CANTO V

CONTAINING

[Text, Sanskrit Commentary, Prose Order, Exhaustive Grammatical and Explanatory Notes, Change of Voice, Hindi and English Translation, Purport in Sanskrit, an Introduction on the Author and the Poem, etc]

BY

MAHENDRA PRATAP SHASTRI, M A., M. O L.

Professor of Sanskrit, D A V. College, Dehra Dun.

ALLAHABAD

RAM NARAIN LAL

PUBLISHER AND BOOKSELLER

1941

Price Re. 1 As. 4

1 M 24
2nd Edition 1941

Dedicated

TO

The Memory

OF MY REVERED FATHER

THE Late KR MADHAV SINGH JI

FROM WHOM

I received inspiration to study Sanskrit

MAHENDRA PRATAP SHASTRI

PREFACE.

THIS Edition of the Fifth Canto of the Kumârasambhavam is meant to meet the requirements of the students of the Intermediate classes. In it they will find the text as well as annotations on it, and thus they will be saved of the necessity of going for a bigger edition containing the whole of the poem.

The notes contain almost all that is needed for a student and if read with proper care they will prove of great advantage to him Those who are regular students in some college should not neglect the lectures of their teachers, but should regard these notes as a supplement to them. Only then they can make the right use of these notes. As to the private candidates, they can safely depend on these notes for their success in the examination.

To acquaint the students with Kâlidâsa and his poem, an introduction has been added to the notes, which contains general as well as critical remarks.

The book has been brought out in a hurry, so it is quite possible that some mistakes of printing or otherwise may have escaped notice. For the pointing out of them we shall be thankful to the reader and corrections will be made in the next edition

The author feels grateful to Kale's edition of the Kumârasambhavam, on which is based the text and which he has consulted while writing these notes.

DEHRA DUN,
August 1, 1935.

MAHENDRA PRATAP SHASTRI.

INTRODUCTION

1 KÂLIDÂSA—THE AUTHOR.

(1) His Life

It is a matter of great pity that we possess practically no trustworthy account of the personal life of Kâlidâsa, the greatest Indian poet. Like most of the other poets of Sanskrit he has observed complete silence about himself, and following his example, later writers too have abstained themselves from throwing any light on his personal history Therefore the only sources to know something about him are, first, a number of traditions prevalent in the later period of classical Sanskrit, and, secondly, a few direct and indirect references contained in his works The traditions associate too many interesting incidents with his name At one place, for instance, he is said to have been a dunce in his youth and later on to have got his enlightenment through the grace of the goddess Kâlî, whence he is known Kâlidâsa Another tale says that he owes his skill in poetry to his wife A third one describes him as a shepherd by birth and a contemporary of King Bhoja of Dhârâ (1200 A D) One more asserts that he met with his death at the hands of a courtesan in Ceylon But it is doubtful if any of these and other allied tales are of any real worth in studying Kâlidâsa What seems probable is that the incidents of some other Kâlidâsa have been ascribed to the Kâlidâsa of the Raghuvansham and the Kumârasambhavam, who was the most famous of them That there have been a number of poets of Sanskrit, who bore the name, Kâlidâsa is proved by the

following couplet of Rajashekhar, who knew at least three of them —

'एकोऽपि जीयते हन्त कालिदासो न केनचित् ।
शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु ॥'

In all this heap of fiction and legends only one thing is certain, *viz*, that he was a contemporary of King Vikramâditya But to identify this Vikramaditya is by no means an easy task More than one king bore this name and several others used it as a title There was one Vikramaditya who founded the Vikrama Era in 57 B C, while Chandragupta II (413 A D) and Samudragupta (480 A D) of the Gupta dynasty had adopted the word as an epithet Now which of these Vikramadityas was our poet's patron is a puzzle, which still remains unsolved.

To come to the second source of information, namely, the evidence gathered from the references contained in his works, we may hold it to be more reliable, though not infallible On the authority of these references it can be said that he was a Brâhmana by caste and a devotee of Shiva by faith His vivid and exact description of Ujjayinî, Kashmere, the Himalaya and some cities as well as parts of Northern India, lead the reader to infer that he had been personally to all these places He was fully familiar with the life at royal courts and seems to have lived, unlike Bhavabhûti and Mâgha a prosperous, happy and popular life Though fond of pleasures he was not licentious He had a great regard for the fair sex and a noble idea of its chastity This is warranted by the text of the Shâkuntala He was an all-round scholar, possessed of a sound knowledge of the Vedic principles, Upanishadic philosophy, Paurânika mythology, various Darshanika systems, grammatical and prosodical rules, medical science and astronomy

(2) His Date

As has already been remarked, the problem of Kalidasa's date is by no means an easy one, and it is nothing more than conjectures that we can take recourse to To sum up the various theories on the subject we may divide them into two main groups The adherents of the one hold that he flourished in the first century B C and was a contemporary of king Vikramâditya, the founder of the famous Vikrama Era, while the followers of the other, put him in the fifth or sixth century A D

The arguments advanced by the former group may be summed up as follows —

1 The state of the law of inheritance and the severe penalty for theft and other crimes, as referred to in the Shâkuntala, point to the state of society and law as it existed prior to the Christian Era

2 Similarities in the works of Ashwaghosha, a Buddhist philosopher and poet of the first century A D and Kâlidâsa lead one to place the latter before the former, because the possibility is that Ashwaghosha borrowed from Kâlidâsa and not *vice versa*

3 A medallion discovered at Bhitâ, near Allahabad, on which is engraved a scene of two maidens watering plants and a king chasing a deer, and which is held to belong to the first century B C is considered by some scholars to represent the scene of the first act of the Shâkuntala Hence the drama must have been composed before it

4 Vatsabhatti, the author of the Mandasor inscription (472 A D) draws help from the poetry of Kâlidâsa, therefore, Kâlidâsa must have lived prior to the beginning of the fifth century A D

5 Last but not the least, is the evidence of his style, which is quite different from that of the writers of the medieval Sanskrit period Kalidasa's style is simple, while the later writers find pleasure in embellished composition abounding in long compounds, difficult puns, etc

It is on the basis of such evidence that scholars like Dr Peterson believe that ' Kalidâsa stands near the beginning of the Christian Era, if, indeed, he does not overtop it '

The main arguments of the other group may be put forth thus —

1 Kalidasa's language (specially his Prâkrita) and style show a clear advance over those of the two earlier poets, Bhâsa and Ashwaghosha, who flourished in the first century B C and first century A D respectively.

2 Kalidâsa's works point to the state of perfection of Sanskrit literature which was attained during the reign of the Gupta kings, which period is known in the history as the " Golden Age for Brahmanism and Sanskrit "

3 There is a probable reference to Chandragupta II Vikramaditya (413 A D) in the title of the Vikramorvashîyam, and to his son Kumaragupta in the name of the Knmâra-sambhavam, and the remarkable allusion to the horse-sacrifice in the Mâlavikâgnimitram may remind one of Samudragupta's horse-sacrifice

4 The works of Kâlidâsa seem to be describing the social, political, religious and economical conditions of the Gupta period

5 The allusion to the Hûna kings in the Raghuvamsham suggests that Kalidâsa lived after their invasion of the Punjab, which is dated in the sixth century A D

From these arguments it must be clear that there is nothing conclusive and both the groups of scholars rely only on conjectures In such circumstances the most can be said is that Kâlidâsa lived before 634 A D, because he has been mentioned by name in the Aihole inscription of that date and also by Bânabhatta in his Harshacharitam, of the same time, or that he can safely be placed in the fifth century A D To say beyond that is open to serious opposition

(3) His Works

As many as forty-one books have been ascribed to the pen of Kâlidâsa, but that is highly doubtful Many of them are evidently unworthy of his name and seem to have been passed in his name by some bogus writers to win popularity for their compositions, or they belong to some other Kâlidâsa Thus out of the long list only six are universally acknowledged as his own and some doubt is expressed about the genuineness of the seventh, *viz*, Ritusamhâram These seven may be classified as following —

(i) *Kâvyas*—	1	Raghuvamsham	2	Kumârasambhavam
(ii) *Lyrics*—	1	Meghadûtam	2	Ritusamhâram
(iii) *Dramas*—	1	Shâkuntalam	2	Vikramorvashiyam
			3	Mâlavikâgnimitram

(4) *His Art—Style, etc*

Kâlidâsa is one of the most brilliant jewels in the diadem of goddess Saraswatî, and he is unqestionably the best poet of Sanskrit literature If Bhavabhuti attempts to share with him the laurels of Sanskrit drama and Bharavi, Mâgha or Shrîharsha of Sanskrit Kâvya, there is none who can vie with him in both of these branches of literature put together His Raghuvamsham is one of the best of Sanskrit Kâvyas and the Shâkuntalam is far the best of Sanskrit dramas Though the traditional verse—

'उपमा कालिदासस्य भारवेरर्थगौरवम् ।
नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः ॥'

is, so far as our poet is concerned, a compliment in the right direction, it is not in the use of similes alone, but in the excellencies of poetry in general, that he excels all other Sanskrit poets Unlike the compositions of Banabhatta and Daṇḍin, in his works sentiment predominates the outer embellishments, and in contrast with Bhasa and Ashwaghosha, his language and style are quite in conformity with his noble imagination He is the master of language as well as of poetic fancy

His style is simple, pure and chaste It is brief as well as clear The language flows without interruption and long compounds, involved construction and difficult puns are absent from it It is easy but not without due ornamentation (See Kumārasambhavam, Canto 5—verses 4, 18 and 78) He does not use any redundant particles or other words, which are used so frequently in the epics in order to complete the number of syllables prescribed for a stanza It is difficult to find out any words in his composition of verses which do not contribute something or other to their meaning and do not help in advancing the story further. Thus his poetry is free from both the loose construction of the epics and the affected compositions of the latter writers For this he can be compared to Virgil, the immortal author of Aeneid His style is of the Vaidarbha class, which consists of firmness and evenness of sound, perspicuity, uniformity, grace, tenderness, clearness of meaning, dignity of epithets, vigour, elegance and the use of metaphorical expressions * In accordance with the spirit of this style he prefers suggestion to elaboration

* ‘ श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजः कान्तिः समाधयः ॥ ’ काव्यादर्श १ ४१ ।

One distinctive feature of Kâlidâsa's poetry is his love of nature. It is his vivid and life-like descriptions of natural scenery and natural objects, such as the Himalaya, Mânasa lake, ocean, the Ganges, etc, which have won for him the title of "Poet of Nature" His descriptive powers are remarkable and while describing nature he strikes us as a part and parcel of it One thing worth noticing in this connection is that he ascribes human feelings and even actions to inanimate objects of nature, which makes the scene very effective (See Kumara 5—17, 25) This is known in English as "Pathetic fallacy" and, in this respect, he may be compared to Wordsworth of English literature

Kâlidâsa has also succeeded in entering deep into human heart His observation of its workings and feelings is remarkable and the manner in which he gives vent to them has added much to his glory In the words of Humboldt "Tenderness in the expression of feelings and richness of creative fancy have assigned to him his lofty place among the poets of all nations" (See Kumara 5—1, 26, 67 and 58) His poetry is also profusely interspersed with the statement of "Universal truths". (See Kumara 5—45, 64, 75, 82 and 86) This shows his correct reading and vast experience of the workings of human mind and nature surrounding it

Of figures of speech, simile is his favourite and his poetry abounds in exceptionally charming use of it (See Kumara 5—52, 61) But he does not seem to have neglected other important figures of sense Thus he is equally rich in the employment of fancy (उत्प्रेक्षा) (see Kumara 5—25, 27 and 41), corroboration (अर्थान्तरन्यास) (see Kumara 5—5, 31 and 64) and illustration (दृष्टान्त) (see Kumara 5—4), and one should not be

taken by surprise to see that he also uses the figures of sound whenever suitable for his text and this he does with great skill. Of the figures of sound alliteration (अनुप्रास) and repetition of syllables (यमक) are most common Thus, one can say that Kalidasa is a master of sense as well as of words

These qualities have won for him an unqualified praise from Indian as well as foreign critics and poets In India he is regarded as "The lord of poets" (कविकुलगुरु)* and his poetry as sweet as "honey-laden flowers"† He is an unrivalled poet‡ and his Shakuntala is the most charming of all dramas §

Sir William Jones, who was the first to translate the Shâkuntala into English, styles him as "the Indian Shakespeare" Professer Lassen pays his tribute to him by calling him "the brightest star in the firmament of Indian poetry," and the following compliment for the Shakuntala from Goethe, the great German poet is a well-known one —

"Wouldst thou the young year's blossoms and the fruits
of its decline,
And all by which the soul is charmed, enraptured,
feasted, fed ?
Wouldst thou the earth and heaven itself in one sole
name combine ?
I name thee, O Shakuntalâ, and all at once is said"

* "भासो हासः कविकुलगुरुः कालिदासो विलासः ।" जयदेव ।

† 'निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसार्द्रासु मञ्जरीष्विव जायते ॥" बाणभट्ट ।

‡ "पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः ।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ॥

§ "काव्येषु नाटकं श्रेष्ठं तत्र रम्या शकुन्तला ।
तत्रापि चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥"

II THE KUMÂRASAMBHAVAM—THE POEM

(1) The Poem —General remarks.

The Kumârasambhavam is a Mahâkâvya It is divided into cantos, its hero is a divine personage, possessing the qualities of a Dhîrodâtta hero, its predominant sentiment is शृङ्गार having करुण and शान्त as its accessories, its plot is mythological, it contains descriptions of cities, season, natural scenery, etc Thus it fulfills the conditions laid down in the definition of a Mahâkâvya

The size of the Kumârasambhavam is a matter of controversy Some recensions of the poem consist of 17 cantos, while some scholars say that it has 22 cantos But the general belief is that only the first eight (1—8) cantos are from the pen of Kâlidasa and the rest were interpolated by some other writer afterwards Mallinâtha, the well-known commentator has annotated only upto the eighth canto, and the main incident of the poem, *viz*, the birth of Kumâra, only potential, also has been reached in the eighth canto, so the story may be regarded as complete after it The contents of the later cantos have little bearing on the main theme, and their style also convincingly indicates that cantos 9—17 are not from the pen of the writer of the first eight cantos.

For the theme of the Kumârasambhavam, Kalidâsa has chosen a story of divine beings, which provides him an opportunity to take the loftiest flights of imagination The scene of incidents is the grand Himâlaya, which, with its beautiful valleys and slopes, affords an occasion for describing natural scenes The descriptions of Pârvatî, a young, beautiful maiden full of yearning to win over Shiva, have been completed with great skill Her dismay at the defeat of Kâmadeva and the following determination to win over Shiva by means of severe austerities reveal that Kalidâsa had powers to see into the

emotional side of Parvati's heart The honesty and sincerity with which Parvati practises penance have been disclosed with remarkable success, and the dialogue between an ascetic and Parvati is one of the best pieces of its kind in Sanskrit poetry Turning to the other incidents of the poem, no other poet would have been able to do so much justice to the imaginary attack of Kama on Shiva, the victory of the latter upon the former and the pitiable lamentation of the bereaved Rati All this combined with the inherent qualities of Kâlidâsa's pen has achieved for the poem a high place in the line of the Sanskrit Mahakavyas, and one feels fully in concordance with Dr Ryder in thinking that " there are passages in *the birth of the War-God* of a piercing beauty which the world can never let die "

(2) The Source of the Poem

Kalidâsa has generally taken the theme of his poems from the ancient stock of stories, the Meghadûtam and the Mâlavikagnimitram being the only exceptions Some of his works deal with historical stories while others with mythological legends The Kumârasambhavam belongs to the latter class as the story of Shiva and Parvati is only a mythological one It is very ancient and is mentioned in a number of Purânas, but none of them has done so much justice to it as the Shiva Purâna. Kalidâsa also seems to have borrowed the plot for his poem from this Purâna, but after borrowing the bare outlines, he, with the help of his poetical genius and rich fancy has given the story a new aspect.

(3) The Title

As has been remarked the chief incident of the story is the birth of Kumâra, an issue of Shiva and Pârvatî, so the poem has been named as " Kumârasambhavam " This name can be derived as कुमारस्य (कार्त्तिकेयस्य सम्भवः (उत्पत्ति) कुमारसम्भवः, स एवभेदोपचारात् कुमारसंभवं महाकाव्यम् i e, the birth of Kumâra, the same denotes the

poetry describing it by "the transference of an epithet," or, **कुमारस्य सम्भवः कुमारसम्भवः, स वर्णितोऽस्मिन् काव्ये तत् कुमारसम्भवम्** *i. e.*, the poem in which the birth of Kumâra has been described will be called Kumârsambhavam.

(4) The Story. For the benefit of students we give below a summary of the story of the first eight cantos in English :—

Canto 1.—At the outset the reader meets with a graphic description of Himâlaya, the lord of mountains. From his wife Menâ he had a son and a daughter, named Mainâka and Pârvatî respectively. The latter is mentioned to have been in her previous birth Satî, the daughter of Daksha and the wife of Shiva. Then follows a description of Pârvatî's childhood and youth. When she is of marriageable age, her father is informed by Nârada, the ever-travelling sage, that she would be married to Shiva. Hearing this, Himâlaya sends his daughter with her two friends to wait upon Shiva, who had adopted the life of an ascetic after the death of his wife Satî.

Canto 2.—Simultaneously with this the gods were being very much harassed in heaven by a demon, named Târaka, to get rid of whom they go to Brahmâ. They relate all their troubles to him and in reply are told that the only person who could rescue the world from the clutches of this demon would be the son of Shiva. At this the gods think of the marriage of Shiva and are informed by Brahmâ that Pârvatî, who was waiting upon Shiva, was the only suitable match for Shiva, and that the son got through their marriage will serve their purpose.

Canto 3.—Then to create the passion of love in the heart of Shiva, Indra calls on Kâmadeva, who accompanied by Vasant (the Vernal Season) as his helper, sets out on his mission. The nature surrounding Shiva, all of a sudden, puts on the garb of

the spring season and all its objects, animate or inanimate, are filled with the passion of love. Shiva too for a while seems to be yielding to it, but very shortly consciousness is awakened in him. He holds Kâma responsible for the disturbance, and being angry with him, reduces him to ashes by means of the fire coming forth from his third eye. Suspecting danger, Himâlaya takes away his daughter and the plan of the gods seems to have been frustrated for the time being.

Canto 4.—Kâma's sad end causes great grief to his wife Ratî who had accompanied him in his adventure. She weeps bitterly and piteously and decides to breathe her last by burning herself with the body of her beloved. But an incorporeal speech pacifies her by giving an assurance that her separation from Kâma was only temporary and that she would again be united with him.

Canto 5.—Pârvatî, who had fallen in love with Shiva and whom she wanted to marry, seeing her object undone by the demise of Kâma, decides to win over her beloved by means of severe penance. Her mother dissuades her but she turning a deaf ear to her and taking permission of her father goes to a peak of the Himâlaya to practise austerities. She repairs to the place with her friends and commences her penance with all seriousness. Taking the vow of asceticism, she puts on the dress of ascetics, and. not minding the severity of elements, continues to mortify her body. She becomes renowned as an ideal ascetic and sages from far and near come to visit her. One day she is called on by a young ascetic, who was none but Shiva in disguise. First he pays a befitting tribute to the pious life of Pârvatî and then asks her the reason of her penance and knowing it to be to win over Shiva as her husband, he begins to point out the various defects of Shiva,

such as his fondness for inauspicious things, his unknown birth, his poverty, etc , and expects Pârvatî to give up her determination But Pârvati, true to her sincerity, gives a suitable reply to all his arguments and gives a decisive proof of her adherence to Shiva At this the visitor appears in his real form and declares himself to be her slave This fills Parvati's heart with great joy

Canto 6 —Being advised by Parvati to procure her father's approval, Shiva despatches the Seven Sages to Himâlaya for the purpose They are received at his capital with proper ceremony, and, on being asked by Himâlaya, they disclose the object of their visit Himâlaya is too glad to hear it and readily gives his consent to the proposal The sages after fixing the day for marriage return to Shiva and preparations for it are forthwith undertaken

Canto 7 —Due festivities begin at the capital of Himâlaya and preliminary rites in connection with the marriage are performed On the fixed day, Shiva with all his attendants and gods reaches the place of Himâlaya, where the party is received with due honour The procession of the bridegroom is enjoyed with particular interest by the inhabitants of the town Then the marriage ceremony is performed, and it being over the guests depart, but Shiva stays to live there

Canto 8 —This canto opens with a description of love-affairs of the newly married couple After staying at his father-in-law's house for one month, Shiva with Pârvatî leaves the place for a honeymoon trip, during which he pays visits to various places of interest On reaching Gandhamâdana, he selects it for his residence and lives there with his consort in continuous pleasures One night they drink wine and spend the night in connubial pleasures

(5) Summary of the Fifth Canto in Sanskrit.

शिवेन कामे भस्मसात्कृते पार्वती नितरां निराशा जाता, शिवप्राप्त्यर्थमुपायान्तरमपश्यन्ती च तपः कर्त्तुं निश्चितवती। तन्माता तु तां तपसो निवर्त्तयामास, परं दृढनिश्चया स्वजनकस्याज्ञामादाय स्वसखीभिः सह गौरीशिखरं जगाम तत्र च वल्कलं, जटाः, मौञ्जीं, अक्षसूत्रञ्च गृहीत्वा तपः प्रारब्धवती। तपःकाले सा भूमावेव शेते स्म, विलासादिरहिता बभूव, पादपमृगादिषु च प्रीतियुक्ता जाता। इतस्ततस्तस्या ख्यातिर्जाता मुनयश्च तद्दर्शनार्थं तामाजग्मुः। परं यदा च तया समान्यसमाधिना फलं न लब्धं तदा सा महत्तपः अकरोत्। ग्रीष्मर्तौ सा पञ्चाग्नि तपः कृतवती, वर्षायामपि सा अनावृतस्थाने एव तस्थौ, हेमन्तस्य च रात्रीः शीतवायावपि जलमध्य एव निषसाद। अन्ते च तया वृक्षपत्राणामपि भक्षणं त्यक्तमतः सा 'अपर्णा' इति संज्ञामलभत। एवमेव कठिनं तपः कुर्वन्त्यां तस्यामेकदा तदाश्रमं ब्रह्मचारिवेषधारी कश्चित्साधुराजगाम। तया यथाविधि सत्कृतः स पार्वतीं कुशलं पप्रच्छ तदनु च तदाज्ञामादाय तस्याः तपःकारणं ज्ञातुमिच्छितवान्। पार्वती तु स्वयं किमप्यकथयित्वा स्वसखीं प्रतिवक्तुमादिदेश। सा हि तस्मै पार्वत्याः हरवरणविषयकं निश्चयं तद्वियोगकृतां तदीयांदयनीयां दशाञ्च निवेदितवती। अस्वेदं स तत्सत्यतां प्रति पार्वतीं पप्रच्छ, तयाऽपि हरविषयकानुरागं प्रदर्श्य सोऽर्थः समर्थितः। तदा स शिवस्य अशुभवस्तुप्रीतिमत्त्वं, सर्पकङ्कणत्वं, गजाजिनधारणत्वं, श्मशानवासत्वं, चिताभस्मलेपनत्वं, वृद्धोक्षवाहनत्वं, देहविरूपत्वं, निर्धनत्वञ्च कथयित्वा तां तन्निश्चयात् निवारयितुं चेष्टते स्म। परं पार्वत्या प्रत्येकदोषास्य परीहारः कृतः, ब्रह्मचारिकथिताः दोषाश्च शिवस्य गुणत्वेन प्रदर्शिताः। यदा च तया बटुः पुनरपि दोषकथनोत्सुको दृष्टस्तदा क्रुद्धा सा ततो गन्तुं प्रचक्रमे, परं ब्रह्मचारिवेषधारी शिवः स्वं रूपमास्थाय तां जग्राह आत्मानञ्च तस्यै समर्पितवान्, यच्छ्रुत्वा पार्वती गतक्लमा जाता।

कुमारसम्भवम्

—:o:—

पञ्चमः सर्गः

—:o:—

तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता ॥१॥

मल्लिनाथकृता सञ्जीवनी टीका:—तथेति । पर्वतस्यापत्यं स्त्री पार्वती तथा तेन प्रकारेण अक्ष्णोःसमीपे समक्षं पुरतः । 'अव्यय विभक्तिसमीपसमृद्धि'—इत्यादिनाव्ययीभावः । मनोभवं मन्मथं दहता भस्म'कुर्वता पिनाकिना ईश्वरेण भग्नमनोरथा भग्नः खण्डितो मनोरथ अभिलाषो यस्या सा तथोक्ता सती हृदयेन मनसा रूपं सौन्दर्यं निनिन्द । धिङ् मे रूपं यद्धरमनोहरणाय नालमिति गर्हितवतीत्यर्थ । युक्त चैतदित्याह—तथा हि । चारुता सौन्दर्यं प्रियेषु पतिषु विषये सौभाग्यफला सौभाग्यं प्रियवाल्लभ्यं फलं यस्याः सा तथोक्ता । सौन्दर्यस्य तदेव फलं यद्भर्तृसौभाग्यं लभ्यते । नोचेद्विफलं तदिति भावः । अस्मिन् सर्गे वंशस्थं वृत्तम्— 'जतौ तु वंशस्थमुदीरितं जरौ' इति लक्षणात् ।

PROSE ORDER :—पार्वती तथा समक्षं मनोभवं दहता पिना-

किना भग्नमनोरथा सती हृदयेन रूपं निनिन्द। (तथा) हि चारुता प्रियेषु सौभाग्यफला।

NOTES :—पार्वती-पर्वतस्य अपत्य स्त्री पार्वती (पर्वत + अण् + ङीप्) The daughter of Mountain, *i e*, the Himalaya The suffix अण् is added in the sense of 'a descendant of' by 'तस्य अपत्यम्' पाणिनि ४ १ ९२ Then ङीप् is added to mke it feminine तथा—as described in the following verse—'क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति। तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेष मदनं चकार।' कुमारसम्भव ३.७२. समक्षं—(सं + अक्षि + टच्) in her presence It is an अव्ययीभाव compound formed in the sense of nearness (सामीप्य) by 'अव्यय विभक्तिसमीपसमृद्धि०' पाणिनि २.१.६ अक्षि is made अक्ष by the addition of टच् by 'अव्ययीभावे शरत्प्रभृतिभ्यः' पाणिनि ५ ४.१०४ मनोभवं—मनसि भवम्; मनस भवः यस्य सः Mind-born, *i e*, Cupid दहता—burning Instrumental singular of दहत्, Present Participle of √दह् to burn पिनाकिना—(पिनाक + इनिः) पिनाकः धनुः यस्य स पिनाकिन्, तेन। पिनाक being the name of the bow of Shiva, he is known as पिनाकिन्। 'पिनाकोऽजगवं धनुः' इत्यमरः। भग्नमनोरथा—(√भज्ज् + क्तः) भग्नः मनोरथः यस्याः सा one whose wishes are disappointed Cupid being turned to ashes, Parvati had lost hopes of her union with Shiva सती—Feminine Present Part of √अस् to be निनिन्द-कुत्सितवती blamed; cursed Perfect (लिट्) of √णिदि कुत्सायां third person, singular. Parvati cursed her beauty because it failed

to win over Shiva हि-यतः because It is an indeclinable used in various senses *Cf* 'हि पादपूरणे हेतौ विशेषेऽप्यवधारणे। प्रश्ने हेत्वपदेशे च सम्भ्रमासूययोरपि ॥' इति मेदिनीकोषः चारुता—(चारु+तल्) चारोः भावः (सौन्दर्यं) beauty To form Abstract Nouns त्व or तल् is added by 'तस्य भावस्त्वतलौ' पाणिनि ५ १ ११९। प्रियेषु—as regards one's beloved सौभाग्यफला—(सुभग+ष्यञ्) सुभगाया भावः सौभाग्यं good fortune सौभाग्य फल यस्याः सा having good fortune as result

'प्रियेषु सौभाग्यफला हि चारुता' is a sort of universal saying meaning that beauty has for its fruit good fortune as regards the beloved, *i e*, that alone is the real beauty which attracts one's beloved and makes him love it, otherwise it has no meaning, howsoever praiseworthy it may be in the eyes of others

'प्रियेषु सौभाग्यफला०' is also read as 'प्रिये सुसौभाग्यफला०' in some recensions

The metre of this and the following stanzas upto 84 is वशस्थ, which is defined as 'जतौ तु वंशस्थमुदीरितं जरौ' *i.e* ISI SSI ISI SIS Marks S and I stand for long and short syllables respectively

CHANGE OF VOICE :—पार्वत्या तथा समक्षं मनोभवं दहता पिनाकिना भग्नमनोरथया सत्या रूपं हृदयेन निनिन्दे, (तथा) हि चारुतया प्रियेषु सौभाग्यफलया (भूयते) ॥ १ ॥

HINDI TRANSLATION :—इस प्रकार आँखों के सामने ही

कामदेव को जलाने वाले शिव के द्वारा निष्फल इच्छा वाली पार्वती ने अन्दर से (अपनी) सुन्दरता की निन्दा की, क्योंकि सुन्दरता वही है जिसके द्वारा प्यारे का सुख मिले ॥ १ ॥

English Translation :—Parvati, baffled in her hopes by Shiva who, thus, burnt the mind-born (Cupid) in her presence, cursed her beauty in her heart : for beauty has for its fruit good fortune as regards one's beloved. 1.

Purport in Sanskrit :—शिवेन मदनदहनं रत्या च तत्कृतं कृतं विलापं दर्शयित्वा कविकालिदासः शिवमभिमुखीकर्त्तुं पार्वत्या कृतं तपो वर्णयितुं श्लोकेऽस्मिन् तपोबीजं गौरी-नैराश्यं दर्शयति—यदा हि शिवेन स्वतृतीयनेत्राग्निना पार्वत्याः प्रत्यक्षमेव कामः भस्मसात्कृतस्तस्याः शिवपरिणयविषयिकाभिलाषा समूलं नष्टा। एवञ्च शिवेन व्याकष्टुमक्षममात्मनः सौन्दर्यं पार्वती निन्दति स्म, यतः वल्लभस्य प्रेम तज्जनितं सुखञ्च सौन्दर्यस्य फलम्। यद्रूपं भर्त्रे न रोचते तन्निरर्थकमेव इति मत्वा सात्मानं धिक्कृतवती ॥ १ ॥

इयेष सा कर्त्तुमवन्ध्यरूपतां
समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते वा कथमन्यथा द्वयं
तथाविधं प्रेम पतिश्च तादृशः ॥ २ ॥

इयेषेति। सा पार्वती समाधिम् एकाग्रताम् आस्थाय अवलम्ब्य तपोभिः वक्ष्यमाणनियमैः करणभूतैः आत्मनः स्वस्य अवन्ध्यरूपतां सफलसौन्दर्यं कर्त्तुं इयेष इच्छति स्म। तपसा शिवं वशीकर्त्तुमुद्युक्तेत्यर्थः। अन्यथा ततोऽन्यप्रकारेण कथं तत् द्वयं अवाप्यते। किं

द्वयम् ? तथाभूता विधा प्रकारो यस्य तत् तथाविधं प्रेम स्नेहः । येनार्धाङ्गहरा हरस्य भवेदिति भावः । तादृशः पतिश्च । यो मृत्युञ्जय इति भावः । द्वयमेव खलु स्त्रीणामपेक्षितं यद्भर्तुर्वाल्लभ्यं जीवद्भर्तृकत्वं चेति । तच्च तपश्चर्यैकसाध्यमिति निश्चिकायेत्यर्थः । अत्र मनुः— 'यद्दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरम् । तत्सर्वं तपसा प्राप्यं तपो हि दुरतिक्रमम् ॥' इति ।

Prose Order —सा समाधिमास्थाय तपोभिः आत्मनः अवन्ध्यरूपतां कर्तुं इयेष । वा अन्यथा तथाविधं प्रेम तादृशः पतिश्च (इति) द्वयं कथं अवाप्यते ।

Notes : -समाधि—(सं + आ + √धा + किः) Intense contemplation (of any particular object so as to identify the contemplator with the object meditated upon) This is the eighth and last stage of Yoga. Here it may also mean silence or a vow of intense devotion (for Shiva), or, a rigid rule of conduct आस्थाय— (आ + √स्था + क्त्वा—ल्यप्) अवलम्ब्य taking recourse to तपोभिः—by means of austerities, the observance of which warrants all sorts of success *Cf* The shloka of Manusmriti quoted above by Mallinatha. Decline तपस् as तपः, तपसी, तपांसि । तपः, तपसी, तपांसि । तपसा, तपोभ्याम् etc , अवन्ध्यरूपतां—न वन्ध्यं अवन्ध्यं Not barren, fruitful अवन्ध्य रूपं (सौन्दर्यं) यस्याः सा अवन्ध्यरूपा, तस्याः भावः अवन्ध्यरूपता, ताम् such as whose beauty was fruitful or it may be taken as न वन्ध्य अवन्ध्यं, अवन्ध्यं च तद्रूपं, अवन्ध्यरूपं तस्य भावः, ताम् a fruitful beauty इयेष— Perfect Third Person Singular of √इषु इच्छायाम् to wish.

For purposes of the सार्वधातुक लकारs it becomes इच्छ्,*e.g.*, इच्छति (लट्) इच्छतु (लोट्) etc. अन्यथा—otherwise *i. e.*, without resorting to penances. तथाविधं–तथा तादृशी विधा प्रकारो यस्य तत् of that kind. That is, such love by which she could become Shiva's wife. प्रेम—स्नेहः love. Decline as प्रेम, प्रेमणी-प्रेम्णी, प्रेमाणि । प्रेम, प्रेमणी-प्रेम्णी, प्रेमाणि । प्रेम्णा, प्रेमभ्यां, प्रेमभिः । etc. तादृशः –(तत्+√दृश् +कञ्) of that sort, *i. e.*, like Shiva, who is superhuman and who is known as मृत्युञ्जय, conqueror of death. According to Mallinatha women aspire for two things with regard to their husbands, *viz.*, first, undiminished and constant love from them and secondly, longivity for their husbands. These two things are suggested respectively by तथाविधं प्रेम and तादृशः पतिः । अवाप्यते—(अव+√आप्+य+लट्) लभ्यते is obtained. It is Passive Pres. (लट्) Third Person Singular.

Some editions read अवन्ध्यकामतां for अवन्ध्यरूपतां and तत् कथं for वा कथं ।

CHANGE OF VOICE :—तया समाधिमास्थाय तपोभिरात्मनोऽवन्ध्यरूपता कर्त्तुं ईषे ; वा अन्यथा तथाविधं प्रेम तादृशं पतिं च द्वयं कथं अवाप्नोति ? ॥ २ ॥

HINDI TRANSLATION :—उसने (पार्वती ने) ध्यान लगा कर तपस्या के द्वारा अपने सौन्दर्य को सार्थक करने की धारणा की । नहीं तो उस प्रकार का स्नेह और वैसा स्वामी और किसी प्रकार से कैसे मिल सकता है ? ॥ २ ॥

ENGLISH TRANSLATION :—She wished to make her

beauty fruitful by austerities, having recourse to contemplation; how can otherwise be secured the two things—such love and a husband of that sort? 2.

PURPORT IN SANSKRIT :—स्वरूपस्य निष्फलतामनुभूय पार्वती सौन्दर्यं शिवाकर्षणे सफलीकर्त्तुं तप आचरितुं निश्चितवती। उपायान्तरमपश्यन्ती तपसा शिवमभिमुखीकर्त्तुमुद्यताभूदित्यर्थः। कथं तपः साहाय्यं कामयाञ्चकारेति विषये कविः कथयति—महादेवसदृशो वल्लभो यो हि मृत्युञ्जयः कथ्यते, तादृशोऽनुरागश्च येन सा शिवस्य पत्नी स्यात् तपस्यां विना कथं सम्भवति। अन्यप्रकारेण दुर्लभं वस्तु तपसैव प्राप्यत इत्यर्थः॥ २॥

निशम्य चैनां तपसे कृतोद्यमां
सुतां गिरीशप्रतिसक्तमानसाम्।
उवाच मेना परिरभ्य वक्षसा
निवारयन्ती महतो मुनिव्रतात्॥ ३॥

निशम्येति। मेना मेनका च गिरीशप्रतिसक्तमानसां हरासक्तचित्तां तपसे तपश्चरणाय कृतोद्यमां कृतोद्योगां सुतां निशम्य श्रुत्वा एनां पार्वतीं वक्षसा परिरभ्य आलिङ्ग्य महतः मुनिव्रतात् तपसः निवारयन्ती उवाच। मुनिव्रतादित्यत्र यद्यपि मुनिव्रतस्य मेनकाया अनीप्सितत्वात् 'वारणार्थानामीप्सितः' इति नापादानत्वं तथापि कृतोद्यमामिति मानसप्रवेशोक्तत्वात् 'ध्रुवमपायेऽपादानम्' इति अपादानत्वमेव स्यात्। यथाह भाष्यकारः—'यच्च मिथ्या संप्राप्य निवर्तते तच्च ध्रुवमपायेऽपादानम् इति प्रसिद्धम्'॥ इति॥

PROSE ORDER :—मेना च गिरीशप्रतिसक्तमानसां एनां सुतां तपसे कृतोद्यमां निशम्य वक्षसा परिरभ्य महतः मुनिव्रतात् निवारयन्ती उवाच।

NOTES :—मेना—Name of the wife of Himalaya and the mother of Parvati. She is also known as मेनका। गिरीशप्रतिसक्तमानसाम्। गिरीश—(गिरि+ईश) गिरेः ईशः the lord of the mountain (Kailasha), *i. e.*, Shiva. A name of Shiva. *Cf.* 'गिरीशो मृडः' इत्यमरः। प्रतिसक्त—(प्रति+√ सञ्ज्+क्तः) अनुरक्त devoted or attached to. गिरीशे प्रतिसक्तं मानसं यस्याः सा whose mind was fixed upon Shiva. एनां—इमाम् 'द्वितीयाटौस्स्वेनः'। पाणिनि२.४.३४. optionally prescribes the substitution of एन for इदम् and एतद् in Acc. Instrumental, Sing. and Genitive and Locative Duals when there is अन्वादेश *i. e.*, their proper forms have already been used in a previous clause. तपसे—For austerities. Dative Sing. of तपस्, The Dative is used by 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः।' पाणिनि २.३.१४. *i. e.*, the object governed by an Infinitive Mood not actually used but implied is put in the Dative. Here तपसे is equal to तपः कर्तुम्। कृतोद्यमां—कृतः उद्यमः यया सा तां who was determined or resolved (to practise penances). निशम्य—आकर्ण्य having heard. वक्षसा—by her bosom. Decline as वक्षः, वक्षसी, वक्षांसि। वक्षः, वक्षसी, वक्षांसि। परिरभ्य—(परि+√रभ्+ल्यप्) आलिङ्ग्य having embraced. Absolutive form of √रभ् (राभस्ये) to act rashly or to long for; with परि it means 'to embrace' and with आ 'to begin'. मुनिव्रतात्—मुनेः व्रताद् मुनिव्रतात् the vow of ascetics, *i. e.*, penances. Here the Ablative Case should

have been enjoined by, 'वारणार्थानामीप्सितः' पाणिनि १ ४ २७ i e, from which one is kept off is also put in the Ablative, but according to Mallinath as penance is not what was desired (ईप्सित्) by Mena, so this rule is not applicable in this case and the Ablative has been used on account of ध्रुवमपायेऽपादानम्' पा० १ ४ २४ i e, the noun from which the motion, real or conceived, takes place is put in the Ablative case But according to some other commentators the former rule is applicable in the present case निवारयन्ती—(नि + √वृ + णिच् + शतृ + ङीप्) warding off उवाच—said Perfect of √ ब्रू or √वच् to speak Some edition give गिरीशं प्रतिसक्त० for गिरीशप्रतिसक्त०

CHANGE OF VOICE :—मेनया गिरीशप्रतिसक्तमानसामेनां सुतां तपसे कृतोद्यमां निशम्य वक्षसा परिरभ्य महतो मुनिव्रतात् निवारयन्त्या ऊचे ॥ ३ ॥

HINDI TRANSLATION :—मेना, महादेव में आसक्त चित्त वाली उस (अपनी) पुत्री को तप करने को उद्यत सुन कर, (उसे) छाती से लगाकर कठिन तप (करने) से रोकती हुई, बोली ॥ ३ ॥

ENGLISH TRANSLATION —Mena, hearing that her daughter, who had set her heart on Shiva, was determined to practise penance, clasped her to her bosom, and, warding her off from the great vow of ascetics, spoke (to her) 3

PURPORT IN SANSKRIT :—यदा हि पार्वत्याः जननी मेना-श्रृणोत् यन्महादेवेऽत्यन्तमनुरक्ता पार्वती तपस्यया तमनुनेतुं कृत-

निश्चया तदा सा महद्दुःखमवाप, पार्वतीं च स्वोरस्यालिङ्ग्य तपोविषयकं निश्चयं त्यक्तुमुपदिदेश ॥ ३ ॥

मनीषिताः सन्ति गृहेषु देवताः
तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः ॥ ४ ॥

सामान्यनिषेधमुक्त्वा विशेषनिषेधमाह । मनीषिता इति । हे वत्से । मनसा ईषिता इष्टाः मनीषिताः । शकन्ध्वादित्वात् साधुः । देवताः शच्यादयः गृहेषु सन्ति । त्वं ता आराधयेति शेषः । तपः क्व । तवेदं तावकम् । 'युष्मदस्मदोरन्यतरस्यां खञ्च' इत्यण् प्रत्ययः । 'तवकममकावेकवचने' इति तवकादेशः । वपुः च क्व । तथा हि पेलवं मृदुलं शिरीषपुष्पं भ्रमरस्य भृङ्गस्य पदं पदस्थितिं सहेत । पतत्रिणः पुनः पक्षिणस्तु पदं न सहेत । अतिसौकुमार्याद्दिव्योपभोगयोग्यं तं वपुर्न दारुणतपः क्षममित्यर्थः । अत्र दृष्टान्तालङ्कारः ॥ ४ ॥

PROSE ORDER :—वत्से, मनीषिताः देवताः गृहेषु सन्ति, तपः क्व, तावकं वपुश्च क्व ? पेलवं शिरीषपुष्पं भ्रमरस्य पदं सहेत, पतत्रिणः पुनः न ॥ ४ ॥

NOTES :—मनीषिताः—मनसः ईषिताः मनीषिताः desired; wished, such as the mind would long for. ईषिताः is Past Part. from √ईष् गतिहिंसादर्शनेषु 'to see' Here the Compound is of मनस् and ईषित, in which the final vowel with the following consonant (अस्) of मनस् merges into the following word according to 'शकन्ध्वा-

दिषु पररूप वाच्यम् । ' or, according to some it could be expounded as मनीषा (धारणा) संजाता येषु ते । मनीषा+इतच् । In that case इतच् will be added to मनीषा by the rule ' तदस्य संजातं तारकादिभ्य इतच् ' पा० ५ २ ३६ i e इतच् is affixed to तारका and other words in the sense of ' that is obtained or possessed by. ' देवता·—प्रतिमारूपेण वर्त्तमानाः सौभाग्यप्रदा इन्द्राण्याद्याः i e, idols of deities such as Indrani, who can bestow good luck on you Mena means to say that Parvati should worship those deities instead of trying to appease Shiva क्व—where ? क्व is formed from किम् by adding अत् to it and changing it into क्व by the rules ' किमोऽत् ' पाणिनि ५ ३. १२ and ' क्वाति ' ७ २ १०५. respectively

क्व ..क्व—It implies excessive incongruity, and lit it means ' where is the one and where is the other ' or ' how distant is one from the other', or 'how unequal the two are ' The repetition of क्व shows the great disparity between two things· *Cf* ' क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ' रघुवंशम् १. २ । ' क्व भूपतीनां चरित क्व जन्तवः ' किरातार्जुनीयम् १ ६ । तावकं—त्वदीयं yours, thine. तव इदं तावकम् । First अण् suffix is added to युष्मद् by ' युष्मदस्मदोरन्यतरस्यां खञ्च ' पा० ४ ३ १ (युष्मद्+अण्) and then तवक is substituted for it by ' तवकममकावेकवचने ' पा० ४. ३. ३ (तवक+अण्=तावकम्) । The alternative form, when खञ् is added instead of अण्, is तावकीनम् । Similarly are formed मामक and मामकीनम्

from अस्मद् । वपुः—body. Decline as—वपुः, वपुषी, वपूंषि । वपुः, वपुषी, वपूंषि । वपुषा etc. पेलवम्—मृदु tender. शिरीषपुष्पम्—the flower of शिरीष (सिरस—हिन्दी) is well-known for its softness and is often used as standard of comparison (उपमान) to indicate that quality. पद्—पदन्यासं placing of feet ; sitting. सहेत—may bear. Potential (विधिलिङ्) of √ सह् 'to bear,' which is an आत्मनेपदी root. पतत्रिणः—(पतत्र+इनिः) पतन्तं त्रायन्ते इति पतत्राणि । पतत्राणि means wings, because they keep birds from falling ; then, पतत्राणि सन्ति येषां ते पतत्रिणः पक्षिणः those possessed of wings, *i. e.*, birds. The suffix इनि is added by 'अत इनिठनौ' पा० ५. २. ११५ ।

The verse provides a good example of दृष्टान्त अलङ्कार which is defined as 'दृष्टान्तस्तु स्वधर्मस्य वस्तुनः प्रतिबिम्बनम्' साहित्यदर्पण ।

CHANGE OF VOICE :—वत्से ! मनोपिताभिः देवताभिः गृहेषु भूयते; तपसा क्व, तावकेन वपुषा च क्व (भूयते) ? पेलवेन शिरीषपुष्पेण भ्रमरस्य पदं सह्येत पतत्रिणः पुनः न ॥ ४ ॥

HINDI TRANSLATION :—पुत्रि, मन से चाहे जाने योग्य देवता (हमारे) घर में हैं ; कहाँ तो यह (कठोर) तप और कहाँ तुम्हारा (कोमल) शरीर ! सिरस का कोमल फूल भौरें के पैर (रखने) को तो सह सकता है परन्तु पक्षी के नहीं ॥ ४ ॥

ENGLISH TRANSLATION :—In the house are such deities as your mind would long for. Child, how widely different are penance and thy body ? The delicate

Shirısha flower may bear (the stroke of) feet of a bee, but not that of a bird. 4.

PURPORT IN SANSKRIT:—व्रताचरणान्निवारयन्ती मेनाकथयत्—बाले, पार्वति; अस्माकं वेश्मन्येवानेका इष्टा इन्द्राण्याद्याः सौभाग्यप्रदाः देवतास्सन्ति; तासामाराधनयैव तेऽभीष्टप्राप्तिर्भवितुं शक्या, अतस्त्वं ता आराधय। तव कायस्त्वतिकोमलः तपोऽनुष्ठानञ्चातिकठिनम्। न ते देहस्तत्सोढुं क्षमः। तथा हि—कोमलं शिरीषस्य कुसुमं भ्रमरस्य पदस्थिति भारं वा सोढुं शक्नोति महतः पक्षिणो भारं तु कथमपि न। तव शरीरं शिरीषपुष्पतुल्यं तपस्तु महापक्षिभारतुल्यं, अतस्त्वं तपः करणाद्विरम ॥ ४ ॥

इति ध्रुवेच्छामनुशासती सुतां
शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत् ॥ ५ ॥

इतीति। इति एवम् अनुशासती उपदिशन्ती मेना ध्रुवेच्छां स्थिरव्यवसायां सुतां पार्वतीम् उद्यमात् उद्योगात्तपोलक्षणात् नियन्तुं निवारयितुं न शशाक समर्था नाभूत्। तथा हि। ईप्सितार्थस्थिरनिश्चयं ईप्सितार्थे इष्टार्थे स्थिरनिश्चयं मनः निम्नाभिमुखं पयः च कः प्रतीपयेत् प्रतिकूलयेत्। प्रतिनिवर्तयेदित्यर्थः। निम्नप्रवणं पय इवेष्टार्थाभिनिविष्टं मनो दुर्वारमितिभावः। अत्र-दीपकानुप्राणितः अर्थान्तरन्यासोऽलङ्कारः।

PROSE ORDER:—इति अनुशासती मेना ध्रुवेच्छां सुतां उद्यमाद् नियन्तुं न शशाक। ईप्सितार्थस्थिरनिश्चयं मनः निम्नाभिमुखं पयश्च कः प्रतीपयेत् ॥ ५ ॥

NOTES :—इति—in this way, *i. e*, as mentioned in the previous two verses अनुशासती—advising, instructing. (अनु + √शास् + शतृ + ङीप्) Present Part of √शास् to teach शास्ति (लट्), शशास (लिट्), अशिषत् (लुङ्) । ध्रुवेच्छां-ध्रुवा (निश्चला) इच्छा यस्या, तां whose desire was inflexible. उद्यमात्—from the attempt or determination. नियन्तु—(नि + √यम् + तुमुन्) to check तुमुन् is the sign of Infinitive, added by ' तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ' पा० ३.३.१० न शशाक—was not able Perfect (लिट्) of √शक् ' to be able ' शक्नोति (लट्) शक्ष्यति (लृट्) अशकत् (लुङ्) ईप्सितार्थस्थिरनिश्चयम् । ईप्सित—desired. (√आप् + सन् + क्तः) Desiderative (सन्नन्त Past Part of √आप् to obtain The आ of √आप् is changed to ई by 'आप् ज्ञपि ऋधां ईत्' पा० ७.४.५५ । ईप्सिते अर्थे स्थिरः निश्चयः यस्य तत् whose determination is firm for the desired object It is an Adjective of मनः । निम्नाभिमुखं—निम्ने अभिमुखं or निम्नस्य अभिमुखं flowing towards low ground. पयः—water. प्रतीपयेत्-विपरीतं कर्त्तुं शक्नुयात् Can turn back. It is Potential (विधिलिङ्) Third Pers Sing. from √प्रतीपय्, a Denominative verb (*i. e*, a verb formed from a noun—नामधातु) from प्रतीप । प्रतीप (प्रति + आप + अ) is formed by changing आ of आप् into ई by 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' पा० ६.३.९७ Similarly are formed द्वीप, अन्तरीप, समीप etc.

The chief figure of speech in the stanza is अर्थान्तरन्यास which means supporting a particular case by a

general truth. In the verse first two lines contain a particular statement and the latter two a general one. It is very often used by Kalidasa.

Some books read स्थिरेच्छां for ध्रुवेच्छाम्।

CHANGE OF VOICE —इति अनुशासतया मेनया ध्रुवेच्छा सुता उद्यमात् नियन्तु न शेके । ईप्सितार्थस्थिरनिश्चयं मनो निम्नाभिमुखं पयश्च केन प्रतीप्येयाताम् ? ॥ ५ ॥

HINDI TRANSLATION :—इस प्रकार उपदेश देने वाली मेना स्थिर इच्छा वाली (अपनी) पुत्री को (उसके) निश्चय से न हटा सकी । चाही हुई वस्तु के लिये दृढ निश्चय वाले मन को और नीचे की ओर जाते हुये जल को कौन पलट सकता है ? ॥ ५ ॥

ENGLISH TRANSLATION —Mena, thus exhorting, could not ward off her daughter, who was firm in her desire, from her resolve who can turn back a mind of fixed determination for (the achievement of) a desired object, or water flowing towards a low ground ?

PURPORT IN SANSKRIT —मेना पार्वतीं निवारयितुमत्यन्तमयतत विविधप्रकारेण च तामुपदिदेश परन्तु स्वोद्देश्ये सफलतां नाप्नात् यतो गौरी तपोऽनुष्ठाने शिवानुनये च कृतनिश्चयासीत् । तथा हि—प्राप्तव्ये वस्तुनि गूढमभिनिविष्टं मनो नीचैर्गच्छज्जलं वा विरुद्धं कर्त्तुं प्रवाहयितु वा न शक्यते ॥ ५ ॥

कदाचिदासन्नसखीमुखेन सा
मनोरथज्ञं पितरं मनस्विनी ।
अयाचतारण्यनिवासमात्मनः
फलोदयान्ताय तपःसमाधये ॥ ६ ॥

कदाचिदिति । अथ कदाचित् मनस्विनी स्थिरचित्ता सा पार्वती मनोरथज्ञं अभिलाषज्ञं पितरं हिमवन्तं आसन्नसखीमुखेन आसन्नसखी आप्तसखी सैव मुखं उपायः । 'मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि' इति विश्वः । तेन । फलोदयान्ताय फलोदयः फलोत्पत्तिः अन्तोऽवधिर्यस्य तस्मै तपःसमाधये तपोनियमार्थं आत्मनः स्वस्य अरण्यनिवासं वनवासं अयाचत । 'दुह्याच्'—इत्यादिना द्विकर्मकत्वम् ।

Prose Order :—कदाचित् मनस्विनी सा मनोरथज्ञं पितरं आसन्नसखीमुखेन फलोदयान्ताय तपःसमाधये आत्मनः अरण्य-निवासं अयाचत ॥ ६ ॥

Notes :—कदाचित्—Once ; on some opportune occasion. मनस्विनी—(मनस्+विनिः+ङीप्) प्रशस्तं मनः विद्यते अस्याः सा full of sense ; intelligent, *i e*, who knew when and how to make a request. Or, here, as Mallinatha comments, स्थिरचित्ता who was firm-minded; who was determined to achieve her object at any cost. *Cf* 'महाकार्ये कृतोद्योगो विघ्नैराहतमानसः । प्रारब्धं न त्यजति यः स मनस्वीति कथ्यते ।' विनि is added by 'अस् माया मेधा स्रजो विनिः' पा० ५ २ १२१ । मनोरथज्ञं—(मनोरथ+√ज्ञा+कः) जानाति इति ज्ञः, मनोरथस्य ज्ञः मनोरथज्ञः तं who knew her desire. ज्ञः is formed from √ज्ञा by adding कः to it by 'इगुपधज्ञाप्रीकिरः कः' पा० ३.१ १३५ । पितरं—हिमवन्तम् Himavat This is the secondary object (गौण कर्म) of अयाचत which governs two objects आसन्नसखीमुखेन—(आ+√सद्+कः) आसन्नायाः सख्याः मुखेन (तत्पुरुष) or आसन्ना चासौ सखी आसन्नसखी ;

आसन्नसखी एव मुखं (उपाय.) तेन (कर्मधारय) through a confidant friend आसन्नसखी lit means a friend sitting near, but the sense is 'a reliable friend, or a friend who was in her confidence' मुखं means साधनं ; उपायः *Cf*, 'मुख निःसरणे वक्त्रे प्रारम्भोपाययोरपि' इति विश्वः। फलोदयान्ताय-फलस्य उदयः (प्राप्ति) अन्तः यस्य, तस्मै *i. e.* which will last till its fruit is achieved. तपः समाधये—तपसः समाधिः तपः समाधिः, तस्मै तपोनियमार्थम् to perform austere penance. Or, तपसि समाधिः तपः समाधिः, तस्मै for contemplation. In former case समाधि means नियम (a rigid rule of conduct) and in the latter ध्यान (contemplation) 'समाधिर्ध्याननीवाकनियमेषु समर्थने' इति विश्वः। The Dative is used for a noun expressive of the purpose for which any thing is done (तादर्थ्ये चतुर्थी वाच्या) or, it is used for the object governed by an infinitive not actually used (तपः समाधिं कर्त्तुम्) as in case of तपसे in stanza 3 above अरण्यनिवासं—अरण्ये निवास residence in forest This is the Principal object (प्रधान कर्म) of अयाचत। अयाचत—begged It is Imperfect (लङ्) of √याच् to beg, which governs double accusatives according to the following Karika—

'दुह् याच् पच् दण्ड् रुधि प्रच्छि चि ब्रू शासु जि मन्थ् मुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नी ह्र कृष् वहाम्॥'

CHANGE OF VOICE: —कदाचिन्मनस्विन्या तया मनोरथज्ञः पिता आसन्नसखीमुखेन फलोदयान्ताय तपः समाधये आत्मनोऽरण्यनिवासं अयाच्यत ॥ ६ ॥

HINDI TRANSLATION :—एक बार दृढ़ निश्चय वाली उस (पार्वती) ने एक अभिन्नहृदया सहेली के द्वारा (अपने) पिता जी से, जो उसकी इच्छा से परिचित थे, फलप्राप्ति पर्यन्त तप करने के लिये अपने आप वन में रहने की आज्ञा माँगी ॥ ६ ॥

ENGLISH TRANSLATION —Once, that firm-minded girl, through a close friend, begged of her father, who knew her desire, her residence in the forest in order to perform penance till their fruition 6.

PURPORT IN SANSKRIT :—गौर्याः पिता तस्या अभिप्रायमजानात्, परं सा तदाज्ञां विना वनं गन्तुमनुचितमिति निश्चित्य स्वपितुरनुज्ञां स्वयमेव ग्रहीतुमशक्नुवती निजाभिन्नहृदयसखीद्वारेणाभीष्टलाभपर्यन्तं तपश्चरितुं वने वसतिं स्वपितरं ययाचे ॥ ६ ॥

अथानुरूपाभिनिवेशतोषिणा
कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात्प्रथितं तदाख्यया
जगाम गौरी शिखरं शिखण्डिमत् ॥ ७ ॥

अथेति। अथ गौरी अनुरूपाभिनिवेशतोषिणा अनुरूपेण योग्येन अभिनिवेशेन आग्रहेण तुष्यतीति तथोक्तेन गरीयसा पूज्यतमेन गुरुणा पित्रा कृताभ्यनुज्ञा तपः कुरु इति कृतानुमतिः सती पश्चात् तपःसिद्ध्युत्तरकालं प्रजासु जनेषु तदाख्यया तस्या गौर्याः संज्ञया प्रथितम्। गौरीशिखरमिति प्रसिद्धमित्यर्थः। शिखण्डिमत्। न तु हिंस्रप्राणिप्रचुरमिति भावः शिखरं शृङ्गं जगाम ययौ ॥

PROSE ORDER :—अथ गौरी अनुरूपाभिनिवेशतोषिणा

गरीयसा गुरुणा कृताभ्यनुज्ञा पश्चात् प्रजासु तदाख्यया प्रथितं शिखण्डिमत् शिखरं जगाम ॥ ७ ॥

NOTES :—गौरी—पार्वती known so because of her brilliant complexion अनुरूपाभिनिवेशतोषिणा । अनुरूपः—रूपस्य योग्य सदृशो वा अनुरूपः (अनुकूलः) worthy of one. अभिनिवेशः—(अभि + नि + √विश् + घञ्) intentness or determination (to effect a purpose or attain an object). It also means devotion or love. तोषिणा—who was satisfied Instrumental Sing of तोषिन् (√तुष् + णिनिः) । अनुरूपेण अभिनिवेशेन तुष्यति इति अनुरूपाभिनिवेशतोषी तेन who was satisfied with her determination worthy of her गरीयसा—अतिशयेन गुरु· गरीयान्, तेन, by the highly venerable; exalted. Instrumental Sing of गरीयस् (गुरु + ईयसुन्) comparative degree of गुरु । Decline as गरीयान्, गरीयांसौ, गरीयांसः । गरीयांसं, गरीयांसौ, गरीयस· । To form comparative and superlative degrees of adjectives तरप् or ईयसुन् and तमप् or इष्ठन् are respectively added by 'द्विवचनविभज्योपपदे तरप् ईयसुनौ' पा० ५ ३ ५७ । and; 'अतिशायने तमप् इष्ठनौ' पा० ५ ३.५५ । गुरुणा—पित्रा by the father *Cf.* 'गुरु गोष्पति पित्राद्यौ' इत्यमरः । कृताभ्यनुज्ञा—कृता (दत्ता) अभ्यनुज्ञा (अनुमतिः) यस्यै यस्या· वा सा To whom consent or permission had been granted. अनुज्ञा —(अनु + √ज्ञा + अङ्) permission. पश्चात्—afterwards *i. e.* when Parvati had finished her penance प्रजासु—जनेषु among the people. तदाख्यया—तस्याः (गौर्याः) आख्यया (संज्ञया) तदाख्यया after her name *Cf* गौरीशिखर,

name of a peak of the Himalayas आख्या is formed from √चक्षिङ्+अ, चक्षिङ् being replaced by √ख्याञ् by 'चक्षिङ ख्याञ् २.४.५४. प्रथितं—(√प्रथ+क्तः) प्रसिद्ध' known शिखण्डिमत्। शिखण्डिन्—(शिखण्ड+इनिः) शिखण्डः (शिखा) अस्य अस्तीति one having a crest i e., a pea-cock. शिखण्डिमत्—(शिखण्डिन्+मतुप्) शिखण्डिनः (मयूराः) सन्ति अस्मिन् इति abounding in pea-cocks This shows the absence of poisonous serpents and other ferocious beasts The suffix मतुप् is added by 'तदस्यास्त्यस्मिन्निति मतुप्' पा० ५ २ ९४ in the sense of 'it has that or that is in it' शिखरं—a peak जगाम—गता resorted to Perfect (लिट्) √of गम् to go

Cf in this connection—'गौरी विजयया सख्या जयया च सुनेत्रया। साकं सखीभ्यां सुमुखी सा गौरीशिखरं ययौ। चकार वसतिं यस्माद्गौरीशिखरमुच्यते॥' शिवपुराण।

Change of Voice :—अथ गौर्या अनुरूपाभिनिवेशतोषिणा गरीयसा गुरुणा कृताभ्यानुज्ञया पश्चात् प्रजासु तदाख्यया प्रथितं शिखण्डिमत् शिखरं जग्मे ॥ ७ ॥

Hindi Translation:—तदनन्तर (उसके) योग्य निश्चय से सन्तुष्ट हुए, पूज्य पिता से आज्ञा दी जाती हुई गौरी मोरों से युक्त (हिमालय की एक) चोटी पर गई, जो कि बाद में जनता में उसी के नाम से प्रसिद्ध हुई ॥ ७ ॥

English Translation —Being permitted by her highly venerable father, who was satisfied with her determination worthy of her, Gauri resorted to a peak,

bounding in peacocks, which afterwards came to be known by her name among the people 7.

PURPORT IN SANSKRIT :—पार्वत्याः पिता स्वदुहितुर्मनस्तद्योग्येऽर्थे लग्नं ज्ञात्वा संतुष्ट आसीत्, अतस्तेन सा वनं गन्तुमनुज्ञाता। साऽपि पितुरनुमतिं संप्राप्य मयूराद्यहिंस्रप्राणिसमन्वितं शान्तमेकं हिमवतः शृङ्गं तपः कर्तुं प्रययौ, यच्च शिखरं तपोऽवसाने तस्या नाम्नैव 'गौरीशिखरं' इति प्रसिद्धं जातम्॥ ७॥

विमुच्य सा हारमहार्यनिश्चया
विलोलयष्टिं प्रविलुप्तचन्दनम्।
बबन्ध बालारुणबभ्रु वल्कलं
पयोधरोत्सेधविशीर्णसंहति ॥ ८ ॥

विमुच्येति। अहार्यनिश्चया अनिवार्यनिश्चया सा गौरी विलोलयष्टिप्रविलुप्तचन्दनम् विलोलाभिः चलाभिः यष्टिभिः प्रतिसरैः प्रविलुप्तं प्रमृष्टं चन्दनं स्तनान्तरगतं येन त यथोक्त हारं मुक्तावलीं विमुच्य विहाय बालारुणबभ्रु बालार्कपिङ्गलं पयोधरोत्सेधविशीर्णसंहति पयोधरयोः स्तनयोः उत्सेधेन उच्छ्रायेण विशीर्णा विघटिता संहतिः अवयवसंश्लेषो यस्य तत्तथोक्तं वल्कलं कण्ठलग्निव स्तनोत्तरीयभूतं बबन्ध। धारयामासेत्यर्थः।

PROSE ORDER —अहार्यनिश्चया सा विलोलयष्टिप्रविलुप्तचन्दनं हारं विमुच्य बालारुणबभ्रु पयोधरोत्सेधविशीर्णसंहति वल्कलं बबन्ध॥ ८॥

NOTES:—अहार्यनिश्चया—न हार्यः (अत्याज्यः) निश्चयो यस्याः सा whose determination was unalterable, *i e*, of firm resolution हार्य—(√हृ+ण्यत्) which can be

removed or given up विलोलयष्टिप्रविलुप्तचन्दनम् । यष्टि—a string of pearls of a necklace (हार की लड़ियाँ—हिन्दी) प्रविलुप्त—(प्र+वि+√लुप्+क्तः) wiped away; removed विलोलाभिःयष्टिभिः प्रविलुप्तं चन्दनं येन तम् which wiped away the sandal-paste (from her breast) by its tremulous strings of pearls An Adj of हारम्, the necklace विमुच्य—(वि+√मुञ्च्+ल्यप्) त्यक्त्वा having given up This indicates Parvati's determination to lead a simple and hard life in accordance with the spirit of penance बालारुणबभ्रु—बालः (नवोदित) असौ अरुणः (सूर्यः) बालारुण, स इव बभ्रु (पिङ्गलम्) which was tawny like the morning sun बभ्रु—deep brown; reddish brown. The compound which is कर्मधारय is an Adjective of वल्कलं and so is in Accusative Sing. पयोधरोत्सेधविशीर्णसंहति । पयोधरः—धरतीति धरः (√धृ+अप्) पयस (दुग्धस्य) धरः पयोधरः breasts उत्सेध—(उत् +√सिध्+घञ्) height; elevation विशीर्ण—(वि+√शॄ +क्तः) विघटिता broken or made less thick; shattered. Past Part of √शॄ to tear to pieces क्त is changed to न and ultimately to ण । संहति—अवयवसंश्लेषः Compactness (वल्कल का गाढ़ापन—हिन्दी) पयोधरयो उत्सेधेन विशीर्णा संहतिः यस्य तत् पयोधरोत्सेधविशीर्णसंहति the compactness of which was broken by the elevation of her breasts It is also an Adjective of वल्कलम् । वल्कल—bark; skin of a tree. बबन्ध—tied; put on. Perfect of √बन्ध् to tie

In this and the following three stanzas the poet describes how did Parvati adopt the various things, one after the other, necessary for a person practising penance.

CHANGE OF VOICE :—महार्थनिश्चयया तया विलोलयष्टिप्रलुप्तचन्दनं हारं विमुच्य बालारुणबभ्रु पयोधरोत्सेधविशीर्णसंहति वल्कलं बबन्धे ॥ ८ ॥

HINDI TRANSLATION:—उस अटल निश्चय वाली (पार्वती) ने हिलती हुई लड़ों से (छाती में लगे) चन्दन पोंछने वाले हार को उतार कर, प्रातः कालीन सूर्य के समान कपिश, स्तनों की ऊँचाई से छिन्न अवयव वाली (तनी हुई) पेड़ो की छाल धारण कर ली ॥ ८ ॥

ENGLISH TRANSLATION —She, whose determination was unalterable, having taken off her necklace, which wiped away the sandal-paste (on her breast) by its tremulous strings, put on a bark-garment, tawny like the morning sun (and) the compactness of which was loosened by the elevation of (her) breasts. 8

PURPORT IN SANSKRIT : — निश्चलनिश्चया पार्वती भूषणानि महार्घवस्त्राणि च परित्यज्य तपोऽनुकूलं वेष परिधत्ते स्म । आदौ तया मौक्तिको हारः परित्यक्तः, यस्तस्याः स्तनयोरन्तरालेऽलम्बत यश्च तयोश्चन्दनलेपं प्रामार्जीत् । शरीराच्छादनाय चोद्यत्सूर्यपिङ्गलं वल्कलं धृतं, यस्यावयवानां कुचकाठिन्याच्छैथिल्यं जातम् ॥ ८ ॥

यथा प्रसिद्धैर्मधुरं शिरोरुहैः
जटाभिरप्येवमभूत्तदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते ॥ ९ ॥

यथेति । तस्य देव्या आननं तदाननं प्रसिद्धैः भूषितैः । प्रसिद्धौ ख्यातभूषितौ ' इत्यमरः । रोहन्तीति रुहाः । ' इगुपधज्ञाप्रीकिरः कः ' इति कः प्रत्ययः । शिरसि रुहाः तैः शिरोरुहैः मूर्धजैः यथा मधुरं प्रियं अभूत् । 'स्वादुप्रियौ तु मधुरौ ' इत्यमरः । जटाभिः अपि एवं मधुरमभूत् । तथा हि पङ्कजं पद्मं षट्पदश्रेणिभिः भ्रमरपङ्क्तिभिः एव न किन्तु सह शैवलासङ्गेन सशैवलासङ्गमपि । 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । प्रकाशते । शैवलेनापि शोभत एवेत्यर्थः ॥ ९ ॥

Prose Order :—तदाननं प्रसिद्धैः शिरोरुहैः यथा मधुरं अभूत्, जटाभिः अपि एवं (अभूत्) । पङ्कजं षट्पदश्रेणिभिः एव न प्रकाशते (किन्तु) सशैवलासङ्गं अपि (प्रकाशते) ॥ ९ ॥

Notes:—तदानन—तस्याः आननम् । प्रसिद्धैः—सुसज्जितैः, अलङ्कृतैः decorated. प्रसिद्ध means 'famous' and 'decorated' *Cf.* ' प्रसिद्धौ ख्यातभूषितौ' इत्यमरः । शिरोरुहैः—रोहन्ति इति रुहा (√रुह् to grow + कः) which grow. शिरसि रुहाः शिरोरुहाः (केशाः) which grow on the head i. e hair. क suffix is added by ' इगुपधज्ञाप्रीकिरः कः ' पा० ३.१.१३५ । मधुरं—प्रियं, सुन्दरम् pretty. मधुरं means 'sweet' as well as 'agreeable.' *Cf.* स्वादुप्रियौ तु मधुरौ ' इत्यमरः । अभूत्—was. Aorist (लुङ्) of √भू 'to be.' जटाभिः—by means of matted hair. The difference between ordinary hair and matted hair (जटा) is that

the former are oiled, combed and decorated in other ways to enhance the beauty of the face, but no such care is taken in the case of the latter, which are allowed to grow in a natural way अपि—also The poet means to say that Parvati's face being handsome looked as much pretty with matted hair as with ordinary hair · even ugly things can not mar the beauty of a really beautiful thing. This very idea is supported by the next two lines of the stanza पङ्कजं—(पङ्क+√जन्+डः) पङ्के पङ्कात् वा जायत इति a lotus. षट्पदश्रेणिभिः—षट् पदानि येषां ते षट्पदाः (भ्रमराः) तेषां श्रेणिभिः (पङ्क्तिभि.) swarms of bees For the synonyms of षट्पद *Cf.* 'द्विरेफपुष्पलिट् भृङ्ग षट्पद भ्रमरालयः' इत्यमरः। प्रकाशते—shines or looks beautiful Present of √काश् to shine. सशैवलासङ्गम्—शैवलानां (जलनीलिकानां ; काई—हिन्दी) आसङ्ग (साहचर्यं) शैवलासङ्गः, शैवलासङ्गेन सह वर्त्तमानं सशैवलासङ्गम् by its union with moss आसङ्ग—contact. The compound is बहुव्रीहि according to 'तेन सहेति तुल्ययोगे' पा० २.२.२८। *i e.*, the particle सह may be compounded with a noun in the Instrumental Case in a Bahuvrihi when there is equal participation in some action ; in this case सह optionally becomes स।

For the idea contained in this stanza see "सरसिजमनुविद्धं शैवलेनापि रम्यं, मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति। इयमधिकमनोज्ञा वल्कलेनापि तन्वी, किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥" शकुन्तला १. १८

CHANGE OF VOICE —तदाननेन प्रसिद्धैः शिरोरुहैः यथा मधुरेण अभावि, जटाभिरप्येव (अभावि) । पङ्कजेन षट्पदश्रेणिभिरेव न प्रकाश्यते (किन्तु) सशैवलासङ्गेनापि (प्रकाश्यते) ॥ ९ ॥

HINDI TRANSLATION —उसका मुख जिस प्रकार सजे हुए केशों से सुन्दर लगता था, उसी प्रकार जटाओं से भी (लगता था) । कमल केवल भौंरो की पङ्क्तियों से ही नहीं, अपि तु काई के साथ भी शोभायमान लगता है ॥ ९ ॥

ENGLISH TRANSLATION —As her face looked pretty by decorated tresses, so it did by matted hair also A lotus does not look beautiful only by the swarms of bees, but even by its contact with moss. 9

PURPORT IN SANSKRIT —पूर्वं पार्वती भूषितान् केशान् दधार यैस्तस्या आननमत्यन्तमशोभत । इदानीं तु तया जटाः धृताः । परमाभिर्जटाभिस्तस्याः मुखस्य शोभा न्यूना न जाता, अपि तु पूर्ववदेवाभासत । तथाहि—कमलं केवलं भ्रमराणां पङ्क्तिभिरेव न शोभतेऽपि तु शैवलयोगेऽपि तथैव सुन्दरं भवति । रूपवन्त आकारा सर्वथैव शोभाकरा इति तात्पर्यम् ॥ ९ ॥

प्रतिक्षणं सा कृतरोमविक्रियां
व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्वनिबद्धया तया
सरागमस्या रसनागुणास्पदम् ॥ १० ॥

प्रतीति । सा देवी प्रतिक्षणं क्षणे क्षणे कृतरोमविक्रियां पारुष्यात्कृतरोमाञ्चां त्रिगुणां त्रिरावृतां यां मौञ्जीं मुञ्जमयीं मेखलां व्रताय तपसे बभार । तत्पूर्वनिबद्धया तदेवपूर्वं प्रथमं यस्य तत्पूर्वं

यथा तथा निबद्धया तया मौञ्ज्या अस्याः देव्याः रसनागुणास्पदं रसनागुणस्य आस्पदं स्थानं जघनम्। सह रागेण सरागं सलोहितं अकारि कृतम् सौकुमार्यातिशयादिति भावः ॥ १० ॥

Prose Order.—सा व्रताय प्रतिक्षणं कृतरोमविक्रियां त्रिगुणां यां मौञ्जीं बभार, तत्पूर्वनिबद्धया तया अस्याः रशनागुणास्पदं सरागं अकारि ॥ १० ॥

Notes :—व्रताय—व्रतं आचरितुं व्रतार्थं वा for penance. For the use of Dative see notes on तपः समाधये in stanza 6 above. प्रतिक्षणम्—क्षणे क्षणे इति प्रतिक्षणं every moment वीप्सायां अव्ययीभावः i. e, Avyayibhava compound here has the sense of 'repetition.' कृतरोमविक्रियां—कृता रोम्णां विक्रिया यया सा, तां which caused horripilation ; made hair stand at their ends Decline रोमन् (the hair on the body of men and animals) as—रोम, रोम्णी, रोमाणि (Nom and Acc) रोम्णा, रोमभ्यां, रोमभिः (Inst) etc विक्रिया—विकार a change ; altered or unnatural condition त्रिगुणां—त्रयो गुणाः (आवृत्तयः) यस्याः, तां made of a triple string तीन डोरी वाली—हिन्दी। गुण—a string मौञ्जी—मुञ्जायाः विकारो मौञ्जी (मुञ्ज+अण्+ङीप्) made of munja मूञ्ज grass ; a girdle made of Munja grass, or a girdle. This was the sort of girdle prescribed for a Brahmana *Cf* 'मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला। क्षत्रियस्य तु मौर्वी ज्या, वैश्यस्य शणतान्तवी।' मनु २ ४२। बभार—धारयामास wore. Perfect of √भृञ् to wear. तत्पूर्वनिबद्धया—तदेव पूर्वं (प्रथमं) यस्य तत् तत्पूर्वं ; तत्पूर्वं तथा स्यात्तथा निबद्धया or तदेव पूर्वं निबद्धं

(निबन्धनं) यस्याः सा, तया which was fastened then for the first time Adj of तया—मौञ्ज्या । निबद्ध—(नि + √बन्ध् + क्त) tied रशनागुणास्पदम् । रशना—मेखला a girdle. रशनागुणः—रशनायाः गुणः the cord of a girdle आस्पद—स्थानं place रशनागुणस्य आस्पदं the place for the cord of a girdle *i e*, the waist, the thigh or the hip सरागं—रागेण सह (लोहितं) red अकारि—कृतम् was made. Passive Aorist of √कृ to do

The waist-band being made of munja grass was very rough and, moreover, it was worn by Parvati for the first time, hence her waist was made red by it

CHANGE OF VOICE:—तया व्रताय प्रतिक्षणं कृतरोमविक्रिया त्रिगुणा या मौञ्जी बभ्रे, तत्पूर्वनिबद्धा सा अस्याः रशनागुणास्पदं सरागं अकार्षीत् ॥ १० ॥

HINDI TRANSLATION :—उसने व्रत के निमित्त प्रतिक्षण में रोमाञ्चित करने वाली, तीन लड़ की, मूंज की बनी जिस मेखला को धारण किया, तथो पहिलो बार बाँधी हुई, उसने उसकी मेखला बांधने की जगह (कमर) को लाल कर दिया ॥ १० ॥

ENGLISH TRANSLATION :—Her waist (lit the place for the cord of a girdle was made red by the girdle of Munja grass, comprising three threads, which was fastened then for the first time, which she wore for her penance (and) which made her hair stand erect every moment 10.

PURPORT IN SANSKRIT :—पूर्वं तु पार्वती कटिप्रदेशे क्षौमादिनिर्मितां कोमलां काञ्चीं दधार, अधुना तु व्रतनियमानुसारं तया मुञ्जतृणनिर्मिता त्रिरावृत्ता कर्कशा काञ्ची धृता। इयं काञ्ची पारुष्यात् क्षणे क्षणे तस्याः शरीरे रोमाञ्चमकरोत् , यतश्च सा तद्धारणेऽनभ्यस्तासीत्तया तस्याः कटिप्रदेशः संघर्षणेन रक्तीकृतः ॥ १० ॥

विसृष्टरागादधरान्निवर्त्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात्।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः॥ ११ ॥

विसृष्टेति। तया देव्या विसृष्टरागात् त्यक्तलाक्षारसरञ्जनात् अधरात् अधरोष्ठात् निवर्तितः। निसृष्टरागादिति पाठे नितरां त्यक्तलाक्षारागात्। रागत्यागेन निष्प्रयोजनत्वादिति भावः। तथा (स्तनाङ्गरागारुणितात्) स्तनाङ्गरागेण अरुणितात् अरुणीकृतात् पतनसमये तस्य स्तनयोरुपरोधात् इति भावः। कन्दुकात् च निवर्तितः। (कुशाङ्कुरादानपरिक्षताङ्गुलिः) कुशाङ्कुराणामादानेन लवनेन परिक्षताः व्रणिताः अङ्गुलयो यस्य स तथोक्तः करः पाणिः अक्षसूत्रप्रणयी अक्षमालासहचरः कृतः।

PROSE ORDER :—तया विसृष्टरागात् अधरात् स्तनाङ्गरागारुणितात् कन्दुकात् च निवर्तितः करः कुशाङ्कुरादानपरिक्षताङ्गुलिः अक्षसूत्र प्रणयी कृतः ॥ ११ ॥

NOTES —विसृष्टरागात्। विसृष्टः—(वि+ √सृज्+क्तः) त्यक्तः given up ; left ; removed. √ सृज् to create, changes its meaning when preceded by वि। रागः—(√रञ्ज्+

घञ्) colour ; the act of colouring. विसृष्टः रागः यस्य, तस्मात् of which painting had been given up, or from which the red colour had disappeared Before taking to the life of ascetism Parvati used to paint her lower lip with lac—dye, but, now she could not attend to such decorations अधरात्—from the lower lip. स्तनाङ्गरागारुणितात् । अङ्गरागः—विलेपनम् scented cosmetic ; application of unguents to the body (especially after bath). अरुणितात्—रक्तीकृतात् reddened. अरुण+इतच् ('तदस्य संजातं तारकादिभ्य इतच्' पा० ५. २ ३६) स्तनयोः अङ्गरागेण अरुणितात् reddened by the unguent of her breasts While playing, the ball sometimes touched the breasts and it so was reddened by the paints applied to them कन्दुकात्—from the ball. Like the painting of lips Parvati had given up playing with ball also निवर्तितः—वारितः turned away The hands were no longer employed for the two acts mentioned above. कुशाङ्कुरादानपरिक्षताङ्गुलिः—कुशस्य अङ्कुराणां आदानेन परिक्षता अङ्गुलयो यस्य सः the fingers of which were pricked while plucking the tender blades of kusha grass. अक्षसूत्रप्रणयी—(प्रणयः+इनिः) अक्षाणां सूत्रस्य (रुद्राक्षमालायाः) प्रणयी (प्रेमवान्) the friend of the rosary of Aksha beads, *i e*, the hand was employed in counting the beads कृतः—was made. The poet means to say that on assuming the role of ascetics, Parvati substituted plucking the kusha grass and counting of beads

for painting of the lower lip and playing with the ball.

CHANGE OF VOICE :—सा विसृष्टरागात् अधराद् स्तनाङ्गरागारुणितात् कन्दुकात् च निवर्तितं करं कुशाङ्कुरादानपरिक्षताङ्गुलि अक्षसूत्रप्रणयिनं च कृतवती ॥ ११ ॥

HINDI TRANSLATION :—छूट गया है रंगना जिसका ऐसे ओठ (के रंगने) से तथा स्तनों के अङ्गलेप से लाल हुई गेंद (के खेलने) से निवृत्त हुए हाथ को उसने कुश के अङ्कुरों के काटने से घायल अंगुली वाला और रुद्राक्ष की माला से प्रेम करने वाला (जपने वाला) बना दिया ॥ ११ ॥

ENGLISH TRANSLATION —The hand, which was turned away from her lower lip, the painting of which had been given up, and from the ball reddened by the unguent of her breasts, was made by her such as the fingers of which were pricked by plucking the tender blades of kusha grass (and) the friend of the rosary of Aksha beads 11

PURPORT IN SANSKRIT :—पूर्वं तु पार्वती स्वशरीरशोभार्थं स्वकरेणाधरे लाक्षारसादिरागलेपञ्चकार, मनोविनोदार्थञ्च कन्दुकेन चिक्रीड। तपःकाले तु तयाधररञ्जनं कन्दुकक्रीडनञ्च परित्यक्तमतः स्वकरमनयोरप्रयुज्य तेन पूजार्थं हरिणानां भक्षणार्थं च कुशानां लवनञ्चकार, येन तस्या अङ्गुलयो व्रणयुक्ताः जाताः, अपरञ्च सा तेन करेणानिशं रुद्राक्षमालया जजाप ॥ ११ ॥

महार्हशय्यापरिवर्तनच्युतैः
स्वकेशपुष्पैरपि या स्म दूयते।
अशेत सा बाहुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवलम् ॥ १२ ॥

महार्हेति। (महार्हशय्यापरिवर्त्तनच्युतैः) महान् अर्हो मूल्यं यस्याः सा महार्हा श्रेष्ठा या शय्या तस्यां परिवर्तनेन लुण्ठनेन च्युतैर्भ्रष्टैः स्वकेशपुष्पै अपि या देवी दूयते स्म क्लिश्यति स्म। पुष्पाधिकसौकुमार्यात् इति भावः। सा देवी बाहुलतां उपधत्ते उपधानीकरोति इति बाहुलतोपधायिनी सती केवले संस्तरणरहिते स्थण्डिले भूमौ एव अशेत शयितवती। तथा निषेदुषी उपविष्टा च। 'क्वसुश्च' इति क्वसुः। 'उगितश्च' इति ङीप्। भूमावेव शयनादिव्यवहारो न जातु परीत्यर्थः।

Prose Order :—या महार्हशय्यापरिवर्त्तनच्युतैः स्वकेशपुष्पै. अपि दूयते स्म, सा बाहुलतोपधायिनी केवलं स्थण्डिले एव अशेत निषेदुषी च ॥ १२ ॥

Notes :—महार्हशय्यापरिवर्त्तनच्युतैः। शय्या—(√शीङ्+क्यप्) शय्यते अत्र इति शय्या a bed. च्युतैः (√च्यु+क) भ्रष्टैः dropped महान् अर्हो (मूल्यं) यस्याः सा महार्हा; महार्हायां शय्यायां परिवर्त्तनैः च्युतानि (तत्पुरुषः) महार्हशय्यापरिवर्त्तनच्युतानि, तैः which were dropped down in her rollings on her costly bed स्वकेशपुष्पैः—स्वस्याः केशानां पुष्पैः by the flowers of her hair, *i e*, the flowers used for decorating the heir. दूयते स्म—क्लेशं प्राप experienced pain. √दूङ् परितापे to suffer pain, to be sorry, is conjugated as दूयते (लट्) दुदुवे (लिट्) दविष्यते (लृट्) अदविष्ट (लुङ्) स्म is a particle which when used with a present tense or present participle, gives them a past sense. *Cf.* 'लट् स्मे' पा॰ ३ २ ११८। बाहुलतोपधायिनी—प्रशस्तो बाहुः बाहुलता, तां उपधत्ते इति बाहुलतोपधायिनी (√धा+णिनिः+ङीप्) who uses her creeper-like arm as a

pillow Here the suffix णिनिः is added by 'व्रते' पा० ३ २.८० and so it indicates the observance of a vow. The word उपधानं (a pillow) is also derived from धा with उप—(उप+√धा+ल्युट्) उपधीयते इति उपधानम् । केवले —संस्तरणशून्ये uncovered ; bare स्थण्डिले—संस्कृतायां भूमौ on an earth-platform as opposed to a bed 'स्थण्डिलं संस्कृता भूमिः' हलायुधः । अशेत—शेते स्म slept Imperfect of √शी to sleep निषेदुषी—(नि+√सद्+क्वसुः+ङीप्) निषसाद sat In निषेदुषी which is a Perfect form लिट् is replaced by क्वसु suffix by 'भाषायां सदवसश्रुवः' पा० ३ ४ १०८ and then ङीप् is added to make it feminine by 'उगितश्च' पा० ४ १ ६ । It is well-known that an ascetic is enjoined to sleep or sit on earth or on some other hard thing such as a wooden cot The verse indicates a remarkable change in the life of Parvati. For this *Cf.*

शेते या किल हंसतूलशयने निद्राति सा स्थण्डिले,
वस्ते या मृदुलं दुकूलमबला गृह्णाति सा वल्कलम् ।
या वा चन्दनपङ्कलेपशिशिरे धारागृहे वर्त्तते,
पञ्चानामुदितोष्मणां हुतभुजां सा मध्यमासेवते ॥

पार्वती परिणय ४–२ ।

CHANGE OF VOICE :—यया महार्हशय्यापरिवर्त्तनच्युतैः स्वकेशपुष्पैरपि दूयते स्म तया बाहुलतोपधायिन्या केवले स्थण्डिले एव अशय्यत निषेदे च ॥ १२ ॥

HINDI TRANSLATION :—जो अत्यधिक मूल्य वाली सेज पर करवट लेने से गिरे हुए अपने बालों के फूलों से भी कष्ट पाती

थी, वह अब अपनी लता के समान भुजा का तकिया लगाकर नंगी भूमि पर ही सोती और बैठती थी ॥ १२ ॥

ENGLISH TRANSLATION :—She, who would feel pain even by the flowers dropped down from her hair by her rollings on her costly bed, slept and sat on the bare earth-platform, using her creeper-like arm as a pillow 12.

PURPORT IN SANSKRIT :—सा गौरी पूर्वं तु महामूल्ये शयने शेते स्म शयनकाले च लुण्ठनेन स्वकेशेभ्यः पतितैः कुसुमैरपि तस्याः शरीरं पीडामलभत । तस्या देहः पुष्पेभ्योऽपि सुकुमारतर आसीदित्यर्थः । परं व्रतानुष्ठानकाले सा स्वभुजे उपधानीकृत्यास्तरणरहिते भूभागे सुष्वाप निषसाद च ॥ १२ ॥

पुनर्ग्रहीतुं नियमस्थया तया
द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं
विलोलदृष्टं हरिणाङ्गनासु च ॥ १३ ॥

पुनरिति । नियमस्थया व्रतस्थया तया देव्या द्वयेऽपि द्वयं पुनः ग्रहीतुं पुनरानेतुं निक्षेपः अर्पितं इव निक्षेपत्वेनार्पितं किमु । क्वचिद् द्वयोषु इति प्रामादिकः पाठः । कुत्र द्वये किं द्वयमर्पितमित्याह —तन्वीषु लतासु विलास एव चेष्टितं विलासचेष्टितं हरिणाङ्गनासु विलोलदृष्टं चञ्चलावलोकितं च । व्रतस्थायां तस्यां तयोरदर्शनाल्लतादिषु दर्शनाच्चार्पितमिवेत्युत्प्रेक्षा न तु वस्तुतोऽर्पणमस्तीति भावः ॥ १३ ॥

PROSE ORDER :—नियमस्थया तया विलासचेष्टितं विलोलदृष्टं च इति द्वयं तन्वीषु लतासु हरिणाङ्गनासु च इति द्वये अपि पुनः ग्रहीतुं निक्षेपः अर्पितं इव ॥ १३ ॥

Notes :—नियमस्थया—(√स्था+कः) नियमे तिष्ठतीति नियमस्था, तया by her, who was observing a vow. विलासचेष्टितं—विलासेन चेष्टितं or विलासरूपं चेष्टितं इति विलासचेष्टितं sportive movements ; coquetry. विलास may be explained as–a form of feminine gesture considered as indicative of amorous sentiments. *Cf* 'यानस्थानासनादीनां मुखनेत्रादिकर्मणाम् । विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना ।' साहित्यदर्पणम् । In idiomatic Hindi it is known as नखरा or हावभाव । विलोलदृष्टं—विलोलं (चञ्चल) दृष्टं (दृष्टिः) विलोलदृष्टं (कर्मधारयः) unsteady glances Here दृष्टं (√दृश्+क्तः) is a noun and not a Past Part. द्वयं—द्वौ अवयवौ यस्य तत् द्वय (द्वि+अयच्) the two things ; having two parts ; a pair अयच् is added by 'द्वित्रिभ्यां तयस्य अयज्वा' पा० ५ २ ४३ । The alternative form is द्वितयं । Similarly we have त्रितयं or त्रयं (having three parts) from त्रि । तन्वीषु—कृशासु slender. तन्वी is fem. from तनु । हरिणाङ्गनासु—हरिणानां अङ्गनाः, तासु (मृगीषु) female deer. द्वये—with the two. It is Locative Singular. निक्षेपः—न्यासः a deposit. अर्पितं—दत्त was given ; was kept. The poet imagines that Parvati who was leading the life of ascetism could not use graceful movements and unsteady glances, hence she had deposited them with creepers and female deer respectively, who used them freely.

Change of Voice :—नियमस्था सा विलासचेष्टितं तन्वीषु

लतासु विलोलदृष्टं च हरिणाङ्गनासु इति द्वयं द्वयेऽपि पुनः ग्रहीतुं निक्षेपं इव अर्पितवती ॥ १३ ॥

HINDI TRANSLATION :—(तपस्या के) नियम के पालन करने वाली उसने (अपने) हावभाव और चञ्चल दृष्टि इन दोनों को (क्रम से) पतली लताओं और हरिणियों दोनों के पास फिर लेने के लिये धरोहर की तरह रख दिया ॥ १३ ॥

ENGLISH TRANSLATION :—By her, who was observing a vow, had been kept as a deposit to be taken back, the two things with the two, *viz.*, her sportive gesture with the slender creepers and her unsteady glances with the female deer. 13.

PURPORT IN SANSKRIT :—तपश्चरन्त्या पार्वत्या स्त्रीजन-सुलभौ विलासश्चञ्चलादृष्टिश्च परित्यक्तौ, परं न तत्सर्वदैवापि तु व्रतसमाप्तिपर्यन्तम्। कथं तर्हि सा तौ पुनः प्राप्तुं शक्नुयात् क च तौ गताविति विषये कविरुत्प्रेक्षते—यत् सा विलासादिकं सूक्ष्मासु वल्लीषु चपलां दृष्टिश्च मृगीषु निक्षेपरूपेणास्थापयत् ॥ १३ ॥

अतन्द्रिता सा स्वयमेव वृक्षकान्
घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां
न पुत्रवात्सल्यमपाकरिष्यति ॥ १४ ॥

अतन्द्रितेति। सा देवी स्वयमेव अतन्द्रिता असंजाततन्द्रा-सती। तारकादित्वातच्प्रत्ययः। वृक्षकान् स्वल्पवृक्षान् 'अल्पे' इत्यल्पार्थे कः प्रत्ययः। घटस्तनप्रस्रवणैः घटावेव स्तनौ तयोः प्रस्र-वणैः प्रस्नुतपयोभिः व्यवर्धयत्। गुहः कुमारोऽपि प्रथमाप्तजन्मनां प्रथमलब्धजन्मनाम्। अग्रजातानामित्यर्थः। येषां वृक्षकाणां सम्बन्धि

पुत्रवात्सल्यं सुतप्रेम न अपाकरिष्यति । उत्तरत्र कुमारोदयेऽपि न तेषु पुत्रवात्सल्यं निवर्तिष्यत इत्यर्थः ॥ १४ ॥

Prose Order:—अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवणैः व्यवर्धयत्, गुहोऽपि प्रथमाप्तजन्मनां येषां पुत्रवात्सल्यं न अपाकरिष्यति ॥ १४ ॥

Notes :—अतन्द्रिता—तन्द्रा सञ्जाता अस्याः इति तन्द्रिता, न तन्द्रिता अतन्द्रिता अनलसा without being slack In (तन्द्रा —इतच्) इतच् is added by 'तदस्य संजातं तारकादिभ्य इतच्' पा० ५.२ ३६ । वृक्षकान्—ह्रस्वो वृक्षः वृक्षकः, तान्, स्वल्पपादपान्, little trees. The suffix कन् is added by 'ह्रस्वे' पा० ५.३.८६ । घटस्तनप्रस्रवणैः—घटौ एव स्तनौ, तयोः प्रस्रवणैः प्रसृतैः पयोभिः with outpourings from breast-like jars प्रस्रवण —(प्र+√स्रु+ल्युः) प्रस्रवन्ती कर्त्तरि ल्युः—यु of ल्यु is changed to अन । For a similar idea see 'यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातु पयसां रसज्ञ. ' रघु० २ ३६ व्यवर्धयत् —(वि+√ वृध्+लङ्) अपोषयत् reared up गुहः Name of a son of Shiva and Parvati, (popularly regarded as god of war, because he leads the hosts of Shiva against the demon hosts). He is also known as Kumara, Skanda or Karttikeya. The name Guha may be derived as गूहति देवसेनां इति or 'स्कन्दत्वात्स्कन्दतां प्राप्तो गुहावासाद्गुहोऽभवत् ' i e, he is called Guha because he was reared in a cave प्रथमाप्तजन्मनाम्—प्रथमं आप्तं (प्राप्तं) जन्म यैस्ते तेषां who were born before ; being first-born. Parvati being still unmarried Guha was not born as yet and all her affection for her children was devoted

towards the small trees she reared up पुत्रवात्सल्यं—वत्सलस्य भावः वात्सल्यं (वत्सल+ष्यञ्) affection पुत्रस्य वात्सल्यं पुत्रवात्सल्यं motherly affection, affection for one's child. The compound may also be expounded as पुत्रोचितं वात्सल्यं पुत्रवात्सल्यम् (मध्यमपदलोपी तत्पुरुषः)। न अपाकरिष्यति—न दूरीकरिष्यति will not set aside. The idea is that even after the birth of Guha, Parvati will continue to love them

CHANGE OF VOICE.—अतन्द्रितया तया स्वयमेव वृक्षकाः घटस्तनप्रस्रवणैः व्यवध्यन्त, गुहेनापि प्रथमात्तजन्मनां येषां पुत्रवात्सल्यं न अपाकरिष्यते ॥ १४ ॥

HINDI TRANSLATION —आलस्य रहित हुई वह (पार्वती) अपने आप ही छोटे छोटे वृक्षों को घड़े रूपी स्तनों के जल से सींचती थी; गुह भी पूर्वोत्पन्न उनके लिये (पार्वती के) पुत्र प्रेम को दूर न कर सकेगा ॥ १४ ॥

ENGLISH TRANSLATION—Free from lassitude, she herself reared up the small trees with outpourings from breast-like jars her motherly affection for which, being first born, even Guha would not be able to set aside, 14

PURPORT IN SANSKRIT :—वनमाचरन्ती पार्वती सर्वकार्येषु निरलसाभूत्, स्वाश्रमस्थान् ह्रस्वपादपांश्च पुत्रानिव मन्यमाना स्वयमानीतैः कलशजलैरसिञ्चत्। यथा हि माता स्तनपयसा स्वसन्ततिं पुष्णाति एवं सा घटजलैर्वृक्षान् पुपोष इति स्पष्टार्थः। तस्यास्तेषु पुत्रप्रेमानुभूय कविरुत्प्रेक्षते—यत्तस्याः भाविपुत्रस्य कार्त्तिकेयस्योत्पत्त्यनन्तरमपि सा तान् न विस्मरिष्यति, अपि तु तेषु पुत्रवत्स्नेहं करिष्यति ॥ १४ ॥

अरण्यबीजाञ्जलिदानलालिता-
स्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात्
पुरः सखीनाममिमीत लोचने ॥ १५ ॥

अरण्येति । अरण्यबीजाञ्जलिदानलालिता अरण्यबीजानां नीवारादीनामञ्जलयस्तेषां दानेन लालिता हरिणा च तस्यां देव्यां तथा विशश्वसुः विस्रम्भं जग्मु । 'समौ विस्रम्भविश्वासौ' इत्यमरः । यथा कुतूहलात् औत्सुक्यात् तदीयैः हरिणसम्बन्धिभिः नयनैः नेत्रैः करणैः स्वकीये सखीनां पुरः पुरतः । अनेन तेषां सम्बन्धसहत्वमुक्तम् । अमिमीत । अक्षिपरिमाणतारतम्यज्ञानाय मानं चकारेत्यर्थः । केचित्तु सा पार्वती तदीयैर्नेत्रैः कुतूहलात्पुरोऽग्रे वर्तमानानां सखीनां लोचने अमिमीत वनस्थत्वान्नात्मन इत्याहुः । 'माङ् माने' इत्यस्माद्धातोर्लङ् । इयमेव खलु विश्वासस्य परा काष्ठा यदक्षिपीडनेऽपि न क्षुभ्यन्तीति भावः ॥ १५ ॥

PROSE ORDER :—(किं) च अरण्यबीजाञ्जलिदानलालिताः हरिणाः तस्यां तथा विशश्वसु यथा (सा) कुतूहलात् तदीयैः नयनैः (स्व) लोचने सखीनां पुरः अमिमीत ॥ १५ ॥

NOTES :—अरण्यबीजाञ्जलिदानलालिताः—अरण्यस्य बीजानां अञ्जलेः दानेन लालिता (पालिताः) fondled by being given handfuls of forest-grain अरण्यबीज means wild rice and such other grain as grow in forest of their own accord. Deer were generally reared up in this manner by maidens living in hermitages. *Cf* 'श्यामाकमुष्टिपरिवर्धितको० मृगः' शकुन्तला० ४ १४ तथा—so much. विशश्वसुः—(वि + √श्वस् + लिट्) विश्वासं चक्रुः trusted.

√श्वस् ' to breathe ' means ' to trust ' when preceded by वि। विश्वसिति (लट्) विशश्वास (लृट्) व्यश्वसीत् (लुङ्) । कुतूहलात्—out of curiosity. तदीयैः—(तद् + कः—ईय्) तेषां इमानि तदीयानि, तैः belonging to them (fawns). लोचने—स्वकीये नेत्रे her own eyes. सखीनां पुरः—in the very presence of her friends. The fawns were so much tamed that they would not mind the presence of Parvati's friends. अमिमीत—(√माङ् + लङ्) Measured. Imperfect 3rd person Sing. of √मा ' to measure. ' माति (लट्) ममौ (लिट्) मास्यति (लृट्) अमासीत् (लुङ्) । Some commentators, thinking it improper for Parvati to compare her own eyes with those of the fawns, construe the third and the fourth lines as—कुतूहलात् तदीयैः नयनैः पुरः सखीनां लोचने अमिमीत *i. e.*, out of curiosity she measured the eyes of her friends before her (पुरः) with theirs. But this does not seem to be the idea of the author, who is expected to describe the eyes of Parvati and not those of her friends, and, secondly in that case we would expect सखीनां लोचनानि and not सखीनां लोचने ।

Change of Voice :—अरण्यबीजाञ्जलिदानलालितैः हरिणैः तस्यां तथा विशश्वसे यथा (तया) कुतूहलात् तदीयैः नयनैः लोचने सखीनां पुरः अमीयेताम् ॥ १५ ॥

Hindi Translation :—जंगली अन्नों की मुट्ठियों के देने से पले हुए मृग उसका इतना विश्वास करते थे कि वह उत्सुकता-वश (अपनी) सहेलियों की उपस्थिति में ही उनकी आँखों से (अपनी) आँखें नापा करती थी ॥ १५ ॥

English Translation —And the fawns, by being given handfuls of forest-grains, trusted her so much that, out of curiosity, she used to measure (her own) eyes with theirs in the presence of her friends 15

Purport in Sanskrit —पार्वती नीवारादिभिर्वनधान्यैः हरिणान् पोषति स्म अन्यप्रकारेण च तेषु स्निह्यति स्म । तस्याः वात्सल्यं पुत्रवत्पालनञ्चानुभूय हरिणास्तस्यामतिशयमनुरक्ता जातास्तस्याः लेशमात्रमपि न बिभ्यति स्म । सापि तेषां निर्भीकत्वमालोक्य कुतूहलवशात् स्वसखीनां समक्षमेव हरिणानां नेत्रैः स्वनेत्रे माति स्म । एवं सा तैस्सह मनोविनोदं कुर्वन्ती तान्बहुमन्यत ॥ १५ ॥

कृताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागम-
न्न धर्मवृद्धेषु वयः समीक्ष्यते ॥ १६ ॥

कृतेति । कृताभिषेकां कृतस्नानां हुतजातवेदसं हुताग्निकाम् । कृतहोमामित्यर्थः । त्वचा वल्कलेनोत्तरासङ्गवतीमुत्तरीयवतीं त्वगुत्तरासङ्गवतीम् । अधीतमस्या अस्तीति अधीतिनीं स्तुतिपाठादि कुर्वन्तीम् 'इष्टादिभ्यश्च ' इतीनि प्रत्ययः । तां देवीं दिदृक्षवः द्रष्टुमिच्छवः ऋषयः मुनयः अभ्युपागमन् समुपागताः । न चात्र कनिष्ठसेवादोष इत्याह—धर्मवृद्धेषु वयोज्यैष्ठ्यं न प्रयोजकमित्यर्थः। तथा च मनुः—'न तेन वृद्धो भवति येनास्य पलितं शिरः । यो वा युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥ ' इति ॥ १६ ॥

Prose Order :—कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीं अधीतिनीं तां दिदृक्षवः ऋषयः अभ्युपागमन्, धर्मवृद्धेषु वयः न समीक्ष्यते ॥ १६ ॥

NOTES :—कृताभिषेकां—कृतः अभिषेकः (स्नानं) यया सा, तां who had taken a bath. अभिषेकः—(अभि+√सिच्+घञ्) स्नानम् Here it refers to the sacred bath taken thrice a day हुतजातवेदसं–हुतः जातवेदाः (अग्निः) यया सा, तां who had offered oblations to the fire. जातवेदस्—अग्निः। 'कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्' इत्यमरः। This word is सकारान्त and is declined as—जातवेदाः, जातवेदसौ, जातवेदसः। जातवेदसं, जातवेदसौ, जातवेदसः। जातवेदसा जातवेदोभ्यां, जातवेदोभिः etc, त्वगुत्तरासङ्गवतीं—त्वचा (वल्कलेन) उत्तरासङ्गवती, तां who possessed an upper garment of bark, or, त्वगेव उत्तरासङ्गोऽस्यास्तीति तत्पुरुषान्मतुप् (उत्तरासङ्ग+मतुप्+ङीप्)। उत्तरासङ्ग means 'the upper garment.' अधीतिनीम्—(अधीत+इनिः+ङीप्) अधीतं (वेदाध्ययनं) अस्या अस्तीति अधीतिनी, तां one who was occupied with the study of the Vedas अधीतं—(अधि +√इङ् to read+क्तः) well-read ; learned इनि is added by 'इष्टादिभ्यश्च' पा० ५ २ ८८, then ङीप् is added to make it feminine These four adjectives describe the daily routine of Parvati's life दिदृक्षवः—(√दृश्+सन्+उ) द्रष्टुं इच्छवो दिदृक्षवः, or द्रष्टुमिच्छन्ति दिदृक्षन्ति, ते दिदृक्षवः desirous of seeing (her) This is Nom. Plu. of दिदृक्षु Desiderative noun from √दृश् 'to see.' Similarly are formed चिकीर्षु, जिज्ञासु, जिगमिषु etc, from √कृ, √ज्ञा and √गम् respectively. अभ्युपागमन्—(अभि+उप+आ+√गम्+लङ्) approached. धर्मवृद्धेषु—धर्मेण वृद्धेषु in case of those who are old in spiritual attainments or

advanced in virtue वयः—आयुः age समीक्ष्यते—is seen. Passive Present of √ईक्ष् 'to see.' The idea is that it is no wonder that even older and learned sages used to visit her, because she was very much advanced in spiritual attainments For this very idea *Cf.* 'गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः' उत्तररामचरितम् ४-११। 'प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः' नीतिशतक, ७८। and 'तेजसां हि न वयः समीक्ष्यते' रघु० ११, १।

CHANGE OF VOICE :—कृताभिषेका हुतजातवेदाः त्वगुत्तरासङ्गवती अधीतिना सा दिदृक्षुभिः ऋषिभिः अभ्युपागम्यत, (विद्वांसः) धर्मवृद्धेषु वयः न समीक्षन्ते ॥ १६ ॥

HINDI TRANSLATION :—स्नान करने वाली, अग्निहोत्र करने वाली, पेड़ की छाल को धारण करने वाली और (वेद को) पढ़ने वाली उसके पास उसे देखने की इच्छा वाले ऋषि आते थे। धर्म में बढ़े हुए व्यक्तियों की आयु नहीं देखी जाती ॥ १६ ॥

ENGLISH TRANSLATION —Sages came there, desirous of seeing her, who used to take sacred baths, to offer oblations to the fire, to put on bark as her upper garment and to recite (sacred texts), age is not taken into consideration in case of those who are advanced in virtue 16.

PURPORT IN SANSKRIT :—व्रतस्था पार्वती प्रतिदिनं वारत्रयं स्नाति स्म, नियमपूर्वकमग्निहोत्रं विदधाति स्म, महार्हाणि वस्त्राणि परित्यज्य वल्कलमेव धत्ते स्म तथा वेदादीनां पठनं करोति स्म। एवं गुणवतीं तपस्विनियमयुक्तां च तां मुनयो

बहुमन्यमानास्तस्याः दर्शनार्थं तत्समीपं गच्छन्ति स्म । सा अल्पवयस्कापि ऋषिभिः पूजितेति विषये कविः कथयति—यद् धर्मवतां पुण्यात्मनामादरानादरे तेषामायु अकिञ्चित्करं भवति । अल्पवयस्का अपि तेऽन्येषां पूज्या भवन्ति ॥ १६ ॥

विरोधिसत्त्वोज्झितपूर्वमत्सरं
द्रुमैरभीष्टप्रसवार्चितातिथि ।
नवोटजाभ्यन्तरसंभृतानलं
तपोवनं तच्च बभूव पावनम् ॥ १७ ॥

विरोधीति । विरोधिसत्त्वोज्झितपूर्वमत्सरं विरोधिभिः सत्त्वैर्गोव्याघ्रादिभिरुज्झितपूर्वमत्सर त्यक्तपूर्ववैरम् । हिंसारहितमित्यर्थः । द्रुमैः अभीष्टप्रसवार्चितातिथि अभीष्टप्रसवेनेष्टफलेनार्चिताः पूजिताः अतिथयो यस्मिंस्तत्तथोक्तम् । नवोटजाभ्यन्तरसभृतानलं नवानामुटजानां पर्णशालानामभ्यन्तरेषु सभृताः सञ्चिता अनला अग्नयो यस्मिंस्तत्तथोक्तम् । तत् च तपोवन पावयतीति पावनं बभूव । अहिंसातिथिसत्काराग्निपरिचर्याभिर्जगत्पावनं बभूवेत्यर्थः ॥ १७ ॥

Prose Order —(किं) च विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैः अभीष्टप्रसवार्चितातिथि नवोटजाभ्यन्तरसंभृतानलं तत् तपोवनं पावनं बभूव ॥ १७ ॥

Notes —विरोधिसत्त्वोज्झितपूर्वमत्सरम् । विरोधि—(विरोध +इनि) विरोधो वैरं अस्यास्तीति विरोधिन्, ते विरोधिनः inimical ; hostile. उज्झित—(उज्झ्+क्त) abandoned मत्सरः—वैरम् antipathy ; hostility ‘ मत्सरोऽन्यशुभद्वेषे ’ इत्यमरः । पूर्वमत्सर means ‘ the natural antipathy ’ that exists between some pairs of animals such as cow and tiger, peacock and snake, etc विरोधिभिः सत्त्वैः (प्राणिभिः)

उज्झितः (त्यक्त) पूर्वः मत्सरः यस्मिन् तत् in which the previous antipathy was abandoned by the hostile beasts It is not uncommon that the presence of holy persons has effect on the life of wild beasts, and references to such an effect are made at a number of places in Sanskrit poetry. द्रुमैः—वृक्षैः by the trees. अभीष्टप्रसवार्चितातिथि । अभीष्ट—(अभि+√इष्+क्तः) वाञ्छितं desired प्रसवः—फलं fruits 'स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने' इत्यमरः । अर्चिताः—पूजिताः, सत्कृताः were served with अभीष्टैः प्रसवैः अर्चिता अतिथयो यस्मिन् तत् where the guests were honoured (or served with) desired fruits For the idea *Cf* 'तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु' रघु० १३ ४६ । नवोटजाभ्यन्तरसंभृतानलम् । उटजः—पर्णशाला a hut made of leaves (residence of hermits). 'पर्णशालोटजोऽस्त्रियाम्' इत्यमरः । संभृताः—(सं√ भृञ्+क्तः) आहिताः maintained, kindled. नवानां (नूतननिर्मितानां) उटजानां अभ्यन्तरे संभृताः अनलाः (अग्नयः) यस्मिन् तत् in which (sacred) fires were kindled in the newly built cottages. These three are Adjectives of तपोवनं (the penance-forest) where Parvati practised penance. पावनं—पावयति इति पावनं (पवित्रम्) purifying or holy.

CHANGE OF VOICE :—(किं) च विरोधिसत्त्वोज्झितपूर्वमत्सरेण द्रुमैः अभीष्टप्रसवार्चितातिथिना नवोटजाभ्यन्तरसंभृतानलेन तेन तपोवनेन पावनेन बभूवे ॥ १७ ॥

HINDI TRANSLATION :—जिसमें (एक दूसरे से) शत्रुता

करने वाले जन्तुओं ने पुराने वैर को छोड़ दिया था, जिसमें वृक्षों द्वारा वाञ्छित फलों से अतिथियों का सत्कार किया जाता था और जिसकी नई कुटियों में अग्नि सञ्चित रहती थी ऐसा वह तपस्या का वन पवित्र होगया ॥ १७ ॥

ENGLISH TRANSLATION —The penance-forest also became holy, where the previous antipathy was given up by the hostile beasts, where the guests were served with the desired fruits by the trees, and where the (sacred) fires were maintained in newly built huts of leaves 17

PURPORT IN SANSKRIT —पार्वत्या आदर्शचरित्रेण तत्तपोवनमपि पवित्रीकृतम् । तत्रस्थैर्वनजन्तुभिः स्वाभाविको विरोधस्त्यक्तः—गोव्याघ्रादयः प्रेम्णा परस्परं व्यवहरन्तिस्म । पादपाः स्वफलैरतिथीनां सत्कारं चक्रुः । पर्णशालावासिनो मुनयश्च सनियममग्निहोत्रादिकं धर्मकृत्यं विदधुः । एवं पार्वत्यास्तपोवनं स्वयं पवित्रमन्येषां च पवित्रताकारकमभूत् ॥ १७ ॥

यदा फलं पूर्वतपःसमाधिना

न तावता लभ्यममंस्त काङ्क्षितम् ।

तदानपेक्ष्य स्वशरीरमार्दवं

तपो महत्सा चरितुं प्रचक्रमे ॥ १८ ॥

यदेति । सा देवी यदा यस्मिन् काले तावता तावत्प्रमाणेन पूर्वतपःसमाधिना पूर्वेणानुष्ठीयमानप्रकारेण तपोनियमेन काङ्क्षितं फलं लभ्यं लब्धुं शक्यं न अमंस्त अशक्यममंस्तेत्यर्थः तदा तत्काले । अविलम्बेनेत्यर्थः । स्वशरीरमार्दवं स्वशरीरस्य मार्दवं

मृदुत्वं सौकुमार्यं अनपेक्ष्य अविगणय्य महत् दुस्तरं तपः चरितुं साधयितुं प्रचक्रमे उपचक्रमे ॥ १८ ॥

PROSE ORDER :—सा यदा तावता पूर्वतपःसमाधिना काङ्क्षितं फलं लभ्यं न अमंस्त, तदा स्वशरीरमार्दवं अनपेक्ष्य महत् तपः चरितुं प्रचक्रमे ॥ १८ ॥

NOTES :—तावता—(तावत्+टा) तत् परिमाणमस्येति तावत् , तेन by that much तावत् is formed by adding वतुः to तत् and by lengthening the vowel of तत् by 'आ सर्वनाम्नः' पा० ६ ३ ९१ । पूर्वतपःसमाधिना—तपसः समाधिना तपः समाधिना . पूर्वेण तपःसमाधिना पूर्वतपःसमाधिना (उपरिवर्णिततपोनियमेन) by the penance she had been practising तपःसमाधिः– penance. समाधिः—(सम्+आ+√धा +कि ;) concentration of thoughts काङ्क्षितं—(√काङ्क्ष् +क्तः) desired लभ्यं—(√लभ्+यत्) प्राप्यं obtainable अमंस्त—she thought Aorist third pers sing. of √ मन् to think. मन्यते (लट्) मेने (लिट्) मंस्यते (लृट्) । स्वशरीरमार्दवम् । मार्दव—(मृदु+अण्) मृदोः भावः मार्दवं (कोमलत्वं) tenderness , delicacy अण् is added by 'इगन्ताच्च लघुपूर्वात्' पा० ५. १. १३१ । to form Abstract noun. स्वस्याः शरीरस्य मार्दवं स्वशरीरमार्दवं delicacy of her own body. अनपेक्ष्य—(न+अप्+√ईक्ष्+ल्यप्) not minding. प्रचक्रमे—(प्र+√क्रम्+लिट्) आरेभे began. The √ क्रम् 'to walk' when preceded by प्र or उप् and means 'to begin' is conjugated as आत्मनेपदी । *Cf.* 'प्रोपाभ्यां समर्थाभ्याम्' पा० १. ३. ४२., but प्रक्रामति he goes, उपक्रामति comes

CHANGE OF VOICE :–तया यदा तावता पूर्वतपःसमा-

धिना काङ्क्षितं फलं लभ्यं न अमानि, तदा स्वशरीरमार्दवं अनपेक्ष्य महत् तपः चरितुं प्रचक्रमे ॥ १८ ॥

HINDI TRANSLATION :—जब उसने सोचा कि पहिले की (अब तक की हुई) तपस्या से चाहा हुआ फल प्राप्त होने वाला नहीं, तब (उसने) अपनी देह की कोमलता का विचार न कर (अधिक) कठोर तप करना आरम्भ किया ॥ १८ ॥

ENGLISH TRANSLATION .—When she thought that the desired fruit was not to be attainable by that much penance which she had been so far practising, then, not minding the delicacy of her body, she began a great penance. 18.

PURPORT IN SANSKRIT :—पूर्वोक्तप्रकारेण तप आचरन्ती पार्वती यदा स्वाभीष्टसंसिद्धौ ससन्देहा जाता, तदा सा निजदेहस्य कोमलत्वमनादृत्य कठिनतरं तपः कर्त्तुं निश्चितवती ॥ १८ ॥

क्लमं ययौ कन्दुकलीलयापि या
तया मुनीनां चरितं व्यगाह्यत ।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं
मृदु प्रकृत्या च ससारमेव च ॥ १९ ॥

क्लममिति । या देवी कन्दुकलीलया कन्दुकक्रीडया अपि क्लमं ययौ ग्लानिं प्राप । तया देव्या मुनीनां चरितं तीव्रं तपः व्यगाह्यत प्रविष्टम् । अत्रोत्प्रेक्षते—ध्रुवम् अस्याः वपुः काञ्चनपद्म-निर्मितं काञ्चनपद्मेन सुवर्णकमलेन निर्मितं घटितम् । अतएव प्रकृत्या पद्मस्वभावेन मृदु च सुकुमारमपि काञ्चनस्वभावेन संसारं च कठिनं एव । तथा च तदुपादानकत्वाद्देव्या वपुषः सुकुमारस्यापि तीव्रतपःक्षमत्वमित्युत्प्रेक्षार्थः ॥ १९ ॥

PROSE ORDER :—या कन्दुकलीलया अपि क्लमं ययौ, तया मुनीनां चरितं व्यगाह्यत । ध्रुवं (अस्याः) वपुः काञ्चन पद्मनिर्मितं (अस्ति) (अतएव) प्रकृत्या मृदु च ससारं एव च (अस्ति) ॥१९॥

NOTES :—कन्दुकलीलया—कन्दुकेन कन्दुकस्य वा लीला, तया by playing with the ball क्लमं—श्रान्ति fatigue ययौ—प्राप्ता went; i. e. was fatigued चरितं—the life i e, the austerities व्यगाह्यत—आचर्यत, अक्रियतेत्यर्थः was followed; was practised. Passive Imperfect of √गाह् 'to drive into, to bathe' गाहते (लट्), अगाहिष्ट (लुङ्)। ध्रुवं—निश्चयेन verily It is used to indicate Imagination (उत्प्रेक्षा) *Cf* 'मन्ये शङ्के ध्रुव प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः' ॥ काव्यादर्श ॥ काञ्चनपद्मनिर्मितं—काञ्चनस्य (सुवर्णस्य) पद्मेन (कमलेन) निर्मितं made of gold lotuses The expression काञ्चन-पद्मनिर्मितं does not only mean that her body was of fair complexion, but also that it possessed the hardness and power to resist destructive forces of gold and the softness and beauty of lotus The poet gives reason for calling the body as such—प्रकृत्या—स्वभावेन by nature. ससारं—सारेण सह इति ससारम् (कठिनं बलयुक्तं वा) hard; full of substance 19

CHANGE OF VOICE :—यया कन्दुकलीलयापि क्लमः ययै सा मुनीनां चरितं व्यगाहत । ध्रुवं (अस्याः) वपुषा काञ्चनपद्मनिर्मितेन (भूयते स्म) (अतएव) प्रकृत्या मृदुना संसारेणैव च (भूयते स्म) ॥ १९ ॥

HINDI TRANSLATION :—जो गेंद के खेलने से भी थक जाती थी वही (अब) तपस्वियों का आचरण (कठोर तपस्या) कर रही थी । सचमुच उसका शरीर सोने के कमल का बना हुआ था (क्योंकि) स्वभाव से ही कोमल एवं कठोर या शक्तिशाली था ॥ १९ ॥

ENGLISH TRANSLATION —She, who was wearied even by playing with the ball, betook herself to the life of ascetics, verily her body was made of gold lotuses, as it was by nature delicate as well as possessed of strength 19.

PURPORT IN SANSKRIT —या पार्वती पूर्वमतिकोमलशरीरासीत् कन्दुकक्रीडादिभिरपि च श्रान्ताभूत् सैवेदानीं मुनीनां कठिनं व्रतं सहर्षमाचरति स्म । एतत्समीक्ष्य कविस्तर्कयति—यन्नूनं तस्याः शरीरं सुवर्णपद्मेन विरचितमासीत्, यत्स्वभावेनैव कमलमिव कोमलं सुवर्णमिव च कठोरं शक्तिसम्पन्नं वाभूत् । पार्वती मृदुशरीरापि सती कठिनतप आचरितुं शक्तासीदिति कवेस्तात्पर्यम् ॥ १९ ॥

शुचौ चतुर्णां ज्वलतां हविर्भुजां
शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभा—
मनन्यदृष्टिः सवितारमैक्षत ॥ २० ॥

शुचाविति । शुचौ ग्रीष्मे शुचिस्मिता विशदमन्दहासा सुमध्यमा पार्वती ज्वलतां दीप्तिमतां चतुर्णां हविर्भुजां अग्नीनां मध्यगता सती । नेत्रे प्रतिहन्तीति तां नेत्रप्रतिघातिनीं प्रभां सावित्रं तेजः विजित्य । न विद्यतेऽन्यत्र दृष्टिर्यस्याः सा अनन्यदृष्टिः सती

सवितारंसूर्यं पेक्षत ददर्श । 'ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः' इति स्मरणात् । पञ्चाग्निमध्ये तपश्चचारेत्यर्थः । सवितैव पञ्चमोऽग्निः—'अग्निः सविता सवितैवाग्निः' इति श्रौतलिङ्गात् ॥ २० ॥

PROSE ORDER:—शुचौ ज्वलतां चतुर्णां हविर्भुजां मध्यगता शुचिस्मिता सुमध्यमा नेत्रप्रतिघातिनीं प्रभां विजित्य अनन्यदृष्टिः सवितारं पेक्षत ॥ २० ॥

NOTES :—शुचौ—ग्रीष्मे during the hot season. It is also used for one month only, *viz*, आषाढ or ज्येष्ठ । For the various meanings of शुचि *Cf* 'शुचिर्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमन्त्रिणि, ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिपु ।' इति मेदिनी । ज्वलतां—(√ज्वल्+शतृ) दीप्तिमतां burning, blazing चतुर्णां—of four (fires) While practising the पञ्चाग्नितप, four fires are placed on all the four sides, and the Sun serves the purpose of the fifth fire हविर्भुजां—हविः भुञ्जते इति हविर्भुजः, तेषां which consume the oblations *i e*, fires. Its another synonym is हुतभुक् । मध्यगता—मध्यं गता (मध्ये स्थिता) sitting in the midst शुचिस्मिता—शुचि (शुद्ध) स्मितं (हसितं) यस्याः सा of bright smile ; of sweet smile Mark, here शुचि means 'bright,' while in the first line it means 'the hot season' स्मित—Smile. The √स्मि 'to smile' means 'to wonder' when preceded by वि, *e. g*, विस्मित । The use of this Adjective shows that Parvati did not mind the hardship of penance in the least and maintained the same happy mood as before. सुमध्यमा—सु (शोभनः)

मध्यम (कटिः) यस्याः सा of beautiful waist ; slender-waisted ; a graceful woman नेत्रप्रतिघातिनीम् । प्रतिघातिनी —(प्रति+√हन्+णिनिः+ङीप्) प्रति हन्तुं शीलमस्या इति प्रतिघातिनी Dazzling ; repulsing. घातिनी is formed by adding णिनि to √हन् , ह of which is changed to घ and न to त । नेत्रयोः प्रतिघातिनी, तां dazzling the eyes. प्रभां—तेजः lustre (of the Sun) विजित्य—having conquered. The idea is that Parvati became accustomed to fix her eyes on the Sun. अनन्यदृष्टिः—न अन्यस्मिन् दृष्टिः यस्याः सा not looking at anything else सवितारं—सुवति इति सविता, तं the Sun, lit., who impels creatures to action or who is the producer of things ऐक्षत—(√ईक्ष्+लङ्) gazed at The penance referred to in this verse is known as पञ्चाग्निसाधन, which is a very severe type of asceticism, and means self-mortification by means of five fires It is also mentioned in Raghu XIII 41. 'हविर्भुजां पञ्चवतां चतुर्णां मध्ये ललाटन्तप सप्तसप्तिः । '

CHANGE OF VOICE :—शुचौ ज्वलतां चतुर्णां हविर्भुजां मध्यगतया शुचिस्मितया सुमध्यमया नेत्रप्रतिघातिनीं प्रभां विजित्य अनन्यदृष्ट्या सविता ऐक्ष्यत ॥ २० ॥

HINDI TRANSLATION :—ग्रीष्म ऋतु में, जलती हुई चार अग्नियों के बीच में स्थित, स्वच्छ मुस्कराहट वाली और सुन्दर कमर वाली (पार्वती) आँखों को चकाचौंध करने वाली (सूर्य की) चमक को सहकर, और तरफ न देखती हुई सूर्य की ओर टकटकी लगाये रहती थी ॥ २० ॥

ENGLISH TRANSLATION .—In summer, she, of bright

smile and of slender waist, sitting in the midst of four blazing fires, having overpowered (*i e*, being used to bear) the lustre that dazzled the eyes, gazed at the sun with her sight not directed to anything else 20

PURPORT IN SANSKRIT—कठिनतरतपोवर्णनप्रसङ्गेन पूर्वं पञ्चाग्निसाधकं वर्णयति—पार्वती शास्त्राज्ञानुसृत्य पञ्चाग्निनामकं तपः प्रारब्धवती । तत्करणार्थं कृशकटिमती सा ग्रीष्मे दीप्तिमतां चतुर्णामग्नीनां मध्ये स्थिता लोचनयोः कष्टकारकं सूर्यस्य तेजः पराभूय अनिमेषनेत्राभ्यां सूर्यं प्रति ददर्श ॥ २० ॥

तथाभितप्तं सवितुर्गभस्तिभि-
मुखं तदीयं कमलश्रियं दधौ ।
अपाङ्गयोः केवलमस्य दीर्घयोः
शनैः शनैः श्यामिकया कृतं पदम् ॥२१॥

तथेति । सवितुः सूर्यस्य गभस्तिभिः किरणैः तथा पूर्वोक्तप्रकारेण अभितप्तं संतप्त तस्या इदं तदीयं मुखं कमलश्रियं कमलस्य शोभां दधौ प्राप । यथा रवितापात्कमलं न म्लायति प्रत्युत विकसति तथा तदीयं मुखमासीदिति भावः । किन्तु अस्य मुखस्य दीर्घयो. अपाङ्गयोः केवलं नेत्रान्तयोरेव शनैः शनैः मन्दं मन्दं श्यामिकया कालिम्ना पदं स्थानं कृतम् । तयोः सौकुमार्यादित्यर्थः ॥ २१ ॥

PROSE ORDER :—सवितुः गभस्तिभिः तथा अभितप्तं तदीयं मुखं कमलश्रियं दधौ, श्यामिकया केवलं अस्य दीर्घयोः अपाङ्गयोः शनैः शनैः पदं कृतम् ॥ २१ ॥

NOTES :—सवितुः—of the Sun. Genitive Sing of सवितृ (√षू+तृच्) ; सुवति इति सविता, stimulator ;

rouser, *i e*, the Sun 'भानुर्हंसः सहस्रांशुस्तपनः सविता रविः' इत्यमरः। गभस्तिभि·—किरणैः with the rays 'किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः' इत्यमरः। अभितप्त—(अभि + √तप् + क्तः) आभिमुख्येन तप्तं scorched तदीयं—(तत् + छः—ईय्) तस्याः इदं तदीयम् of her, *i e*, of Parvati दधौ —(√धा + लिट्) धारयामास put on : bore The beautiful face of Parvati being reddened by the heat of the sun looked like a red lotus श्यामिकया—कालिम्ना by darkness. Instru of श्यामिका। अपाङ्गयोः—नेत्रप्रान्तयोः of the outer corners of the eyes दीर्घयोः, because long corners of eyes are one of the marks of beauty. शनैः शनैः—by and by A sudden darkness would have marred the beauty of the face पदं कृतम्—*i e*, made appearance. The word केवलं indicates that no other part of the face, except the long corners of the eyes, was darkened by the heat of the Sun

CHANGE OF VOICE —सवितुः गभस्तिभिस्तथा अभितप्तेन तदीयेन मुखेन कमलश्रीः दधे, श्यामिका केवलं अस्य दीर्घयोः अपाङ्गयोः शनैः शनैः पदं कृतवती ॥ २१ ॥

HINDI TRANSLATION —सूर्य की किरणों से इस प्रकार अत्यधिक तपाया हुआ उसका चेहरा कमल की तरह सुन्दर हो गया; (और सूर्य की गर्मी से हुई) कालिमा से केवल उसकी आँखों के लम्बे कोंए ही धीरे धीरे काले हो गये ॥ २१ ॥

ENGLISH TRANSLATION —Her face greatly scorched by the rays of the sun in this way assumed the beauty

of a lotus ; and only round the long corners of the eyes of it (i e, the face) dark colour gradually made its appearance 21

PURPORT IN SANSKRIT:—निरन्तरं सूर्याभिमुखं निरीक्षणेन मुखे विकृतिः संभवास्ति, परं पार्वत्याः मुखं, यत्सततं सूर्यदर्शनेनोष्णीभूतमासीत्, सूर्यस्य रश्मिभिः स्पृष्टं कमलमिवात्यन्तमशोभत न तु कमपि विकारं दधौ । सूर्यतापजनितं कार्ष्ण्यञ्च केवलं सुकुमारतरयोर्नेत्रप्रान्तयोरेव शनैः शनैः प्रावर्त्तत न तु मुखस्यान्यस्मिन् कस्मिंश्चिद्भागे । तत्कार्ष्ण्यञ्च शोभाकरमेवाभूत्, न तु कान्तिहरम् ॥ २१ ॥

अयाचितोपस्थितमम्बु केवलं
रसात्मकस्योडुपतेश्च रश्मयः ।
बभूव तस्याः किल पारणाविधि-
र्न वृक्षवृत्तिव्यतिरिक्तसाधनः ॥२२॥

अयाचितेति । अयाचितोपस्थितम् अप्रार्थितोपनतं केवलं अम्बु उदकं रसात्मकस्य अमृतमयस्य उडुपते उडूनां नक्षत्राणां पतिश्चन्द्रस्तस्य रश्मयः च तस्याः पार्वत्याः पारणाविधि अभ्यवहारकर्म बभूव । तावन्मात्रसाधनकोऽभूदित्यर्थः । साध्यसाधनयोरभेदेन व्यपदेशः साधनान्तरव्यावृत्त्यर्थः । किल इति प्रसिद्धौ । वृक्षवृत्तिव्यतिरिक्तसाधनः । वृक्षाणां या वृत्तिर्जीवनोपायस्तद्व्यतिरिक्तं साधनमुपायो यस्य स तथोक्तः पारणाविधिः न बभूव । वृक्षोऽप्ययाचितोपस्थितेन मेघोदकेनेन्दुकिरणैश्च जीवतीति प्रसिद्धम् । अम्बिकापि तावन्मात्रमवालम्बतेत्यर्थः ॥ २२ ॥

PROSE ORDER:—अयाचितोपस्थितं केवलं अम्बु रसात्मकस्य

उडुपतेः रश्मयः च तस्याः पारणाविधिः बभूव किल, वृत्तवृत्तिव्यतिरिक्तसाधनः (पारणाविधिः) न (बभूव) ॥ २२ ॥

NOTES :—अयाचितोपस्थितम्—न याचितं अयाचितं (अप्रार्थितं), अयाचितं च तदुपस्थित (प्राप्तं) अयाचितोपस्थितम् which came to her without begging or any other effort on her part उपस्थितं—(उप + √स्था + क्तः) उपनतम् Came to her अम्बु—जलं water. Decline as—अम्बु, अम्बुनी, अम्बूनि । अम्बु, अम्बुनी, अम्बूनि । अम्बुना, अम्बुभ्यां, अम्बुभिः । etc. It means rain-water and dew-water which are obtained without any effort रसात्मकस्य—रसः (जलं) आत्मा यस्य सः, तस्य । जलमयस्य consisting of water The moon is supposed to be full of water on account of its cooling rays रस also means 'nectar' In that case it would mean 'full of nectar', *Cf.* the name सुधाकर of the moon रसात्मक—(रस + आत्मन् + कप्) The कप् suffix is optionally added to some particular words when they form the latter member of a Bahuvrihi compound *Cf.* 'शेषाद्विभाषा' पा० ५.४.१५४ उडुपतेः—उडूनां (नक्षत्राणां) पतिः, तस्य the lord of constellations, *i. e*, the moon. Note the Genitive Sing form of उडुपति is उडुपतेः and not उडुपत्युः । The word पति at the end of a compounded word is declined like हरि and not like पति *e g.* उडुपतिना (तृतीया) उडुपतये (चतुर्थी) उडुपते (पञ्चमी, षष्ठी) उडुपतौ (सप्तमी) । पारणाविधिः—पारण or पारणा means 'eating or drinking after a fast' or simply 'food' Mallinatha has taken

it in the latter sense, but it may be taken in its technical sense also, because Parvati used to observe fast daily पारणाग्रा· विधिः पारणाविधिः or पारणोत्र विधिः पारणाविधिः—भोजन व्रतानन्तर भोजनं वा । किल—It gives the sense that it is so mentioned in the Puranas and such other books वृक्षवृत्तिव्यतिरिक्तसाधनः । वृत्ति·—जीवनोपायः livelihood; subsistence व्यतिरिक्तं—(वि+अति+√रिचिर्+क्तः) भिन्न different. वृक्षाणां वृत्ते व्यतिरिक्तं साधनं यस्य सः वृक्षवृत्तिव्यतिरिक्तसाधन the means of which were (not) different from the subsistence of trees It is an Adjective of पारणाविधिः and means that Parvati's food consisted of the same things and was obtained in the same manner as that of trees 22

Change of Voice —अयाचितोपस्थितेन केवलेन अम्बुना रसात्मकस्य उडुपते रश्मिभिश्च तस्याः पारणाविधिना बभूवे किल, वृक्षवृत्तिव्यतिरिक्तसाधनेन न (बभूवे) ॥ २२ ॥

Hindi Translation ·—बिना मांगे ही प्राप्त हुआ केवल पानी तथा जलमय चन्द्रमा की किरणें उसका भोजन था; (उसके भोजन का) साधन वृक्षों के भोजन से भिन्न न था ॥ २२ ॥

English Translation —Only the water that came to her without begging and the rays of the moon (lit Lord of the constellations), full of nectar, formed her food, the means of which were not different from those by which trees subsist 22

Purport in Sanskrit :—पार्वती स्वजीविकोपार्जनार्थं

कमपि यत्नं न कुरुते स्म, तस्याः भोजनञ्च वृक्षाणामाहारवदति-साधारणमभूत्। यथा हि वृक्षा' केवलं वर्षाजलं चन्द्रकिरणांश्चोप-भुज्य जीवनं धारयन्ति एवमेव सापि याचनां विनैव प्राप्तेन जलेनामृतमयैश्च चन्द्रमसो रश्मिभिश्च व्रतान्तभोजनं कृतवती। एवं तया वृक्षवृत्तितपः प्रारब्धमिति कविना प्रदर्शितम् ॥ २२ ॥

निकामतप्ता विविधेन वह्निना
नभश्चरेणेन्धनसंभृतेन सा ।
तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणममुञ्चदूर्ध्वगम् ॥ २३ ॥

निकामेति। विविधेन पञ्चविधेनेत्यर्थः। नभश्चरेण खेचरेण। आदित्यरूपेणेत्यर्थः। इन्धनसंभृतेन काष्ठसमिद्धेन वह्निना। निकाम-तप्ता निकामं अत्यन्तं तप्ता सा अम्बिका तपात्यये ग्रीष्मान्ते। प्रावृषीत्यर्थः। नवैः वारिभि' उक्षिता सिक्ता सती भुवा पञ्चाग्नि-तप्तया सह ऊर्ध्वगं ऊर्ध्वप्रसृतं ऊष्माणं वाष्पं अमुञ्चत्। 'ग्रीष्मोष्म-वाष्पा ऊष्माणः' इति यादवः ॥ २३ ॥

PROSE ORDER —नभश्चरेण इन्धनसंभृतेन विविधेन वह्निना निकामतप्ता सा तपात्यये नवैः वारिभिः उक्षिता (सती) भुवा सह ऊर्ध्वगं ऊष्माणं अमुञ्चत् ॥ २३ ॥

NOTES :—नभश्चरेण—नभसि (आकाशे) चरति इति नभश्चरः, तेन which wanders or moves in the sky *i. e.*, the sun. इन्धनसंभृतेन। संभृत—(सम्+√भृञ्+क्त) प्रदीप्त kindled or lighted. Lit. fed or maintained इन्धनेन संभृतः, तेन kindled by fuel, *i e* ordinary fire. विविधेन

—नानाप्रकारेण Various, i e, the five fires referred to in the 20th shloka above Some books read द्विविधेन in place of विविधेन which means 'twofold', i e, one in the sky and the other on earth which is maintained with fuel This seems to be a better reading, because, though five in number they are of two kinds only. वह्निना—अग्निना। It is used in the sense of things 'possessing heat' निकामतप्ता—निकामं (अत्यर्थं) तप्ता, निकामतप्ता extremely heated तपात्यये-तपस्य (ग्रीष्मर्तोः) अत्ययः (नाश), तस्मिन् At the end of the summer तपः the summer *Cf* 'निदाघ उष्णोपगम उष्ण ऊष्मागमस्तप' इत्यमरः। अत्ययः—(अति+√इण्+अच्) disappearance नवैः—नूतनैः fresh, i. e, the first waters of rainy season उक्षिता—(√उक्ष्+क्त+आ) सिक्ता drenched भुवा सह—with the earth Decline भू as भूः, भुवौ, भुवः। भुवं, भुवौ, भुवः। भुवा, भूभ्यां, भूभिः etc सह and other particles expressing 'accompaniment' govern the Instrumental case *Cf*- 'सहयुक्तेऽप्रधाने' पाणिनि २ ३ १९। ऊर्ध्वगम्—(√गम्+डः=गः) उर्ध्वं गच्छतीति, तम् which goes upwards. ऊष्मागम्—उष्णतां heat Just as vapour comes out of the earth when drenched with the fresh showers of the rainy season, so did it arise from the body of Parvati which had been heated by the five fires This shows that her body was heated very much, so much so that it turned water into vapour 23.

CHANGE OF VOICE :—नभश्चरेण इन्धनसंभृतेन द्विविधेन

वह्निना निकामतप्तया तया तपात्यये नवैः वारिभिः उक्षितया भुवा सह ऊर्ध्वगः ऊष्मा अमुच्यत ॥ २३ ॥

HINDI TRANSLATION :—आकाश में चलने वाली तथा ईंधन से जलनेवाली नाना अग्नियों से अत्यधिक तपायी हुई वह (पार्वती) ग्रीष्म ऋतु के अन्त में (वर्षा के) प्रथम पानी से सींची हुई पृथ्वी के साथ ऊपर को जाने वाली गर्मी (अर्थात् भाप) छोड़ती थी ॥ २३ ॥

ENGLISH TRANSLATION —She, extremely heated by various fires - the one wandering in the sky and the others maintained by means of fuel—when drenched with the fresh waters at the end of the summer, gave out, along with the earth, heat that ascended upwards 23.

PURPORT IN SANSKRIT :—यथा ग्रीष्मर्तौ सूर्यतापेनाभितप्ता पृथिवी वर्षारम्भे जलसिक्ता सती वाष्पं मुञ्चति तच्च पृथिव्या ऊर्ध्वं याति, तथैव पञ्चाग्नितप आचरन्ती पार्वती सूर्यातपेन चतसृषु दिक्षु स्थापितैर्वह्निभिश्च निकामं तप्ता वर्षाप्रारम्भे जलसिक्ता सती ऊर्ध्वगामिवाष्पं त्यजति स्म ॥ २३ ॥

स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदविन्दवः ॥ २४ ॥

स्थिता इति । प्रथमोदविन्दवः उदकस्य बिन्दवः उदकविन्दवः । 'मन्थौदन०' इत्यादिनोदकशब्दस्योदादेशः । प्रथमे उदविन्दवः । प्रथमविशेषणाद्बिन्दूनां विरलत्वं बहुवचनान्नातिविरलत्वं च गम्यते । तथा च चिरत्वनाभ्यन्तरगमनयोर्निर्वाहः । तस्याः पार्वत्याः पक्ष्मसु नेत्रलोमसु क्षणं स्थिताः स्थितिं गताः । स्थिता इत्यनेन पक्ष्मणां

सान्द्रत्वं क्षणमिति स्नैग्ध्यं च गम्यते। अनन्तरं ताडिताधरास्ताडितो व्यथितोऽधर ओष्ठो यैस्ते तथोक्ताः। एतेनाधरस्य मार्दवं गम्यते। ततः पयोधरोत्सेधनिपातचूर्णिताः पयोधरयोः स्तनयोः उत्सेधे उपरिभागे निपातेन पतनेन चूर्णिताः जर्जरिताः। कुचकाठिन्यादिति भावः। तदनु वलीषु उदररेखासु स्खलिताः। निम्नोन्नतत्वादिति भाव। इत्थं चिरेण न तु शीघ्रम्। प्रतिबन्धबाहुल्यादिति भावः। नाभिं प्रपेदिरे प्रविष्टाः। न तु निर्जग्मुः। एतेन नाभेर्गाम्भीर्यं गम्यते। अत्र प्रतिपदमर्थवत्वात्परिकरालङ्कारः॥ २४॥

PROSE ORDER :—प्रथमोदबिन्दवः क्षणं तस्याः पक्ष्मसु स्थिताः, ताडिताधराः, पयोधरोत्सेधनिपातचूर्णिता वलीषु स्खलिताः नाभिं चिरेण प्रपेदिरे॥ २४॥

NOTES :—प्रथमोदबिन्दवः—प्रथमे (नवाः) उदकस्य (जलस्य) बिन्दवः (कणाः) प्रथमोदबिन्दवः drops of first water. उदक is optionally changed to उद when followed by मन्थ, ओदन, सक्तु, बिन्दु etc. *Cf.* 'मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च' पा० ६. ३. ६०। पक्ष्मसु—नेत्रलोमसु at the eyelashes. पक्ष्मन् is declined as पक्ष्म, पक्ष्मणी, पक्ष्माणि etc. स्थिता.—rested This shows that her eyelashes were dense, which is a sign of beauty, and the adverb क्षणं indicates that they were also smooth. ताडिताधराः—ताडित. अधरो यैस्ते which struck against the lower lip. पयोधरोत्सेधनिपातचूर्णिताः। उत्सेधः—(उत्—√सिध् to go +घञ्) उन्नतिः height, elevation ; bigness ; protrusion. पयोधरयोः (स्तनयोः) उत्सेधे (उन्नतप्रदेशे) निपातेन चूर्णिताः broken on account of their falling on the elevation of

her breasts. This indicates that her breasts were quite elevated and hard वलीषु—उदरस्थितासु रेखासु at the folds or wrinkles. स्खलिताः—निरुध्य पतिताः stumbling through. नाभिं—navel चिरेण—विलम्बेन after a long delay. It is an indeclinable word and not the Instrumental Sing. The drops reached her navel after a long delay, because they had to meet with so many obstructions in the way. प्रपेदिरे—(प्र+√पद् to go+ लिट्) प्राप्ताः reached. Conjugate as—पद्यते (लट्) अपद्यत (लङ्) पत्स्यते (लृट्) अपादि (लुङ्) etc. In this shloka the poet has described the natural path of the drops of rainy showers that fell on Parvati when she sat in the open By the way it has given him an occasion to suggest the excellence of the various limbs of Parvati.

This verse is a good example of परिकर अलङ्कार, ' in which many significant epithets or adjectives are employed one after the other to give force to a statement, *Cf.* ' उक्तैः विशेषणैः साभिप्रायैः परिकरो मतः । ' साहित्यदर्पणम् ।

Change of Voice :—प्रथमोदबिन्दुभि क्षणं तस्याः पक्ष्मसु स्थितैः, ताडिताधरैः, पयोधरोत्सेधनिपातचूर्णितैः, वलीषु स्खलितैः नाभिः चिरेण प्रपेदे ॥ २४ ॥

Hindi Translation :—(वर्षा) जल की प्रथम बूंदें कुछ देर के लिये उसकी आँखों के बालों में ठहर कर (फिर) नीचे

के ओठ से टक्कर खाकर (तत्पश्चात्) स्तनों की ऊँचाई पर गिरने से छिन्न भिन्न हुईं (इसके बाद पेट की) बलों में फिसलती हुईं नाभि में बड़ी देर में पहुँचती थीं ॥ २४ ॥

English Translation —The drops of first water rested for a moment on her eyelashes, (then) struck against her lower lip, broke by falling on the elevation of her breasts, (and then) stumbling through the folds (of her belly), reacned her navel after a long delay. 24

Purport in Sanskrit :—यदा हि तपः कुर्वन्ती पार्वती असंवृते स्थाने निषीदति स्म तदा तदुपरि निपतिताः वर्षाजलस्य बिन्दवः पूर्वं तदक्षिलोमसु निपत्य किञ्चित्कालं तत्र विश्रामं प्रापुः, ततो भ्रष्टा अधरे पतिताः, ततो निपत्य कुचयोश्छिन्नतां गताः, पुनः निम्नस्थलाभिमुखीभूतास्तदुदरप्रदेशस्य वलीषु स्खलन्तो दीर्घकालेन तस्या नाभिं प्राप्ताः तस्याश्च गाम्भीर्यात्तत्रैव स्थितिमकुर्वन् । एतेन पार्वत्याः नेत्रलोम्नां घनत्वं, अधरस्य सौकुमार्यं, स्तनयोः काठिन्यं, उदरप्रदेशस्य निम्नोन्नतत्वं, नाभेश्च गाम्भीर्यं व्यज्यते ॥ २४ ॥

शिलाशयां तामनिकेतवासिनीं
निरन्तरास्वन्तरवातवृष्टिषु ।
व्यलोकयन्नुन्मिषितैस्तडिन्मयै-
र्महातपःसाक्ष्य इव स्थिताः क्षपाः ॥ २५ ॥

शिलाशयामिति । निरन्तरासु नीरन्ध्रासु अन्तरे मध्ये वातो यासां तादृश्यो या वृष्टयस्तासु अन्तरवातवृष्टिषु । न निकेते गृहे वसतीति अनिकेतवासिनीम् । अनावृतदेशवासिनीमित्यर्थः शिलायां शेत इति शिलाशयां शिलातलशायिनीम् । 'अधिकरणे शेतेः' इत्यच्

प्रत्ययः । तां पार्वतीं महातपः साक्ष्ये साक्षाद्द्रष्टा साक्षी । 'साक्षाद्द्रष्टरि संज्ञायाम्' इतीनि प्रत्ययः । तस्य कर्म साक्ष्यम् । महातपसः साक्ष्ये स्थिताः क्षपाः तडिन्मयैः विद्युद्रूपैः उन्मिषितैः अवलोकनैः व्यलोकयन् इव । इवेति चक्षुषा विलोकनमेवोत्प्रेक्ष्यते । साक्ष्यं तु 'आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तम् ।' इति प्रमाणसिद्धत्वान्नोत्प्रेक्ष्यमित्यनुसंधेयम् ॥ २५ ॥

PROSE ORDER :—निरन्तरासु अन्तरवातवृष्टिषु अनिकेतवासिनीं शिलाशयां तां महातपःसाक्ष्ये स्थिताः क्षपाः तडिन्मयैः उन्मिषितैः व्यलोकयन् इव ॥ २५ ॥

NOTES :—निरन्तरासु—निर्गत (दूरीभूतं) अन्तरं (मध्यं) याभ्यः, ताः, तासु Continuous, ceaselessly falling Adjective of वृष्टिषु । अन्तरवातवृष्टिषु—अन्तरे (मध्ये) वाता (वायु :) यासां ता अन्तरवाताः *i. e.* accompanied by winds. अन्तरवाताश्च ताः वृष्टयः अन्तरवातवृष्टयः (कर्मधारयः) तासु showers accompanied by winds. अनिकेतवासिनीम् । वासिनी—(√वस्+णिनि+ङीप्) dwelling न निकेते वसतीत्यनिकेतवासिनी, ताम् not living in a house or sheltered roof, *i. e.*, who lived in an open space शिलाशयां—शिलायां शेते इति शिलाशया, तां who slept on a slab of stone. शयः is formed by adding अच् to √ शी to sleep, by 'अधिकरणे शेतेः' पा० ३ २ १५ । It was necessary for Parvati to live in such a way while performing penance. महातपः साक्ष्ये । साक्ष्यं—साक्षिणः कर्म साक्ष्यं (साक्षिन्+ष्यञ्) the act of a witness The word साक्षिन् is formed by 'साक्षाद् द्रष्टरि संज्ञायाम्' पा० ५. २ ९१ । in the sense of one

who sees a thing with his own eyes महतः तपसः साक्ष्ये इति महातपःसाक्ष्ये doing the work of witnesses of the rigid penance स्थिताः—i. e doing the duty of. क्षपाः—रात्रयः nights 'निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा' इत्यमरः। As Parvati used to perform meditation in loneliness, even her friends being absent at the time, it behoves alright that nights have been described as witnesses of her penance. तडिन्मयैः—(तडित्+मयट्) विद्युद्रूपैः made of lightning 'तडित्सौदामिनीविद्युच्चञ्चला चपला अपि' इत्यमरः। The suffix मयट् is added in the sense of 'made of' or 'in the form of' by 'तत्प्रकृतवचने मयट्' पा० ५ ४ २१। As nights have no actual eyes, lightning has been quite properly mentioned as their glances उन्मिषितैः—(उत् +√मिष् to open the eyes+क्तः) अवलोकनैः by means of glances व्यलोकयन्—(वि+√लोक् to see+लङ्) looked इव is used as a mark of 'Imagination.' The flashes of lightning are imagined as the twinklings of the eyes of the night 25.

Change of Voice :—निरन्तरासु अन्तरवातवृष्टिषु अनिकेतवासिनी शिलाशया सा महातपःसाक्ष्ये स्थिताभिः क्षपाभिः तडिन्मयैः उन्मिषितैः व्यलोक्यत इव ॥ २५ ॥

Hindi Translation :—लगातार होने वाली, हवा के झोकों से युक्त वर्षा में खुले में रहने वाली, पत्थर की चट्टान पर सोने वाली उस (पार्वती) को, उसकी कठिन तपस्या के साक्षी का कार्य करती हुई रात्रियाँ मानो विद्युत् रूप दृष्टियों से देखती थीं ॥ २५ ॥

English Translation :—The nights, which served as witnesses of the rigid penance of her, who slept on a slab of stone, (and) who did not live in a sheltered roof in the midst of unceasing showers accompanied by winds, watched her, as it were, with their glances in the form of (flashes of) lightning 25

Purport in Sanskrit :—प्रावृषि सततं वर्षासु जायमानासु, प्रबलवायौ प्रवाति, विद्युत्सु चाभिद्योतमानास्वपि समाधिमग्ना पार्वती शिलास्वेवानावृतप्रदेशे निषीदति स्म। तादृशे कालेऽन्यदर्शकाभावात् कविरुत्प्रेक्षते यद्रात्रय एव विद्युद्रूपैर्नेत्रैः साक्षिवत् तामवलोकयन् ॥ २५ ॥

निनाय सात्यन्तहिमोत्किरानिलाः
सहस्यरात्रीरुदवासतत्परा ।
परस्पराक्रन्दिनि चक्रवाकयोः
पुरो वियुक्ते मिथुने कृपावती ॥ २६ ॥

निनायेति। सा पार्वती। अत्यन्तहिमोत्किरानिलाः उत्किरन्ति क्षिपन्ति इत्युत्किराः। 'इगुपधज्ञा' इत्यादिना कः। अत्यन्तं हिमानामुत्किरा अनिला यासु ताः सहस्यरात्रीः पौषरात्रीः। 'पौषे तैषसहस्यौ द्वौ' इत्यमरः। उदवासतत्परा उदके वास उदवासः। 'पेषंवासवाहनाधिषु च' इत्युदादेशः। उदवासे तत्परा आसक्ता तथा। परस्पराक्रन्दिनि परस्परमाक्रन्दिन्यन्योन्यमाक्रोशिनि पुरः अग्रे वियुक्ते विरहिणि। वियोगं प्राप्ते इति यावत्। चक्रवाकी च चक्रवाकश्च चक्रवाकौ तयोः चक्रवाकयोः मिथुने द्वन्द्वे कृपावती सती निनाय। दुःखिषु कृपालुत्वं महतां स्वभाव इति चक्रवाकमिथुने कृपा न तु कामितयेति वाच्यानवकाशः। 'अप्सु वासस्तु हेमन्ते क्रमशो वर्धयेत्तपः।' इति मनुः ॥ २६ ॥

Prose Order :—सा अत्यन्तहिमोत्किरानिलाः सहस्यरात्रीः उद्वासतत्परा पुरः वियुक्ते परस्पराक्रन्दिनि चक्रवाकयोः मिथुने कृपावती (सती) निनाय ॥ २६ ॥

Notes :—अत्यन्तहिमोत्किरानिलाः । उत्किरा—(उत्+√कॄ to scatter+कः) उत्किरन्ति (उत्क्षिपन्ति) इत्युत्किराः Scattering The suffix is added by 'इगुपधज्ञाप्रीकिरः कः' पा० ३.१ १३५ । अत्यन्तं हिमानां (तुषाराणां) उत्किराः अनिलाः यासु ताः, अत्यन्तहिमोत्किरानिलाः the nights of which scattered frost in abundance It is Accusative plural and adj of रात्रीः । सहस्यरात्रीः—सहस्यस्य (पौषमासस्य) रात्रीः the nights of Pausha Here it stands for cold season. 'पौषे तिष्यसहस्यौ द्वौ' इत्यमरः । उद्वासतत्परा—उदके वासः, तत्र तत्पर (स परो यस्याः सा तत्परा) given to standing in water; eagerly engaged in standing in water. उदक is replaced by उद before पेषं, वास etc. पेषंवासवाहनाधिषु च' पा० ६.३ ५७ । Similarly is formed उदधिः (ocean). Standing in water forms an important part of penance in cold season. पुरः—in her front. वियुक्ते—वि+√युज्+क्तः) विरहिते separated. परस्पराक्रन्दिनि । परस्परं is a Reciprocal Pronoun formed by the rule 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये' i e, the pronouns अन्य, पर, इतर and उत्तर are doubled when reciprocity of action is expressed, and स् replaces the case of the first part of अन्य and पर and does not disappear in a compound. These are generally used in the singular and also adverbially. परस्परम् आक्रन्दतीति

परस्पराक्रन्दि, तस्मिन् (आ + √क्रन्द् + णिनिः) crying for each other चक्रवाकयो.—चक्रवाकी च चक्रवाकश्च चक्रवाकौ, तयोः of Chakravakas चक्रवाकयोः means the couple of Chakravakas *i e* male and female both The compound is एकशेष द्वन्द्व । In the case of masculine and feminine genders the one of the masculine gender is retained. 'पुमान् स्त्रिया' पा० १ २.६७ । The couples are said to be separated and to mourn during night. मिथुने—युगले pair कृपावती—(कृपा + मतुप् + ङीप्) दयावती possessed of mercy The म of the termination मतुप् is changed to व when affixed to words ending in म् or अ, short or long, or having either for their penultimate. निनाय—(√नी + लिट्) यापयामास passed Its object is रात्रीः ।

Having described how did Parvati practise penance in the hot and the rainy seasons, in this and the following verse the poet describes the way in which Parvati practised penance in the cold season. 26.

Change of Voice :—तया अत्यन्तहिमोत्किरानिलाः सहस्यरात्रयः उदवासतत्परया पुरः वियुक्ते परस्पराक्रन्दिनि चक्रवाकयो. मिथुने कृपावत्या (सत्या) निन्यिरे ॥ २६ ॥

Hindi Translation :—वह (पार्वती) अत्यधिक वर्फ़ बरसाने वाली वायु से युक्त पौष मास की रात्रियों को पानी में खड़ी हुई, (अपने) सामने के विरही, एक दूसरे के लिये चिल्लाते हुए चक्रवाक के जोड़े के लिये दया का अनुभव करती हुई, बिताती थी ॥ २६ ॥

ENGLISH TRANSLATION —Eagerly engaged in standing in water she passed the nights of Pausha in which the winds scattered snow in abundance, pitying the pair of the Chakravaka birds (which were) before her, separated and crying for each other 26

PURPORT IN SANSKRIT :—ग्रीष्मे प्रावृषि च पार्वतीकृतं तपो वर्णयित्वा कविस्तद्धैमन्तमाचरणं दर्शयति-पार्वती तुषारकण-पूरितवातप्रचुरासु पौषमासस्य शीतनिशास्वपि जले समाधिमातिष्ठति स्म । तासु निशासु चक्रवाकयोर्मिथुनादृते नान्यः कोऽपि तत् समीपवर्त्यासीत्—चक्रवाकयोर्युगलं च विरहवेदनापीडितत्वात् अन्योन्यमाह्वयति स्म पार्वती च तस्मिन् युगले दयामन्वभूत् ॥ २६ ॥

मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसंपदां
सरोजसंधानमिवाकरोदपाम् ॥ २७ ॥

मुखेनेति । सा पार्वती निशि रात्रौ पद्मसुगन्धिना पद्मवत्सुगन्धिना सुरभिणा । 'गन्धस्येत्'—इत्यादिनेकारः । प्रवेपमानाधरपत्रशोभिना प्रवेपमानः कम्पमानोऽधर ओष्ठ एव पत्रं दलं तेन शोभते इति तथोक्तेन मुखेन तुषारवृष्टिक्षतपद्मसंपदां तुषारवृष्ट्या तुहिनवर्षेण क्षताः नाशिताः पद्मसंपदो यासां तासां अपां सरोजसंधानं पद्मसंघट्टनं अकरोद् इव । इत्युत्प्रेक्षालङ्कारः । पद्मान्तरं तुहिनेनोपहन्यते तन्मुखपद्मं तु न तथेति व्यतिरेकालङ्कारो व्यज्यते इत्युभयोः संकरः ॥ २७ ॥

PROSE ORDER :—सा निशि पद्मसुगन्धिना प्रवेपमानाधरपत्रशोभिना मुखेन तुषारवृष्टिक्षतपद्मसंपदां अपां सरोजसंधानं अकरोद् इव ॥ २७ ॥

NOTES —पद्मसुगन्धिना—शोभनो गन्धो यस्मिंस्तत् सुगन्धि (सुरभि) fragrant. गन्ध becomes गन्धि in a Bahuvrihi compound when preceded by उत्, पूति and सु 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' पा० ५ ४ १३५ । पद्मेन इव सुगन्धिना पद्मसुगन्धिना which was as fragrant as the lotus प्रवेपमानाधरपत्रशोभिना। प्रवेपमानः—(प्र+√वेप्+शानच्) प्रकम्पमानः trembling अधरपत्रं—अधरः एव पत्र leaf-like nether lip. पत्र means a petal of lotus प्रवेपमानेन अधरपत्रेण शोभते इति प्रवेपमानाधरपत्रशोभि, (√शुभ् दीप्तौ+णिनिः) तेन which shone with the quivering leaf of the nether lip. The whole face being compared to a lotus, the lips may rightly be compared to its petals तुषारवृष्टिक्षतपद्मसंपदां—तुषारस्य (तुहिनस्य—हिमस्य) वृष्ट्या क्षताः (नाशिताः) पद्मान्येव सम्पदो यासां ताः, तासां the wealth of lotuses of which was destroyed by the showers of frost The comp. is an adj of अपां—waters The word अप् is declined only in plural and in feminine gender आपः। अपः। अद्भिः। अद्भ्यः। अद्भ्यः। अपाम्। अप्सु। *Cf* 'आपः सुमनसो वर्षाः अप्सराः सिकताः समाः। एते स्त्रियां बहुत्वे स्युरेकत्वेप्युत्तरत्रयम्।' सरोजसन्धानम्। सरोजं—सरसि जातम् (√जन्+डः) a lotus सरोजानां सन्धानं (संघट्टनं) सरोजसन्धानं continuation (of the line) of lotuses The lotuses of the water being withered by frost, her

lotus-like face being reflected in the water served as a substitute for them Some books read संतानं for संधानम्। इव is used for उत्प्रेक्षालङ्कार ॥ २७ ॥

CHANGE OF VOICE :—तया निशि पद्मसुगन्धिना प्रवेपमानाधरपत्रशोभिना मुखेन तुषारवृष्टिक्षतपद्मसंपदां अपां सरोजसंधानं अक्रियत इव ॥ २७ ॥

HINDI TRANSLATION :—वह (पार्वती) रात्रि में कमल के समान सुगन्ध युक्त, कांपते हुए (कमल के) पत्ते रूपी नीचे के ओठ से सुशोभित मुख के द्वारा, कुहरे की वर्षा से नष्ट हुए कमलों वाले पानी में मानों कमलों की परम्परा (सिलसिले) को बनाती थी ॥ २७ ॥

ENGLISH TRANSLATION —By her face, which was as fragrant as the lotus and which shone with the quivering leaf of the lower lip, she at night showed as it were the continuation of lotuses in the waters, the wealth of lotuses of which was destroyed by the showers of frost 27

PURPORT IN SANSKRIT —पार्वत्या मुख कमलवत् सुगन्धपूर्णमासीत् तदीय· कम्पमानोऽधरोष्ठश्च कमलदलतुल्यः शोभते स्म । तस्मात्तन्मुखं रात्रौ जले प्रतिबिम्बतां गतं हिमपातेन नष्टानां कमलानां स्थानपूर्त्तिमिवाकरोत्—कमलरहितमपि जलं तन्मुखप्रतिबिम्बैः कमलपूर्णमिवाभासतेत्यर्थः ॥ २७ ॥

स्वयंविशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः ॥ २८ ॥

स्वयमिति । स्वयंविशीर्णद्रुमपर्णवृत्तिता स्वयं विशीर्णानि स्वतश्च्युतानि द्रुमपर्णान्येव वृत्तिर्जीवनं यस्य तस्य भावस्तत्ता तपसः परा काष्ठा परमुत्कर्षो हि । 'काष्ठोत्कर्षे स्थितौ दिशि' इत्यमरः । तया देव्या पुनः तत् पर्णवर्तन अपि अपाकीर्णम् अपाकृतम् । अतः पर्णापाकरणाद्धेतोः । प्रियंवदां प्रियं वदतीति प्रियवदा ताम् । 'प्रियवशे वदः खच्' इति खच् प्रत्ययः । 'अरुर्द्विषदजन्तस्य मुम्' इति मुमागमः । तां पार्वतीं पुराविदः पुराणज्ञास्तपःकरणसमयेऽविद्यमानं पर्णभक्षणं यस्याः सा अपर्णा इति वदन्ति च । नामान्तरसमुच्चयार्थश्चकारः । स्वयं प्रियंवदाः परेषामपि प्रियवादभाजनानि भवन्तीति भावः । अत्र अपर्णाम् इत्यपपाठ इतिशब्दाभिहिते द्वितीयानुपपत्तेः । यथाह वामनः—'निपातेनाप्यभिहिते कर्मणि न कर्म विभक्ति परिगणनस्य प्रायिकत्वात्' इति ॥ २८ ॥

PROSE ORDER:—हि स्वयंविशीर्णद्रुमपर्णवृत्तिता तपसः परा काष्ठा, तया पुनः तदपि अपाकीर्णम्, अतः पुराविदः प्रियंवदां तां अपर्णा इति च वदन्ति ॥ २८ ॥

NOTES:—स्वयंविशीर्णद्रुमपर्णवृत्तिता । विशीर्ण—(वि + √शॄ + क्तः) निपतितानि broken; fallen. त of क्त is changed to न and then to ण and ॠ of √शॄ is changed to ईर् । Similarly are formed जीर्ण, तीर्ण etc वृत्तिता—वृत्तेः भावः वृत्तिता (वृत्ति + ता) means of subsistence स्वयं विशीर्णानि द्रुमाणां पर्णान्येव (पत्राण्येव) वृत्तिः यस्मिन्, तस्य भावः स्वयंविशीर्णद्रुमपर्णवृत्तिता subsistence on leaves of trees fallen of their own accord. To avoid injury to trees, an ascetic would not pluck their leaves परा—उत्तमा, चरमा the highest, extreme काष्ठा—सीमा limit 'काष्ठा उत्कर्षे स्थितौ दिशि' इत्यमरः । The expression means 'the

extreme limit ' or ' the sternest severity ' *i e*, beyond which there is no other severity अपाकीर्णम्—(अप + आ + √कॄ + क्तः) त्यक्तम् abandoned. The ordinary meaning of √कॄ is ' to scatter ', कीर्ण is formed like शीर्ण above पुराविदः—(√विद् + क्विप्) पुरा (वृत्तम्) विदन्ति (जानन्ति) इति पुराविदः who know history, *i e.* historians पुराविद् is declined like भूभृत् *viz*, पुराविद्, पुराविदौ, पुराविदः etc प्रियंवदां—(प्रिय + √वद् + खच्) प्रियं (मधुरं) वदतीति प्रियंवदा, तां प्रियंवदाम् talking sweet. खच् termination is affixed to √वद् by ' प्रियवशे वदः खच् ' पा० ३ २ ३८ । and a nasal (मुम्) is inserted before the root by ' अरुर्द्विषदजन्तस्य मुम् ' पा० ६ ३ ६७ । Although bearing so much hardship, Parvati did not lose her habit of sweet-speaking अपर्णा—न पर्णानि यस्याः सा अपर्णा Aparna *i e.*, who had given up even eating of leaves of trees. Although not without significance it is a proper name of Parvati ' अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ' इत्यमरः । *Cf* ' चतुर्थे त्यक्तपर्णा च अपर्णाख्यामवाप सा ' शिवपुराणम् ॥२८॥

CHANGE OF VOICE :—हि स्वयंविशीर्णद्रुमपर्णवृत्तितया तपसः परया काष्ठया (भूयते), सा पुनस्तदपि अपाकीर्णवती, अतः पुराविद्भिः प्रियंवदा सा अपर्णा इति च उच्यते ॥ २८ ॥

HINDI TRANSLATION :—अपने आप गिरे हुए पेड़ों के पत्तों से जीविका निर्वाह तप की अन्तिम श्रेणी है पर उसने वह भी छोड़ दिया, इस लिये पुराणज्ञ उस मधुरभाषिणी को 'अपर्णा' कहते हैं ॥ २८ ॥

English Translation .—The extreme limit of austerities lies in subsisting on leaves of trees fallen of their own accord, but that also was abandoned by her ; therefore, those conversant with history also call her, the sweet-talker, Aparna 28.

Purport in Sanskrit :—तपस्विनः क्रमशो दुग्धफलादीनामाहारं त्यक्त्वा स्वयं पतितानि वृक्षाणां पत्राण्येव भुक्त्वा जीवनं यापयन्ति—एषैव तपस्याया अन्तिमावस्था वर्त्तते। परं मधुरभाषिण्या पार्वत्या दलानां भक्षणमपि त्यक्तमासीदत ऐतिहासिकास्तां ' अपर्णा ' इति संज्ञया व्यपदिशन्ति ॥ २८ ॥

मृणालिकापेलवमेवमादिभि-
र्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ।
तपः शरीरैः कठिनैरुपार्जितं
तपस्विनां दूरमधश्चकार सा ॥ २९ ॥

मृणालिकेति । मृणालिकापेलवं पद्मिनीकन्दकोमलं स्व स्वकीयं अङ्गं शरीरं एवमादिभिः एवमुक्तप्रकारतोयाग्निमध्यवासअनमादिर्येषां तैः व्रतैः । अहश्च निशा च अहर्निशम् । समाहारे द्वन्द्वैकवद्भावः । अत्यन्तसंयोगे द्वितीया । ग्लपयन्ती कर्शयन्ती सा पार्वती कठिनैः । क्लेशसहैरित्यर्थः । शरीरैरुपार्जितं संपादितं तपस्विनां ऋषीणां तपः दूरं अत्यन्तं अधश्चकार । अतिशिश्ये इत्यर्थः । तपस्विभिरप्येवं तपः कर्त्तुं न शक्यत इति तात्पर्यार्थः ॥ २९ ॥

Prose Order .—एवमादिभिर्व्रतैः मृणालिकापेलवं स्वं अङ्गं अहर्निशं ग्लपयन्ती सा तपस्विनां कठिनैः शरीरैः उपार्जितं तपः दूरं अधः चकार ॥ २९ ॥

NOTES —एवमादिभिः—एव आदिः येषां ते एवमादयस्तैः एवमादिभिः by this and others एव refers to 'sitting amidst five fires, living only on water, sitting in an unsheltered place in the rainy season' etc., i. e, the kinds of penances mentioned in the previous verses. व्रतैः—नियमैः by austerities. मृणालिकापेलवं-मृणालिकामिव (विसतन्तुमिव) पेलवं (कोमलं as delicate as a lotus-fibre. अहर्निशं—अहश्च निशा च अहर्निशं day and night It is a समाहार द्वन्द्व compound (which implies an aggregate or the things enumerated in which constitute a complex idea) It is always singular and neuter. ग्लपयन्ती—(√ग्लै+णिच्+शतृ) causal (णिजन्त) present part. of √ग्लै 'to be weary' श्रान्तिं नयन्ती wearing तपस्विनां—(तपस्+विनिः) मुनीनां of other ascetics उपार्जितं (उप+√अर्ज्+क्तः) संपादितं, सञ्चित lit acquired, practised. दूर—अत्यर्थं distant, far, far away It is an adverb to अधश्चकार—तिरश्चकार made low i e, excelled or surpassed Even with her delicate frame Parvati performed such penances as were very much superior to those practised by other ascetics possessed of hard bodies 29

CHANGE OF VOICE.—एवमादिभिः व्रतैः मृणालिकापेलवं स्वं अङ्गं अहर्निशं ग्लपयन्त्या तया तपस्विनां कठिनैः शरीरैः उपार्जितं तपः दूरं अधः चक्रे ॥ २९ ॥

HINDI TRANSLATION :—इस प्रकार के (कठोर) नियमों से, बिस-तन्तुओं के समान कोमल अपने शरीर को रात दिन

थकाती हुई उसने (अन्य) तपस्वियों के कठोर शरीरों से किये हुये तप को बहुत अधिक नीचा कर दिया (अर्थात् उससे कहीं बढ़कर तपस्या की) ॥ २६ ॥

ENGLISH TRANSLATION.—By this and other kinds of penances, she, day and night wearing her body, delicate as a lotus-fibre, left far behind the penance practised by ascetics with hardened bodies 29

PURPORT IN SANSKRIT:—पूर्वोक्तप्रकारैरन्यैश्च कठिननियमपालनैः विसतन्तुवत्कोमलं स्वकीयं देहं रात्रिंदिवं कृशतां नयन्ती पार्वती स्वकोमलशरीरेणैवान्यतपस्विभिस्तेषां कठोरदेहैः कृतात् तपसो विशेषतरं तपश्चकार। यद्यपि तस्याः देहो मृदुरासीत् परं तस्यास्तपस्यान्येषां तपस्विनां तपांस्यतिशेते स्म इति तात्पर्यार्थः ॥ २६ ॥

After the 29th shloka some books have the following verse, but Mallinatha regards it as an interpolated one and has not commented on it.

'सुराः समुद्वीक्ष्य नगेन्द्रकन्यया कृतं तपः शंभुवशक्रियाक्षमम्।
ययाचिरे तं प्रणिपत्य दुःखिताः पतिं चमूनां सुतमाजिहेतुम् ॥'

But the 27th shloka of the VI canto, which runs as following, and which is a speech of Shiva refers to this sort of request made by gods to Shiva.

'सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः।
अरिविप्रकृतैर्देवैः प्रसूतिं प्रति याचितः ॥'

अथाजिनाषाढधरः प्रगल्भवाग्-
ज्वलन्निव ब्रह्ममयेन तेजसा।

विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥ ३० ॥

अथेति। अथ अनन्तरं अजिनाषाढधरः अजिनं कृष्णमृगत्वक् आषाढः प्रयोजनमस्येत्याषाढः पालाशदण्डः। 'पालाशो दण्ड आषाढः' इत्यमरः 'विशाखाषाढादण्मन्थदण्डयोः' इत्यणप्रत्ययः। तयोर्धरस्तथोक्तः। प्रगल्भवाक् प्रौढवचनः, ब्रह्ममयेन वैदिकेन तेजसा। ब्रह्मवर्चसेनेत्यर्थः। ज्वलन् इव स्थितः। इवशब्दो निर्धारणार्थः। कश्चिद् अनिर्दिष्टः जटिलः जटावान्। ब्रह्मचारीति शेषः पिच्छादित्वादिलच्प्रत्ययः। शरीरबद्धः बद्धशरीरः। शरीरवानित्यर्थः। आहिताग्न्यादिषु पाठात्साधुः। प्रथमाश्रमः यथा ब्रह्मचर्याश्रम इव। यथाशब्द इवार्थे। तपोवनम्। देव्या इति शेषः। विवेश प्रविष्टवान् ॥ ३० ॥

PROSE ORDER :—अथ अजिनाषाढधरः प्रगल्भवाग् ब्रह्ममयेन तेजसा ज्वलन्निव कश्चिज्जटिलः शरीरबद्धः प्रथमाश्रमः यथातपोवन विवेश ॥ ३० ॥

NOTES :—अथ—तदनन्तरम्, after this, *i e.*, when Parvati had been successful in performing such penance as was far superior to that of other ascetics. अथ is used to iutroduce a new topic 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यमरः। अजिनाषाढधरः। अजिनंकृष्णमृगचर्म a black antelope's skin. 'अजिनं कृत्तिः चर्म' इत्यमरः। आषाढः—(अषाढ+अण्) पलाशदण्डः a staff of Palasha tree. 'पालाशो दण्ड आषाढः' इत्यमरः। It is so called because it is carried by an ascetic during certain religious observances in the month of अषाढ। The

suffix षण् is added by ' विशाखाषाढादण् मन्थदण्डयोः ' पा० ५ १. १००. धरः—(√धृ + अच्) wearing or putting on अजिनं च आषाढश्च अजिनाषाढौ, तयोर्धरः अजिनाषाढधर. wearing a black antelope's skin and holding a staff of Palasha This person who came to the hermitage of Parvati was none but Shiva himself. To avoid cognizance he had come disguised as a Brahmana ascetic belonging to Brahmachary-ashrama. अजिन and पलाशदण्ड are prescribed for the use of Brahmana ascetics. *Cf.* ' हारिणमैणेयं वा कार्ष्णं वा ब्राह्मणस्य ' आपस्तम्बः । ' ब्राह्मणो बैल्वपालाशौ ' मनु० । प्रगल्भवाक्-प्रगल्भा वाग् यस्य सः speaking confidently or proudly Here it is used in good sense, hence, eloquent in speech or who could speak well ब्रह्मयेन—(ब्रह्म + मयट्) ब्रह्मण आगतम् formed or consisting of or identified with Brahma Belonging to or fit for a Brahmana Here ब्रह्म means the Veda or simply Brahma मयट् is added by ' मयट् च ' पा० ४ ३ ८२ । Generally मयट् is added in the sense of 'consisting of' but, here, it means ' coming from ' तेजसा—कान्त्या by the lustre ब्रह्मयेन तेजसा—ब्रह्मवर्चसेन divine glory or splendour ; pre eminence in holiness or sacred knowledge, superhuman power The power and glory of Brahma ; the glory supposed to surround a Brahmana ज्वलन् इव-दीप्यमान इव as if burning with. जटिलः—(जटा + इलच) जटाः सन्ति अस्य इति जटिलः putting on matted hair This is also a mark

of a Brahmacharin. *Cf* ' मुण्डो वा जटिलो वा स्यादथ वा स्याच्छिखाधरः ' मनु० । शरीरबद्धः—शरीरेण बद्ध शरीरबद्धः, or, शरीरं बद्धं यस्य स शरीरबद्धः (मूर्तिमान्) in bodily form बद्ध may be used either as first or the second member of a Bahuvrihi compound. ' वाहिताग्न्यादिषु ' पा० २ ३ ३७ । The other form shall be बद्धशरीरः । प्रथमाश्रम —प्रथमश्चासौ आश्रमः प्रथमाश्रमः (ब्रह्मचर्याश्रमः) the first stage of life The four stages of life according to scriptures are ब्रह्मचर्य, गृहस्थ, वानप्रस्थ and संन्यास । यथा —इव like. तपोवनम्—तपस वनम् the penance-forest विवेश—(√विश्+लिट्) entered

For the contents of verse, *Cf* ' तपोविपाककाले तां जिज्ञासुर्भगवान् शिवः । ब्रह्मचर्यव्रतधरो विवेश तपसोऽचलम् । अजिनाषाढधारी च प्रगल्भवचनो मुने । ज्वलन्निव जटाधारी ब्रह्मज्ञा ब्रह्मतेजसा ' ॥ शिवपुराणम् ॥ ३० ॥

CHANGE OF VOICE :—अथ अजिनाषाढधरेण प्रगल्भवाचा ब्रह्ममयेन तेजसा ज्वलता इव केनचित् जटिलेन शरीरबद्धेन प्रथमाश्रमेण यथा तपोवनं विविशे ॥ ३० ॥

HINDI TRANSLATION :—तदनन्तर, काले हरिण के चर्म तथा पलाश के दण्ड को धारण किये हुए, बोलने में चतुर, ब्रह्मवर्चस से प्रज्वलित सा, कोई जटाधारी (मुनि) शरीरधारी ब्रह्मचर्याश्रम के समान (उस) तपोवन में आया ॥ ३० ॥

ENGLISH TRANSLATION —Then a certain (ascetic) one with matted hair, wearing an antelope's skin and holding a staff of Palasha, eloquent in speech, burning, as it were, with Brahmanic lustre, like the first stage of life incarnate entered the penance-forest 30.

PURPORT IN SANSKRIT :—यदा हि पार्वती एवं कठिनतपोमग्नासीत् तस्या आश्रमम् एकोऽविज्ञातः पुरुषः समायातः, यो हि हरिणचर्मपलाशदण्डञ्च धत्ते स्म, भाषणे पटुर्ब्रह्मवर्चसेन भासमानश्चासीत्, यश्च जटाधारी देहेन च मूर्त्तिमान् ब्रह्मचर्याश्रम इवाभूत् ॥ ३० ॥

तमातिथेयी बहुमानपूर्वया
सपर्य्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ ३१ ॥

तमिति । अतिथिषु साध्वी आतिथेयी । 'पथ्यतिथि' इत्यादिना ढञ्प्रत्ययः । 'टिड्ढाणञ्' इत्यादिना ङीप् । पार्वती त ब्रह्मचारिणं बहुमानपूर्वया बहुमानः पूर्वो यस्यास्तस्या, गौरवपूर्वयेत्यर्थः । सपर्यया अर्चया । 'सपर्यार्चार्हणाः समाः' इत्यमरः । प्रत्युदियाय प्रत्युज्जगाम । कथं समानेऽपि तस्यास्तादृशी प्रतिपत्तिरत आह—साम्ये सति अपि निविष्टचेतसां स्थिरचित्तानां वपुर्विशेषेषु व्यक्तिविशेषेषु अतिशयित गौरवं यासु ताः अतिगौरवाः अतिगौरवसहिताः क्रियाः चेष्टाः भवन्ति । प्रवर्त्तन्ते इत्यर्थ । साधवो न साम्याभिनिवेशिन इति भावः ॥ ३१ ॥

PROSE ORDER :—आतिथेयी पार्वती तं बहुमानपूर्वया सपर्यया प्रत्युदियाय, साम्ये निविष्टचेतसा मपिवपुर्विशेषेषु अतिगौरवाः क्रियाः भवन्ति ॥ ३१ ॥

NOTES :—आतिथेयी—(अतिथि+एय (ढञ)+ई अतिथिषु साध्वी इति (अतिथिसत्कारचतुरा) attentive to guests, hospitable. The suffix ढञ् is added by

सतिस्वपनेर्ढञ्' पा० ४ ४ १०४। and then ङीप् is added to make it feminine by टिड्ढाणञ्द्वयसच्' पा० ४.१.१५। The masc form is आतिथेयः। बहुमानपूर्वया—बहुः मानः (सत्कारः) पूर्वो यस्याः सा, तया बहुमानपूर्वया which was preceded or accompanied by great reverence सपर्यया-पूजया worship, homage पूजा नमस्या अपचितिः सपर्या अर्चा अर्हणाःसमा' इत्यमरः। प्रत्युद्ययाय—(प्रति +√उत्+इ +लिट्)प्रत्युज्जगाम went forth to receive (him). √इ to go, is conjugated as—एति (लट्), एष्यति (लृट्), इयाय (लिट्) अगात् (लुङ्) etc. साम्ये—(सम+ष्यञ् समस्य भाव साम्यं, तस्मिन् (समतायाम् towards equality. निविष्टचेतसां—(नि+√विश्+क्त) निविष्टं चेतो येषा ते, तेषा whose mind is intent upon or turned to (equality). The expression साम्येऽपि निविष्टचेतसां' can be construed in two ways, *viz*, साम्ये निविष्टचेतसां अपि *i. e*, even in case of those whose minds are set on equality—who look at all people with the same mind without feeling affection for one and apathy for another, or who are free from likes (राग) and dislikes (द्वेष); secondly साम्येऽपि निविष्टचेतसां क्रियाः......*i e* even when there is equality, the acts of those who are firm-minded... .. In the former case निविष्टचेतसां is to be taken with साम्ये while in the latter it has nothing to do with साम्ये, but is connected with the following words. Then the position of अपि is also responsible for change of meaning. In the former it is read with

निविष्टचेतसां and in the latter with साम्ये । वपुर्विशेषेषु—वपुष्षु (शरीरेषु विशेषा इति वपुर्विशेषा., तेषु—असामान्यशरीरेषु towards great personages Here वपु 'a body', means 'one possessed of a body वपुष्मान्) i. e., a person.' Decline वपुष् as—वपुः, वपुषी वपूंषि etc अति गौरवाः—(गुरु+अण्) गुरोः भाव गौरवं (आदर) अति गौरवं यासु ताः full of extreme reverence क्रियाः—acts ; behaviour. The sense is that even those persons who are free from likes and dislikes show greater respect towards great personages For a similar idea *Cf.* 'आकृतिविशेषेष्वादरः पदं करोति' मालविकाग्निमित्रम् । 31.

Change of Voice :—आतिथेय्या पार्वत्या स बहुमानपूर्वया प्रत्युदीये साम्ये निविष्टचेतसां अपि वपुर्विशेषेषु अतिगौरवाभिः क्रियाभिः भूयते ॥ ३१ ॥

Hindi Translation :—अतिथि सत्कार करने में चतुर पार्वती अत्यधिक आदरयुक्त पूजा के साथ उसकी ओर बढ़ी । समता में लगे चित्त वालो के (अर्थात् सब को समान दृष्टि से देखने वालों के) भी कार्य विशेष व्यक्तियों के लिये अधिक आदरयुक्त होते हैं ॥ ३१ ॥

English Translation —Parvati, expert in hospitality, went forth to receive him, doing worship with great reverence ; the acts, even of those persons who have set their hearts on equality, are full of extreme reverence towards great personages 31

Purport in Sanskrit :—अतिथिसत्कारनिपुणा पार्वती तस्य सत्कारार्थं तं प्रत्युज्जगाम तं सादरं पूजितवती च । कथं हि

रागद्वेषविनिर्मुक्तया तपस्विन्या पार्वत्या तं प्रत्यादरः प्रदर्शित इति शङ्कायां कविः कथयति यत् समदर्शिनो जना अपि पुरुषविशेषेष्वधिकादरवन्तो भवन्ति ॥ ३१ ॥

विधिप्रयुक्तां परिगृह्य सत्क्रियां
परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा
प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ ३२ ॥

विधीति । स ब्रह्मचारी विधिप्रयुक्तां विधिना प्रयुक्तामनुष्ठितां सत्क्रियां पूजां परिगृह्य स्वीकृत्य क्षणं परिश्रमं विश्रामं च विनीय नाम । नामेत्यपरमार्थे । अथ उमां ऋजुना एव विलासरहितेनैव चक्षुषा पश्यन् अनुज्झितक्रमः अत्यक्तोचितपरिपाटीकः सन् वक्तुं प्रचक्रमे प्रारेभे ॥ ३२ ॥

Prose Order—स विधिप्रयुक्तां सत्क्रियां परिगृह्य क्षणं परिश्रमं विनीय च नाम उमां ऋजुना एव चक्षुषा पश्यन् अनुज्झितक्रमः (सन्) वक्तुं प्रचक्रमे ॥ ३२ ॥

Notes—विधिप्रयुक्तां--विधिना प्रयुक्ता विधिप्रयुक्ता, ताम् यथाविधि कृतां done according to proper rites सत्क्रियां —सत् क्रिया सत्क्रिया, तां worship. Here सत् is used as a preposition according to the rule 'आदरानादरयोः सदसती' पा० १ ४ ६३ । and the compound is made by 'कुगति प्रादयः,' पा० २ २.१८ । परिगृह्य—(परि+√ग्रह्+ल्यप्) स्वीकृत्य having accepted. क्षणं—for a little while. विनीय —(वि+√नी+ल्यप्) अपनीय having removed. नाम—अपरमार्थे only in appearance It is an indeclinable used in various senses Here it has been used in the

sense of 'apparently' i. e, although not really fatigued he showed that he took rest. Shiva, in order to avoid cognizance, had to act as an ordinary man. ऋजुना—सरलेन simple ; not betraying any particular inner feeling. अनुज्झितक्रमः—(न+√उज्झ्+क्तः) न (त्यक्तः) क्रमः (उचिताचारः) येन सः who did not give up propriety. क्रम् means the regular order or course. प्रचक्रमे—(प्र+√क्रम्+लिट्) began √क्रम् when not preceded by a preposition is conjugated in both the Padas, but it is used in Atmanepadi when preceded by प्र and उप and the sense is of 'beginning' by 'प्रोपाभ्यां समर्थाभ्याम्' पा० १.३.४२ । प्रक्रामति means 'he goes' and उपक्रामति 'he comes near.' 32.

CHANGE OF VOICE :—तेन विधिप्रयुक्तां सत्क्रियां परिगृह्य क्षणं परिश्रमं विनीय च नाम उमां ऋजुना एव चक्षुषा पश्यता अनुज्झितक्रमेण वक्तुं प्रचक्रमे ॥ ३२ ॥

HINDI TRANSLATION :—उसने यथाविधि की हुई सेवा को स्वीकार कर तथा क्षण भर के लिये थकावट को दूर सा कर के, पार्वती की ओर सीधीसादी दृष्टि से ही देखते हुए, (व्यवहार के) उचित मार्ग को न छोड़ते हुए, कहना प्रारम्भ किया ॥ ३२ ॥

ENGLISH TRANSLATION :—Having accepted the worship offered according to proper rites, and having apparently eased his fatigue for a moment, he, looking at Uma with quite simple eyes and without giving up propriety, began to speak 32

PURPORT IN SANSKRIT :—सोऽतिथिर्यथाविधि कृतां पार्वत्याः पूजां स्वीकृत्य, किञ्चित्कालञ्च श्रममपनीय, पार्वतीं रागादिरहितेनैव निर्दोषेण नेत्रेणावलोकयन् सदाचारपरिपाटीमनुल्लंघयन् कथयितुमारेभे ॥ ३२ ॥

अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्त्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥ ३३ ॥

अपीति । अत्रापि शब्दः प्रश्ने । क्रियार्थं होमादिकर्मानुष्ठानार्थम् । समिधश्च कुशाश्च समित्कुशम् । 'जातिरप्राणिनाम्' इति द्वन्द्वैकवद्भावः । सुलभं अपि सुलभं कच्चित् । जलानि ते तव स्नानविधिक्षमाणि स्नानक्रियायोग्यानि अपि कच्चित् । किञ्च स्वशक्त्या निजसामर्थ्यानुसारेण तपसि प्रवर्त्तसे अपि । देहमपीडयित्वा तपश्चरसि कच्चिदित्यर्थः । युक्तं च नामैतत् । खलु यस्मात् शरीरं आद्यं धर्मसाधनम् । धर्मस्तु कायेन वाचा बुद्ध्या धनादिना च बहुभिः साध्यते । तेषु च वपुरेव मुख्यं साधनम् । सति देहे धर्मार्थकाममोक्षलक्षणाश्चतुर्वर्गाः साध्यन्ते । अतएव 'सततमात्मानमेव गोपायीत' इति श्रुतिः । 'अयथाबलमारम्भो निदानं क्षयसंपदाम्' इति भावः ॥ ३३ ॥

PROSE ORDER :—अपि क्रियार्थं समित्कुशं सुलभम् ? अपि जलानि ते स्नानविधिक्षमाणि ? अपि स्वशक्त्या तपसि प्रवर्त्तसे ? खलु शरीरं आद्यं धर्मसाधनम् (अस्ति) ॥ ३३ ॥

NOTES :—अपि—कच्चित् It is used here in the sense of interrogation. For its various senses *Cf.* 'गर्हास-

मुच्चयप्रश्नशङ्कासंभावनासु अपि ' इत्यमरः। क्रियार्थे—क्रियायै इदं क्रियार्थं (होमादिकर्मकरणार्थम्) for performing holy rites In क्रियार्थे the compound is नित्यसमास, which is defined as ' अविग्रहो नित्यसमासः अस्वपदविग्रहो वा ' *i. e.*, Nityasamasa is that which either cannot be expounded or canno t be expounded by using the words actually compounded. Here क्रियार्थे is expounded by using क्रिया and इदं and not क्रिया and अर्थ which (latter) are actually compounded. The compound with अर्थ is a Nityasamasa and takes the gender and number of the noun it qualifies. समित्कुशम्—समिधश्च कुशाश्च समित्कुशम् Sacrificial sticks and Kusha grass. It is a Dwandwa compound and the singular is used by the rule ' जातिरप्राणिनाम् ' पा० २.४ ६ । *i. e*, of words expressing things and not animals when the species is prominently referred to the compound is in singular. सुलभम्—(सु+√लभ्+खल्) easy to obtain The suffix खल् is added by ' ईषद्दुःसुषु कृच्छ्राकृच्छार्थेषु खल् ' पा० ३ ३ १२६ । *i. e*, खल् is added to any root with ईषत्, दुर् or सु prefixed to it when the idea of ease or difficulty is present, *e g*, सुकरः, दुष्करः। स्नानविधिक्षमाणि—स्नानस्य विधये क्षमाणि (योग्यानि) स्नानविधिक्षमाणि suitable for bathing. स्वशक्त्या—स्वसामर्थ्यानुसारेण according to your might. खलु—verily आद्यम्—प्रथमं the chief धर्मसाधनम्—धर्मस्य साधनम् means of performing the religious duties. ' शरीरमाद्यं खलु धर्मसाधनम् ' is a

well-known proverbial saying and it means that body is the chief means of performing the religious duties, hence one should take greatest possible care of it

CHANGE OF VOICE :—अपि क्रियार्थं समित्कुशेन सुलभेन (भूयते)? अपि जलैः ते स्नानविधिक्षमैः (भूयते)? अपि (त्वया) स्वशक्त्या तपसि प्रवृत्यते? खलु शरीरेण आद्येन धर्मसाधनेन (भूयते) ॥ ३३ ॥

HINDI TRANSLATION :—(यज्ञादि) धार्मिक कृत्यों के लिये समिधायें और कुश तो सरलता से प्राप्त हो जाते हैं? पानी तो तुम्हारे स्नान के लिये उपयुक्त है? और अपनी सामर्थ्य के अनुसार ही तप करती हो न? क्योंकि शरीर वास्तव में धार्मिक कृत्यों के करने में मुख्य सहायक है ॥ ३३ ॥

ENGLISH TRANSLATION —'Are sacrificial sticks and Kusha grass easily available for holy rites? Is the water suitable for thy bathing? And, dost thou practise austerities in accordance with thy strength? For, the body is the chief means of performing reilgious duties' 33

PURPORT IN SANSKRIT :—ब्रह्मचारिवेषधारी शिवः पार्वती तत्कुशलं तपःसहायकवस्तूनां सुलभतां प्रति च पृच्छति—'किं त्वया होमादिधार्मिककृत्यकरणार्थं यज्ञकाष्ठानि दर्भाश्च सुखेन लभ्यन्ते? इतस्ततः पर्वतनिर्झरेषु नदीषु च प्राप्यं जलं किं ते स्नानयोग्यमस्ति? किं त्वं स्वसामर्थ्यानुसारेणैव तपस्यामाचरसि न तु शरीरमत्यन्तं पीडयित्वा, यतो देहो धर्माचरणे प्रधानसहाय-

कोऽस्ति ? त्वया स्वास्थ्यमनादृत्य तपो न करणीयमिति भावः ' ॥ ३३ ॥

अपि त्वदावर्जितवारिसंभृत
प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा ॥ ३४ ॥

अपीति । त्वदावर्जितवारिसंभृतं त्वयावर्जितेन सिक्तेन वारिणा संभृतं जनित आसां वीरुधां लतानां प्रवालं पल्लवं अनुबन्धि अपि अनुस्यूतं किम् । यत् प्रवालं चिरोज्झितश्चिरकालत्यक्तो लाक्षारागो येन तत्तथापि पाटलम् । स्वभावरक्तमित्यर्थः । तेन चिरोज्झितालक्तकपाटलेन ते तव दन्तवाससा अधरेण । ' ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ' इत्यमरः । तुलां साम्यं आरोहति । गच्छतीत्यर्थः । अत्र तुलाशब्दस्य सादृश्यवाचित्वात्तद्योगेऽपि ' तुल्यार्थैरतुलोपमाभ्याम् ' इति न तृतीयाप्रतिषेधः तत्र सूत्रे सदृशवाचिन एव ग्रहणादिति ॥ ३४ ॥

PROSE ORDER:—अपि त्वदावर्जितवारिसंभृतं आसां वीरुधां प्रवालं अनुबन्धि (अस्ति) यत् चिरोज्झितालक्तकपाटलेन ते दन्तवाससा तुलां आरोहति ॥ ३४ ॥

NOTES —त्वदावर्जितवारिसंभृतम् । आवर्जितं—(आ + √वृज् + क्तः) सिक्तम् sprinkled. √वृज् ' to avoid, ' here with आ means ' to sprinkle ' संभृतम्—(सं + √भृञ् + क्तः) Nourished, reared. त्वया आवर्जितेन वारिणा संभृतं reared by water sprinkled by you. त्वत् is formed by changing युष्म of युष्मत् into त्व by ' प्रत्ययोत्तरपदयोश्च ' पा० ७ २ ९८ । वीरुधाम्—लतानाम् of creepers The word

वीरुध् (वि + √रुह् + क्विप्) is formed by changing the ह् of √रुह् to ध् and lengthening वि irregularly. It is feminine and is declined as वीरुत्, वीरुधौ, वीरुधः । वीरुधं, वीरुधौ, वीरुधः । etc For meaning *Cf.* 'लता प्रतानिनी वीरुद्' इत्यमरः । प्रवालं—नूतनपल्लवं fresh or young leaves. Singular is used for the class 'प्रवालो विद्रुमे वीणादण्डेऽभिनवपल्लवे' इत्यमरः । अनुबन्धि—(अनुबन्ध + इनिः) अविच्छिन्नं continuous *i e*, coming out without a break. 'सम्बन्धे संततासक्तावनुबन्धः प्रकीर्तितः' इति भोजः । Being an adjective of प्रवाल it is neuter gender and will be declined as अनुबन्धि, अनुबन्धिनी, अनुबन्धीनि etc. The suffix इनिः is added by 'अत इनिठनौ' पा० ५ २ ११५ । After it अस्ति is understood चिरोज्झितालक्तकपाटलेन । अलक्तकः—लाक्षारसः red lac, lac dye. चिराद् उज्झितः अलक्तको येन (बहुव्रीहिः) तथाभूतमपि पाटलम् (रक्तं), तेन red though long bereft of lac dye Adjective of दन्तवाससा—दन्तानां वासः, तेन (अधरेण) covering for the teeth *i e* lip. In दन्तवाससा the Instrumental is against the rule 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' पा० २ ३.७२ । which means that in the case of words denoting equality or likeness, such as तुल्य, सदृश etc., the person or thing with whom or which any object is compared is put in the Genitive or Instrumental case, except in the case of तुला and उपमा (with which only the Genitive case is used). But Mallinatha defends this by saying that here the word तुला is

सादृश्य (noun) वाची and not सदृश (adjective) वाची The rule prohibits the use of the Instrumental only when the word तुला is सदृशवाची, hence it could be used here. *Cf* ' अत्र तुलाशब्दस्य .. ..ग्रहणादिति, ' the last three lines of Mallinatha's commentary. Another annotator of the rule also has expressed the same view—" ' अतुलोपमाभ्याम् ' इति तुला शब्दयोगे तृतीयानिषेधस्तु सदृशार्थकतुलाशब्दयोगे एव, इह तुलाशब्दः सादृश्यवाचीति न प्रवर्तत " इति। Bhoja also takes the same view *Cf* ' सदृशपदार्थवाची सादृश्यमात्रवाची चेति द्वौ तुलाशब्दौ। सादृश्यमात्रवाचकतुलाशब्दयोगे तु तृतीयाऽपीष्यत एव। ' Some commentators defend this by supplying सह after दन्तवाससा। तुलां—साम्यम् equality, similarity आरोहति —प्राप्नोति becomes, rises up to.

As Parvati was very fond of small plants, which she loved like her sons, the inquiry into their well-being is quite appropriate 34

CHANGE OF VOICE —अपि त्वदावर्जितवारिसंभृतेन आसां वीरुधां प्रवालेन अनुबन्धिना (भूयते), येन चिरोज्झितालक्तकपाटलेन ते दन्तवाससा तुला आरुह्यते ॥ ३४ ॥

HINDI TRANSLATION :—तुम्हारे द्वारा दिये पानी से बढ़े हुए इन बेलों के पत्ते लगातार तो निकलते रहते हैं ? जो (पत्ते) तुम्हारे इस ओठ के समान हैं, जो कि दीर्घकाल से लाख के रंग के (उपयोग के) छूट जाने पर भी लाल हैं ॥ ३४ ॥

ENGLISH TRANSLATION —Are the young leaves of these creepers, made to grow by the water sprinkled

by thee, continuous ?—the leaves which are similar to the lip, which is red though long bereft of red lac 34

PURPORT IN SANSKRIT :—अथ पार्वत्या स्वयं सिञ्चितानां वृत्ताणां विषये पृच्छति—' किं त्वया सिच्यमाना एता लता निरन्तरं नूतनपल्लवान्युत्पादयन्ति, यानि नूतनपल्लवानि रक्तवर्ण- त्वात् चिरात्यक्तलाक्षारसोपयोगेनापि स्वभावरक्तेन त्वदीयाधरेण साम्य दर्शयन्ति ? शिवः पार्वत्या अधरः स्वभावेनैव रक्त इति चाटूक्त्या पार्वतीरूप प्रशंसति ॥ ३४ ॥

अपि प्रसन्नं हरिणेषु ते मनः
करस्थदर्भप्रणयापहारिषु ।
य उत्पलाक्षि प्रचलैर्विलोचनै-
स्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥ ३५ ॥

अपीति । करस्थदर्भप्रणयापहारिषु करस्थान्दर्भान्प्रणयेन स्नेहेनापहरन्तीति ते तथोक्तेषु सापराधेष्विति भावः । ' करस्थ- दर्भप्रणयापराधिषु ' इति पाठे दर्भाणां प्रणयेन प्रार्थनयापराधिषु । हरिणेषु विषये ते मनः प्रसन्नं अपि । न क्षुभितं किम् । साप- राधेष्वपि न कोपितव्यं तपस्विभिरिति भावः । हे उत्पलाक्षि ये हरिणाः प्रचलैः चञ्चलैः विलोचनैः नेत्रैः तवाक्षिसादृश्यं प्रयुञ्जते इव अभिनयन्तीव । प्रसन्नत्वान्मृगनेत्राणि त्वन्नयनाभ्यां साम्य- मुपयान्तीति भावः । ' उत्पलक्षेपचलैः ' इति पाठान्तरे उत्पल- कम्पचले । भावानयने द्रव्यानयनमिति न्यायेन क्षिप्यमाणोत्पल- चलैरित्यर्थ ॥ ३५ ॥

PROSE ORDER :—करस्थदर्भप्रणयापहारिषु हरिणेषु ते मनः अपि प्रसन्नम् ? (हे) उत्पलाक्षि । ये प्रचलैः विलोचनैः तव अक्षिसादृश्यं प्रयुञ्जते इव ॥ ३५ ॥

NOTES :—करस्थदर्भप्रणयापहारिषु । करस्थ —(कर + √स्था + कः) करे तिष्ठतीति करस्थ । अपहारी—(अप + √हृ + णिनिः) अपहर्तुं शील यस्य सः one who takes away करस्थान् दर्भान् (कुशान्) प्रणयेन (स्नेहेन) अपहरन्ति (गृह्णन्ति) इति करस्थदर्भप्रणयापहारिणः तेषु who take the Kusha grass held in hand through their love (for you) Some books read अपराधिषु for अपहारिषु There the meaning is ' who are guilty of seeking the Kusha grass lying in your hand. ' हरिणेषु— towards the deer. प्रसन्नम् -pleased उत्पलाक्षि—उत्पले (कमले) इव अक्षिणी (नेत्रे) यस्याः सा उत्पलाक्षी, तस्याः सम्बोधने उत्पलाक्षि, उत्पल + अक्षि + षच् + ङीप् O lotus-eyed one प्रचलैः—प्रकर्षेण चलैः (अतिचञ्चलैः) very much unsteady. अक्षिसादृश्य—सदृशस्य भावः सादृश्यं (सदृश् + ष्यञ्) resemblance. प्रयुञ्जते—कुर्वन्ति ; अभिनयन्ति make ; present √युज् ' to unite ' is conjugated as युनक्ति or युङ्क्ते, युञ्जाते, युञ्जते (लट्) युयोज युयुजे (लिट्) योक्ष्यति or योक्ष्यते (लृट्) अयुजन् , अयौक्षीत् or अयुक्त (लुङ्) etc when preceded by प्र or उप it means ' to perform ; to do , to represent on the stage ' etc and is used in Atmanepada only *Cf.* ' प्रोपाभ्यां युजेरयज्ञपात्रेषु ' पा० १ ३ ६४ । Some editions read ' उत्पलाक्षेपचलैः ' in place of ' उत्पलाक्षिप्रचलै. In that case the meaning will be ' which are unsteady like lotuses tossed about ' (उत्पलानां आक्षेपः, तद्वत् चलैः) । For the idea *Cf.* Shloka 15 above. 35

CHANGE OF VOICE :—करस्थदर्भप्रणयापहारिषु हरिणेषु ते मनसा अपि प्रसन्नेन (भूयते) ? (हे) उत्पलाक्षि, यैः प्रचलैः विलोचनैः तव अक्षिसादृश्यं प्रयुज्यते इव ॥ ३५ ॥

HINDI TRANSLATION :—हाथ में पकड़े हुए कुशों को प्रेम के कारण ले जाने वाले मृगों की ओर से तुम्हारा मन प्रसन्न तो है ? जो (मृग), हे कमल के समान नेत्र वाली, अपने चञ्चल नेत्रों से तेरी आँखों की समता करते हैं ॥ ३५ ॥

ENGLISH TRANSLATION —Is thy mind pleased with the fawns, who take the Kusha grass in your hands out of love (for you), and who, O lotus-eyed one, present a resemblance to thy eyes by their unsteady eyes 35

PURPORT IN SANSKRIT :—' कच्चित्त्वयेषु मृगेषु प्रसन्ना तिष्ठसि, ये हि परिचयाधिक्येन ते हस्तधृतानपि कुशान् भक्षणार्थमाददति, ये च, हे कमलनेत्रे, तव नेत्रयोः सादृश्यं स्वनेत्रेष्वलभमानाः निजनेत्राणीतस्ततश्चालयन्तस्तव विलोचनयोः समतां कुर्वन्ति इव । ' वास्तवे तु हरिणानां नेत्राणि न पार्वतिनेत्रसमानि, परमितस्ततश्चालनेन तानि तत्समानि क्रियन्त इवेति भावः ॥ ३५ ॥

यदुच्यते पार्वति पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ।
तथा हि ते शीलमुदारदर्शने
तपस्विनामप्युपदेशतां गतम् ॥ ३६ ॥

यदिति । हे पार्वति रूपं सौम्याकृतिः पापवृत्तये पापाचरणाय न भवति । इति यदुच्यते । लोकैरिति शेषः । तद्वचः न व्यभिचरति

न स्खलतीति अव्यभिचारि सत्यम् । 'यत्राकृतिस्तत्र गुणाः' । 'न सुरूपा पापसमाचारा भवन्ति' इत्यादयो लोकवादाः न विसंवादमासादयन्तीत्यर्थः । किमिति ज्ञायते—तथा हि । हे उदारदर्शने आयताक्षि । सुरूपे इत्यर्थः । अथवा उन्नतज्ञाने । विवेकवतीत्यर्थः । ते तव शील सद्वृत्तम् 'शीलं स्वभावे सद्वृत्ते' इत्यमरः । तपस्विनामपि उपदिश्यते अनेनेत्युपदेशः प्रवर्त्तकं प्रमाणं तत्तां उपदेशतां गतं प्राप्तम् । मुनयोऽपि त्वां वीक्ष्य स्ववृत्ते प्रवर्त्तन्ते इति भावः ॥ ३६ ॥

Prose Order :—(हे) पार्वति रूपं पापवृत्तये न (भवति इति) यद् उच्यते, तद् वचः अव्यभिचारि ; तथा हि (हे) उदारदर्शने ! ते शीलं तपस्विनां अपि उपदेशतां गतम् ॥ ३६ ॥

Notes :—रूपं—सौन्दर्यं beauty पापवृत्तये—पापस्य वृत्तये (आचरणाय) पापवृत्तये for a sinful course of life The expression रूपं पापवृत्तये न means that beauty does not lead to a sinful course of life For similar idea *Cf* 'यत्राकृतिस्तत्र गुणाः वसन्ति ।' 'रूपं शीलानुसारि ।' and 'न ह्याकृतिः सुसदृशं विजहाति शीलम्' अव्यभिचारि—न व्यभिचरति इति अव्यभिचारि (वि+अभि+√चर्+णिनिः) सत्यम् not false, unfailing उदारदर्शने—उदारं (उत्कृष्टं) दर्शनं (रूपं) यस्याः सा, तस्याः सम्बुद्धौ उदारदर्शने (अति) सुन्दरि) O one of noble form Mallinath takes दर्शन in the sense of 'the eye', hence he has translated it by 'आयताक्षि' । शीलं—सदाचारः (good) conduct. तपस्विनां—(तपस्+विनिः) for the ascetics. The suffix विनिः is added by 'अस्मायामेधास्रजो विनिः' पा० ५.२.१२१ । Mark the force of अपि । Parvati's conduct was not

a guide only for ordinary people but for ascetics also. उपदेशतां—(उप + √दिश् + घञ् + ता) उपदिश्यते अनेन इति उपदेशः, तस्य भावः उपदेशता, तां the state of a precept or rule 36

CHANGE OF VOICE —(हे) पार्वति, रूपेण पापवृत्तये न (भूयते इति) यद् (जनाः) ब्रुवन्ति तेन वचसा अव्यभिचारिणा (भूयते), यथा हि (हे) उदारदर्शने, ते शीलेन तपस्विनां अपि उपदेशता गता ॥ ३६ ॥

HINDI TRANSLATION :—हे पार्वति, यह जो कहा जाता है कि सुन्दरता पापाचरण का कारण नहीं होती, सत्य है, क्योंकि हे सुन्दरि, तुम्हारा आचरण तपस्वियों को भी शिक्षा देने वाला है ॥ ३६ ॥

ENGLISH TRANSLATION .—O Parvati, the saying that beauty does not lead to a sinful course of life is not false, since, O thou of noble form, thy conduct has become as model even for the ascetics 36

PURPORT IN SANSKRIT :—' हे पार्वति ' ' न सौन्दर्यं पापस्य कारणम्, ' अथवा ' न सुरूपाः पापमाचरन्ति ' इति कथनं त्वां दृष्ट्वा मे सत्यमेव प्रतीयते, यतो यद्यपि त्वमत्यन्तं रूपवती तथापि तवाचरणमीदृशं यत्तपस्विभ्योऽपि शिक्षाप्रदमस्ति । तेऽपि तव चरित्रं दृष्ट्वा स्वानि चरित्राणि शोधयन्ति किमुत साधारण-जनाः ? ' ॥ ३६ ॥

विकीर्णसप्तर्षिबलिप्रहासिभि-
स्तथां न गाङ्गैः सलिलैर्दिवश्च्युतैः ।

यथा त्वदीयैश्चरितैरनाविलै-
महीधरः पावित एष सान्वयः ॥ ३७ ॥

विकीर्णेति । एष महीधरः हिमवान् । विकीर्णसप्तर्षिबलिप्रहासिभिः सप्त च ते ऋषयः । 'दिक्संख्ये संज्ञायाम्' इति समासः । विकीर्णैः पर्यस्तैः सप्तर्षीणां संबन्धिभिर्बलिभिः । पुष्पोपहारैः प्रहसन्ति तैः तथोक्तैः दिवः अन्तरिक्षात् च्युतैः गाङ्गैः सलिलैः तथा न पावितः । अनाविलैः अकलुषैः त्वदीयैः चरितैः यथा सान्वयः सपुत्रपौत्रः पावितः पवित्रीकृतः ॥ ३७ ॥

PROSE ORDER —एष महीधरः विकीर्णसप्तर्षिबलिप्रहासिभिः दिवः च्युतैः गाङ्गैः सलिलैः तथा न पावितः यथा अनाविलैः त्वदीयैः चरितैः सान्वयः (पावितः) ॥ ३७ ॥

NOTES —महीधरः—मह्याः (भूमेः) धरः महीधरः a mountain. धरः (धरतीति) is formed from √धृ 'to support' by adding कः by 'इगुपधज्ञाप्रीकिरः कः' पा० ३.१.१३५ । *i. e.* the roots having इ, ई, उ, ऊ, ऋ, ॠ, ऌ, or ॡ for their penultimate and ज्ञा, प्री and कृ take क in active voice विकीर्णसप्तर्षिबलिप्रहासिभिः । विकीर्ण—(वि √कॄ+क्त) पर्यस्त scattered See notes on विशीर्ण in the Verse 28 above. सप्तर्षयः—सप्त च ते ऋषयश्च सप्तर्षयः the seven Rishis The compound is Karmadharaya, by 'दिक्संख्ये संज्ञायाम्' पा० २.१.५१ । meaning that names of quarters and numerals form a Karmadharaya compound with any declinable word, but only when the whole compound is an appellation (संज्ञा) Here it is the proper name of a constellation of seven stars (Ursa

Major), named after seven sages Their names are—1 मरीचि 2 अङ्गिरस् 3 अत्रि 4 पुलस्त्य 5 पुलह 6 क्रतु and 7 वशिष्ठ । They reside in heaven and are often described as taking bath and offering flowers to the gods in the holy waters of the heavenly Ganges. *Cf* 'अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेमपद्माम् । प्रवर्तयामास किलानुसूया त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ।' रघुवंशम् १३.५१ । बलिः—पुष्पोपहारः an offering (of flowers). 'करोपहारयोः पुंसि बलिः' इत्यमरः । प्रहासिभिः (प्र+√हस्+णिनिः) प्रहसन्तीति *i e*, shining, resplendent The flowers of offerings on account of their white colour are poetically regarded as the smiles of the waters of the Ganges Some books read प्रभासिभिः and some others प्रवाहिभिः in place of प्रहासिभिः । The former will mean 'resplendent' and the latter 'carrying' विकीर्ण .. प्रहासिभिः—विकीर्णैः सप्तर्षीणां बलिभिः प्रहसन्तीति विकीर्णसप्तर्षिबलिप्रहासीनि, तैः which are resplendent (lit. laughing) with the offerings of flowers scattered by the seven sages दिवः—स्वर्गात् from the heaven. Ablative is used in the sense of अपादान (separation). The waters of the holy Ganges are described in mythological books as falling from the heaven च्युतैः—(√च्यु+क्तः) पतितैः dropped. The two adjectives—विकीर्णसप्तर्षिबलिप्रहासिभिः and दिवश्च्युतैः are meant to indicate the holy character of the waters of the Ganges. This makes the contrast more effective गाङ्गैः:—

(गङ्गा + अण्) गङ्गाया इमानि गाङ्गानि, तैः of the Ganges तथा—तेन प्रकारेण in that way ; so much. पावितः—(√पू to purify + क्त) Passive Past Participle. पवित्रीकृतः sanctified अनाविलैः—न आविलैः अनाविलैः not dirty , pure. Adjective of त्वदीयैः चरितैः It implies that Parvati's conduct is purer and more sanctifying than the waters of the Ganges The suggested figure of speech is व्यतिरेक, in which the standard of comparison is excelled by the thing compared त्वदीयैः—(युष्मद् + छ — ईय्) तव इमानि त्वदीयानि, तैः by your own The suffix छः is added to युष्मद् by 'वृद्धाच्छः' पा० ४.२.११४। and युष्म of युष्मद् is changed to त्व by 'प्रत्ययोत्तरपदयोश्च' पा० ७.२.९८। चरितैः—acts सान्वयः—अन्वयेन (कुटुम्बेन) सह इति सान्वयः with his family This verse contains a glowing tribute from Shiva for the righteous life of Parvati. 37.

CHANGE OF VOICE :—एतं महीधरं विकीर्णसप्तर्षिबलिप्रहासीनि दिवः च्युतानि गाङ्गानि सलिलानि तथा न पूतवन्ति, यथा अनाविलानि त्वदीयानि चरितानि सान्वयं (पूतवन्ति) ॥३७॥

HINDI TRANSLATION :—यह (हिमालय) पहाड़ सप्तर्षियों के द्वारा दिये हुए पुष्पों के उपहार से चमकते हुए, आकाश से गिरे हुए गङ्गा के पानी से उतना पवित्र न हुआ था, जितना तुम्हारे पवित्र आचरण ने इसे सकुटुम्ब पवित्र कर दिया है ॥ ३७ ॥

ENGLISH TRANSLATION —This mountain (the Himalaya) was not so sanctified by the waters of the Ganges, dropping from heaven and resplendent with

the offerings of flowers scattered by the seven sages as he together with his family has been by thy pure, acts 37

PURPORT IN SANSKRIT :—पार्वत्याश्चरित्रं प्रशंसन्पुनरप्याह —हिमालयस्य पृष्ठे स्वर्गात् गङ्गाप्रवाहः पतति, स च स्वर्गात्पतनेन सप्तर्षीणां पूजापहारपुष्पाणां संसर्गेण चातिशयेन पावनः। परमयं हिमालयो गङ्गायाः पवित्रजलैर्न तथा पवित्रीकृतो यथेदानीं तवाकलुषैश्चरित्रैः सकुटुम्बः पवित्रीकृतः। तव चरितानि पवित्रतायां तद्दाने च गङ्गाया जलान्यपि अतिशेरत इति भावः ॥ ३७ ॥

अनेन धर्मः सविशेषमद्य मे
त्रिवर्गसारः प्रतिभाति भाविनि।
त्वया मनोनिर्विषयार्थकामया
यदेक एव प्रतिगृह्य सेव्यते ॥ ३८ ॥

अनेनेति। हे भाविनि प्रशस्ताभिप्राये। अनेन कारणेन धर्मः सविशेषं सातिशयं अद्य मे। त्रिवर्गसारः त्रयाणां धर्मार्थकामानां वर्गस्त्रिवर्ग। 'त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः' इत्यमरः। तत्र सारः श्रेष्ठः प्रतिभाति। यत् यस्मात् कारणात् मनोनिर्विषयार्थकामया मनसो निर्विषयार्थकामौ यस्यास्तया त्वया एकः धर्मः एव प्रतिगृह्य स्वीकृत्य सेव्यते। यत्त्वयार्थकामौ विहाय धर्म एवावलम्बितः। अतः सर्वेषां न. स श्रेयानिति प्रतिपद्यत इत्यर्थः ॥ ३८ ॥

PROSE ORDER :—(हे) भाविनि अनेन अद्य मे धर्मः

सविशेषं त्रिवर्गसारः प्रतिभाति, यद् मनोनिर्विषयार्थकामया त्वया एक एव प्रतिगृह्य सेव्यते ॥ ३८ ॥

NOTES :—भाविनि—(भाव + इनिः + ङीप्) प्रशस्तः भावः अभिप्रायः) अस्या अस्तीति भाविनी, तस्याः सम्बोधने O one of excellent or noble thoughts Some books read भामिनि instead of भाविनि, which means a fortunate or passionate woman. This being out of place भाविनि is preferable to भामिनि । अनेन—by this, *i e.* by seeing your pure conduct सविशेषं—विशेषेण सह इति सविशेषम् particularly; pre-eminently It is an adverb to त्रिवर्गसारः प्रतिभाति । त्रिवर्गसारः—त्रयाणां वर्गाणां समाहारः त्रिवर्ग (धर्मार्थकामाः) (द्विगुसमास) त्रिवर्गे सारः त्रिवर्गसार the best of the group of the three, namely धर्म (righteousness) अर्थ (wealth) and काम (desire) त्रिवर्ग means the group of three things and it becomes चतुर्वर्ग if the fourth, namely मोक्ष (salvation), is added to it *Cf* 'त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः' इत्यमरः । These four things are, according to the Hindu scriptures, the objects to be acquired by human beings प्रतिभाति—ज्ञायते is known, appears √भा 'to shine' means 'to appear' when preceded by प्रति । मनोनिर्विषयार्थकामया । निर्विषयौ —निर्गतः विषयः ययोस्तौ which are not thought about, which are not the objects of मनसो निर्विषयौ अर्थः कामश्च (द्वन्द्वः) यस्याः सा मनोनिर्विषयार्थकामा, तया whose mind is entirely free from all thoughts about अर्थ and काम । Parvati leading the life of an ascetic paid no heed to

अर्थ and काम, but devoted herself solely to the acquisition of धर्म। एक एव—i e, धर्म एव। प्रतिगृह्य—(प्रति + √ग्रह् + ल्यप्) स्वीकृत्य having accepted or selected. सेव्यते —आश्रीयते is followed 38

CHANGE OF VOICE :—(हे) भाविनि, अनेन अद्य मे धर्मेण सविशेषं त्रिवर्गसारेण प्रतिभायते, यद् मनोनिर्विषयार्थकामा त्वं एकं एव प्रतिगृह्य सेवसे ॥ ३८ ॥

HINDI TRANSLATION :—हे श्रेष्ठ अभिप्राय वाली, इससे तो आज मुझे धर्म ही विशेषतया तीनों वस्तुओं (धर्म, अर्थ, काम) में श्रेष्ठ ज्ञात होता है, क्योंकि अर्थ और काम से रहित मन वाली तुम (उसी) एक को ग्रहण कर पालती हो ॥ ३८ ॥

ENGLISH TRANSLATION —O one of noble intentions, on account of this (thy conduct) Dharma strikes me pre-eminently as the best of the group of the three (viz., Dharma, Artha and Káma), since this only has been selected and followed by thee, whose mind is free from all thoughts of Artha (wealth) and Káma (desire) 38

PURPORT IN SANSKRIT :—हे श्रेष्ठाभिप्रायवति पार्वति ! यतस्त्वं बुद्धिमती धर्मार्थकामानां वर्गे अर्थकामावनादृत्य एकं धर्ममेव कल्याणकरं स्वीकृत्य पालयसि अतोऽहमद्य त्वदाचरणं दृष्ट्वा मन्ये यदेषां त्रयाणां समूहे धर्म एव श्रेष्ठतम , अर्थकामानुसारिणी च लोकानां प्रवृत्तिरनुचिता ॥ ३८ ॥

प्रयुक्तसत्कारविशेषमात्मना

न मां परं संप्रतिपत्तुमर्हसि ।

यतः सतां संनतगात्रि संगतं

मनीषिभिः साप्तपदीनमुच्यते ॥ ३९ ॥

संप्रति मनोरथं जिज्ञासुः प्रस्तौति । प्रयुक्तेति । आत्मना त्वया प्रयुक्तः कृतः सत्कारविशेषः पूजातिशयो यस्य तं प्रयुक्तसत्कारविशेषं मां परं अन्यं संप्रतिपत्तुं अवगन्तुं न अर्हसि । हे संनतगात्रि संनताङ्गि । ' अङ्गगात्रकण्ठेभ्यः ' इति वक्तव्यात् ङीप् । यतः कारणात् मनस ईषिभिः मनीषिभिः विद्वद्भिः । शकन्ध्वादित्वात्साधु । सतां संगतं सख्यं सप्तभिः पदैः आपद्यते इति साप्तपदीनं सप्तपदोच्चारणसाध्यं उच्यते । तच्चावयोस्त्वत्कृतसत्कारप्रयोगादेव सिद्धमित्यर्थः । ' साप्तपदीनं सख्यम् ' इति निपातनात्साधुः ॥ ३९ ॥

Prose Order —आत्मना प्रयुक्तसत्कारविशेषं मां परं संप्रतिपत्तुं न अर्हसि, (हे) संनतगात्रि, यतः मनीषिभिः सतां सङ्गतं साप्तपदीनं उच्यते ॥ ३९ ।

Notes —आत्मना—स्वयं by thee thyself *i e*, not through any attendant or other person प्रयुक्तसत्कारविशेषं—प्रयुक्तः (कृतः) सत्कारस्य विशेषो यस्मै स, तम् to whom special hospitality has been done परं—अन्यं a different person, a stranger संप्रतिपत्तुं—(सं प्रति + √पद् + तुमुन्) बोद्धुं to know ; to regard. Infinitive of √पद् to go, but with प्रति ' to know. ' संनतगात्रि—सं (सम्यङ्) नतानि गात्राणि यस्याः सा संनतगात्री, तस्याः सम्बोधने संनतगात्रि (सुन्दराङ्गि) having the body bent or stooping ; having rounded limbs ; beautiful. ' नतं चारु सन्नतम् ' इति भाजः । ङीष् is added to form the feminine by the vartika ' अङ्गगात्रकण्ठेभ्यो वक्तव्यम् ' *i e*. of

Bahuvrihi compounds having for their last members अङ्ग, गात्र or कण्ठ the feminine is formed either in आ or ई, thus the other form will be संनतागात्रा । मनीषिभिः —(मनीषा+इनिः) मनीषा (बुद्धि) एषामस्तीति मनीषिणः, तैः मनीषिभिः (विद्वद्भिः) by the thoughtful; wise, or, मनस ईषिभिः, मनीषिभिः । For synonyms of मनीषा *Cf.* 'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः' इत्यमरः । The suffix इनि is added by 'व्रीह्यादिभ्यश्च' पा० ५.२ ११६ । सतां—सज्जनानाम् of good people Genitive plu of सत्, which is declined as, सन्, सन्तौ, सन्तः । सन्तं, सन्तौ, सतः । सता, सद्भ्यां, सद्भिः etc सङ्गतम्—(सं+√गम्+क्तः) सख्यम् Meeting friendship साप्तपदीनं—(सप्तपदं+खञ्—ईन) सप्तानां पदानां समाहारः सप्तपदं (द्विगुसमासः), सप्तपदेन (सप्तभिः पदैः वा) अवाप्यते इति साप्तपदीनम् । the word पद has two meanings, *viz* 'a word' and 'a footstep', so the expression means 'which is formed by uttering seven words' or 'by walking over seven steps together' *i e.*, friendship. The word has lost the literal sense and is used for friendship. It is irregularly formed to indicate this meaning by 'साप्तपदीनं सख्यम्' पा० ५ २ २२ । 'सख्यं साप्तपदीनं स्यात्' इत्यमरः । *Cf.* 'संबन्धमाभाषणपूर्वमाहुः' रघु० २ ५८ । and 'सतां सप्तपदा मैत्री, सत्सतां त्रिपदा स्मृता । सत्सतामपि ये सन्तस्तेषां मैत्री पदे पदे ।'

Shiva means to say as Parvati and he had uttered a few words to each other they were friends and

not strangers to each other, and so he was entitled to make further enquiries about her. 39.

CHANGE OF VOICE :—आत्मना प्रयुक्तसत्कारविशेषः अहं परः संप्रतिपत्तुं न अर्हः, (हे) संनतगात्रि, यतः मनीषिणः सतां सङ्गतं साप्तपदीनं ब्रुवन्ति ॥ ३९ ॥

HINDI TRANSLATION :—(तुमने) अपने आप जिसका विशेष आदर किया है ऐसे मुझ को कोई दूसरा (अजनबी) मानना योग्य नहीं है, क्योंकि, हे सुन्दरि, बुद्धिमान् लोग सज्जनो की मित्रता को सात शब्दों के बोलने (या पैरों के चलने) से होने वाली कहते हैं ॥ ३९ ॥

ENGLISH TRANSLATION —It does not behove thee to regard me as a stranger, to whom special hospitality has been accorded by thee , for, O one of stooping body, the friendship of good people is declared by the wise to be formed after seven words have been exchanged between them (or, after seven steps have been walked together) 39

PURPORT IN SANSKRIT :—हे सुन्दरि, अहमत्रागतस्त्वया यथाविधि सत्कृतः त्वया सह मे वार्त्तालापश्च जातः, अतोऽहं त्वदीयो जनो जातः। अधुना त्वयाहं स्वमित्रमेव मन्तव्यः, यतः सज्जनानां मैत्री परस्पर सप्तपदोच्चारणेन सप्तपदगमनेन वा सिध्यतीति विद्वज्जनानां सम्मतिः। इदानीं तव मित्रत्वान्मे तव हार्दिकीमिच्छां ज्ञातुमधिकारोऽस्तीति भावः ॥ ३९ ॥

अतोऽत्र किञ्चिद्भवतीं बहुक्षमां
द्विजातिभावादुपपन्नचापलः ।

अयं जनः प्रष्टुमनास्तपोधने
न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ ४० ॥

अत इति । हे तपोधने अतः सख्याद्धेतोः अत्र प्रस्तावे बहुक्षमां बहूक्तिमहाम् । यद्वा क्षमावतीं भवतीं त्वां द्विजातिभावाद् ब्राह्मणत्वाद् उपपन्नचापलः सुलभधाष्ट्र्यः अयं जनः । स्वयमित्यर्थः । किञ्चित् प्रष्टुं मनो यस्य स प्रष्टुमनाः प्रष्टुकामः । 'तुं काममनसोरपि' इति मकारलोप । रहसि भवं रहस्यं गोप्यं न चेत् प्रतिवक्तुं अर्हसि ॥ ४० ॥

PROSE ORDER :—(हे) तपोधने, अत्र द्विजातिभावाद् उपपन्नचापलः अयं जन॰ बहुक्षमां भवतीं किञ्चित् प्रष्टुमनाः (अस्ति) चेद् रहस्यं न प्रतिवक्तुं अर्हसि ॥ ४० ॥

NOTES :—तपोधने—तप एव धनं यस्याः सा तपोधना, सम्बोधने तपोधने, whose treasure consists of penance. अत्र—तपःसम्बन्धे i e, with regard to your penance. द्विजातिभावात्—(√जन्+क्तिन्=जातिः) द्वे जाती (जन्मनी) यस्य स द्विजातिः, तस्य भावः द्विजातिभावः, तस्मात् on account of my being a Brahmana द्विजाति means those who have two births viz., one from the mother and the other from the preceptor in the form of initiation. Hence it indicates the first three castes *Cf* 'मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् । ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ।' मनु० २.१६६ । But, here it means the Brahmana class alone. Ablative is used in the sense of cause. Shiva means to say that Brahmanas are inquisitive by their nature and that he was not an exception

to this उपपन्नचापलः। उपपन्नं—(उप+√पद्+क्तः) संभाव्यं; प्राप्तम् is produced or aroused. चापलं—(चपल+अण्) चपलस्य भावः चापलम् (धृष्टता) agitation, want of patience उपपन्नं चापलं यस्य स उपपन्नचापलः i. e, who has become curious अयं जनः— i. e, I myself बहुक्षमां—बहुः क्षमा यस्यां सा बहुक्षमा, ताम् or बहु क्षाम्यतीति बहुक्षमा ताम् One possessed of great forbearance, who forgives much who is capable of bearing great hardships It gives the reason why Shiva makes bold to make enquiry प्रष्टुमनाः—(√प्रच्छ्+तुमुन्+मनाः) प्रष्टुं मनो यस्य स प्रष्टुमनाः desirous of asking something. The nasal of the infinitive is dropped before काम and मनस् by 'तुं काममनसोरपि'। रहस्यं—(रहस्+यत्) रहसि भवं रहस्यं (गोप्यं) a secret प्रतिवक्तुं—(प्रति+√वच्+तुमुन्) to tell me Some books read प्रतिबोधयिष्यसि (thou wilt kindly let me know) instead of प्रतिवक्तुमर्हसि ॥ ४० ॥

Change of Voice :—(हे) तपोधने, अतः अत्र द्विजाति-भावाद् उपपन्नचापलेन अनेन जनेन बहुक्षमां भवतीं किञ्चित् प्रष्टुमनसा (भूयते), चेद् रहस्येन न (भूयते) तर्हि (त्वया) प्रतिवक्तुं अर्ह्यते ॥ ४० ॥

Hindi Translation :—हे तपस्विनि, इस लिये इस (तुम्हारी तपस्या) के बारे में, ब्राह्मण होने के कारण प्रगल्भ हुआ यह व्यक्ति (मैं) अत्यन्त सहनशील आप से कुछ पूछने की इच्छा वाला है, यदि कोई गुप्त बात न हो तो आप उत्तर देने की कृपा करें ॥ ४० ॥

ENGLISH TRANSLATION —Hence, O one whose riches consist of penance, this I, in whom curiosity is aroused on account of my being a Brahmana, am desirous of asking something to thee, who is capable of great forbearance. If it be not a secret, thou mayst kindly give a reply 40

PURPORT IN SANSKRIT :—यतोऽहं त्वत्ताऽभिन्नः, ब्राह्मणत्वाच्च तव विषये ज तु मे महत्कुतूहलम् , अतोऽहं त्वां किञ्चित्प्रष्टुमिच्छामि । त्वया च क्रोधो न कार्यो यतस्त्व तपस्विनी बहुत्तमायुक्ता च । हे तपस्विनि पार्वति, अधुना यद्यस्मिन् विषये किञ्चिद् गोप्यं न भवेत् तर्हि कृपया कथनीयम् ॥ ४० ॥

कुले प्रसूतिः प्रथमस्य वेधस-
त्रिलोकसौन्दर्यमिवोदित वपुः ।
अमृग्यमैश्वर्यसुखं नवं वय-
स्तपः फलं स्यात्किमतः परं वद ॥ ४१ ॥

प्रष्टव्यमाह । कुल इति । प्रथमस्य बेधसः हिरण्यगर्भस्य कुले अन्ववाये । प्रसूतिः उत्पत्तिः । 'यज्ञार्थं हि मया सृष्टो हिमवानचलेश्वरः '। इति ब्रह्मपुराणवचनात् । वपुः शरीर त्रिलोकसौन्दर्यं त्रयाणां लोकानां सौन्दर्यं इव उदितं एकत्र समाहृतम् । ऐश्वर्यसुखं संपत्सुख अमृग्यं अन्वेषणीयं न भवति । किं तु सिद्धमेवेत्यर्थः । वयः नवम् । यौवनमित्यर्थः अतः परं अतोऽन्यत् किं तपःफलं स्यात् वद अस्ति चेदिति शेषः । न किञ्चिदस्तीत्यर्थः ॥ ४१ ॥

PROSE ORDER :—प्रथमस्य वेधसः कुले प्रसूतिः, वपुः त्रिलोकसौन्दर्यमिव उदितम् , ऐश्वर्यसुखं अमृग्यम् , वयः नवम् , अतः परं किं तपः फलं स्याद् इति वद ॥ ४१ ॥

NOTES :—प्रथमस्य—सर्वाद्यस्य the first or primeval. ब्रह्मणः of Brahman , the creator or progenitor of mankind ' स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः ' इत्यमरः । वेधस् is declined as वेधाः वेधसौ, वेधसः । वेधस, वेधसौ, वेधसः । वेधसा, वेधोभ्याम् etc प्रसूतिः—birth The mountain Himalaya, the father of Parvati, was created by Brahman. *Cf* ' यज्ञार्थं हि मया सृष्टा हिमवानचलेश्वरः ' quoted above by Mallinath त्रिलोकसौन्दर्य—त्रयवयवो लोकस्त्रिलोकः, तस्य सौन्दर्यं त्रिलोकसौन्दर्यं the beauty of the three worlds The comp of त्रिलोक should not be expounded as त्रयाणां लोकानां समाहारः in which case we should expect it to be त्रिलोकी। सौन्दर्यं—(सुन्दर+ष्यञ्) सुन्दरस्य भावः सौन्दर्यं beauty. उदितं—(उत्+√इ+क्तः) उत्पन्नं manifested at one place For the idea *Cf* ' सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव ' कुमारसम्भवम् १ ४९ । Parvati being excessively handsome she has been regarded as if the manifestation at one place of the beauty of all the three worlds. ऐश्वर्यसुखम्—(ईश्वर+ष्यञ्) ऐश्वर्यस्य (सम्पत्तेः) सुखं happiness of affluence. ऐश्वर्य means wealth of every kind अमृग्यं—(√ मृग् to search+यत्) न मृग्यं अमृग्यम् not to be sought for. The suffix is added by ' अचो यत् ' पा० ३ १ ९७ । Parvati did not need hanker after any kind of wealth for her father's residence was the home of every sort of wealth. वयः —age. नवं—नूतनं fresh, *i. e.* young age. अतः परम्—

besides this—the things enumerated in the first three lines of the verse तपः फलं—तपसः फलं the fruit of penance

Shiva means to say that Parvati being already in possession of all those things, namely noble birth, excessive beauty, happiness of wealth and young age, for the acquisition of which people generally resort to practise penance, he failed to understand the cause of her penance and so asked the question 41.

CHANGE OF VOICE :—प्रथमस्य वेधसः कुले प्रसूत्या (भूयते), वपुषा त्रिलोकसौन्दर्येण इव उदितेन (भूयते), ऐश्वर्य-सुखेन अमृग्येन (भूयते), वयसा नवेन (भूयते), अतः परं केन तपः फलेन भूयेत इति (त्वया) उच्यताम् ॥ ४१ ॥

HINDI TRANSLATION :—(मनुष्य जाति के) प्रथम उत्पादक ब्रह्मा के वंश में (तुम्हारा) जन्म है, शरीर मानो तीनों लोकों की सुन्दरता एकत्रित हो गई हो, सम्पत्ति का सुख (तुम्हें) ढूँढ़ना नहीं, आयु नई है, तो बताओ तो इससे बढ़ कर और क्या तपस्या का फल हो सकता है ? ॥ ४१ ॥

ENGLISH TRANSLATION —(Thy) birth is in the family of Brahman, the first creator ; body is as if it were the manifestation of the (collected) beauty of the three worlds , happiness of affluence need not be sought after (by thee), age is fresh Then, please tell what else than these can be the fruit of penance ? 41

PURPORT IN SANSKRIT :—संसारे प्रायेण जनाः श्रेष्ठकुलजन्मार्थं, सौन्दर्यार्थं, सम्पत्त्यर्थं, यौवनार्थं वा नानाविधानि तपांसि कुर्वन्ति, परं तानि सर्वाण्यपि ते स्वभावतः सिद्धानि—आद्यब्राह्मणः कुले ते जन्म जातम्, तव देहस्त्रयाणामपि लोकानां एकत्रीकृतं लावण्यमिवास्ति, तव पितुर्गृहं नवित्तैश्वर्यस्य निधानम्, आयुश्च ते नूतनम्। तर्हि त्वं किमर्थं कठिनं तप आचरसि? त्वं बुद्धिमती कारणं विना न तपस्यसि—तदेव कारणमहं ज्ञातुकामः॥ ४१॥

भवत्यनिष्टादपि नाम दुःसहा-
न्मनस्विनीनां प्रतिपत्तिरीदृशी।
विचारमार्गप्रहितेन चेतसा
न दृश्यते तच्च कृशोदरि त्वयि॥ ४२॥

भवतीति। दुःसहात् सोढुमशक्यात् अनिष्टाद् भर्त्रादिकृतात् अपि मनस्विनीनां धीरस्त्रीणां ईदृशी तपश्चरणलक्षणा प्रतिपत्तिः प्रवृत्तिः। 'प्रतिपत्तिस्तु गौरवे। प्राप्तौ प्रवृत्तौ प्रागल्भ्ये' इति केशवः। भवति नाम। नामेति संभावनायाम्। विचारमार्गप्रहितेन विचारमार्गं प्रहितेन चेतसा चित्तेन तद् अनिष्टं च हे कृशोदरि त्वयि न दृश्यते। विचार्यमाणे तदपि नास्त्यसंभावितत्वादित्यर्थः॥ ४२॥

PROSE ORDER:—दुःसहाद् अनिष्टादपि मनस्विनीनां ईदृशी प्रतिपत्तिः भवति नाम, (परं) (हे) कृशोदरि, विचारमार्गप्रहितेन चेतसा तत् च त्वयि न दृश्यते॥ ४२॥

NOTES:—दुःसहात्—(दुर्+√सह्+खल्) दुःखेन सह्यते इति, तस्मात् which can be borne with difficulty. Adjective of अनिष्टात्—(√इष्+क्तः) न इष्टात् अनिष्टात् from an undesirable thing; an evil; a wrong.

Mallinatha says भर्त्रादिकृतान् *i e*, done by one's husband or others मनस्विनीनां—(मनस्+विनिः+ङीप्) प्रशस्तं मनो विद्यते यासां ताः मनस्विन्यः, तासा,(अभिमानवतीनाम्) high-minded or virtuous ladies ईदृशी—(इदम्+√दृश्+कञ् +ङीप्) इयमिव दृश्यते इति ईदृशी such; like it. कञ् is added by 'त्यदादिषु दृशोऽनालोचने कञ्च' पा० ३ २. ६० । प्रतिपत्तिः—(प्रति+पद्+क्तिन्) प्रवृत्तिः a course of action; inclination. 'प्रतिपत्तिस्तु गौरवे । प्राप्तौ प्रवृत्तौ प्रागल्भ्ये' इति केशवः । नाम—संभाव्यते an indeclinable used in the sense of possibility कृशोदरि—(कृश+उदर+ङीप्) कृशं उदरं (कटिप्रदेशः) यस्याः सा कृशोदरी, सम्बोधने कृशोदरि O one of slender waist The suffix ङीप् is added optionally by 'नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च' पा० ४ १ ५५ । *i e*, a Bahuvrihi compound ending in नासिका etc optionally takes ङीप् So the other form is कृशोदरा । Some books give तलोदरि for कृशोदरि, It also means the same विचारमार्गप्रहितेन—विचारस्य मार्गे प्रहितं विचारमार्गप्रहितं, तेन directed through channel of thought *i e*, after thinking चेतसा—चित्तेन by the mind. तत्—तदनिष्टं *i e* a wrong done to you त्वयि—with regard to you. न दृश्यते—न ज्ञायते is not known 42.

CHANGE OF VOICE :—दुःसहाद् अनिष्टाद् अपि मनस्विनीनां ईदृश्या प्रतिपत्त्या भूयते नाम, (हे) कृशोदरि, विचारमार्गप्रहितं चेतः तत् च त्वयि न पश्यति ॥ ४२ ॥

HINDI TRANSLATION :—न सहने योग्य बुराई से भी मानिनी स्त्रियों का ऐसा (कार्य करने को) मन का झुकाव हो

सकता है, (परन्तु) हे सुन्दर कटि वाली, विचार करने वाले मन से तुम्हारे बारे में वह भी (सम्भव) नहीं दीखता ॥ ४२ ॥

ENGLISH TRANSLATION —Such a course of action is possible in case of high minded ladies on account of any wrong (done to them), but, O one of slender waist, no such wrong is known in thy case by the mind directed through the channel of thought 42

PURPORT IN SANSKRIT.—लोके कदाचिद् भर्त्रादिभिः सम्बन्धिभिस्तिरस्कृताः मानिन्यो नार्यस्तपोजीवनं स्वीकुर्वन्ति, परं हे सुमध्यमे, त्वामन्तरेण तु एतदपि तपस्यायाः कारणं न ज्ञायते ॥ ४२ ॥

अलभ्यशोकाभिभवेयमाकृति—
विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत् पन्नगरत्नसूचये ॥ ४३ ॥

अनिष्टाभावमेव प्रपञ्चयति । अलभ्येति । हे सुभ्रु । इयं त्वदीया आकृतिः मूर्त्तिः अलभ्यशोकाभिभवा अलभ्यो लब्धुमनर्हः शोकेन भर्त्राद्यवमानजेन दुःखेनाभिभवस्तिरस्कारो यस्या सा तथोक्ता। दृश्यत इति शेष । असंभावितश्चायमर्थ इत्याह पितुर्गृहे विमानना अवमानः कुतः । न संभाव्यत एवेत्यर्थः । न चाप्यन्यस्माद्भावीत्याह पराभिमर्शः परधर्षणं तु तव नास्ति । पन्नगरत्नसूचये फणिशिरोमणिशलाकां ग्रहीतुमित्यर्थः । ' क्रियार्थोपपदस्य च कर्मणि स्थानिनः ' इति चतुर्थी । करं हस्तं कः प्रसारयेत् । सुभ्रु इत्यत्र भ्रूशब्दस्योवङ्स्थानीयत्वात् ' नेयङुवङ्स्थानावस्त्री '

इति नदीसंज्ञाप्रतिषेधात् 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वं नास्ति। तेन ह्रस्वः प्रामादिकः इति केचित्। अन्ये तु 'अप्राणिजातेश्चारज्ज्वादीनाम्' इत्यत्र अलाबूः कर्कन्धूः इत्युकारान्तादप्यूङ्प्रत्ययमुदाजहार भाष्यकार एतस्मादेव ज्ञापकात् कचिदूकारान्तस्याप्यूङन्तत्वान्नदीत्वे ह्रस्वत्वमित्याहुः। अत एवाह वामनः—'ऊकारान्तादप्यूङ्प्रवृत्तेः इति।' 'सुभ्रूः कुतस्तातगृहेऽवमाननम्' इति पाठान्तरकरणं तु साहसमेवोक्तोपपत्तिसम्भवात्। अन्यत्रापि 'सुभ्रु त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषिताम्' इत्यादिप्रयोगदर्शनाद्वंशस्थवृत्ते पादादौ जगणभङ्गप्रसङ्गाच्चेत्यलं गोष्ठीभिः ॥ ४३ ॥

PROSE ORDER :—(हे) सुभ्रु, इयं आकृतिः अलभ्यशोकाभिभवा, (किञ्च) पितुः गृहे विमानना कुतः, तव पराभिमर्शः न अस्ति, कः पन्नगरत्नसूचये करं प्रसारयेत् ? ॥ ४३ ॥

NOTES :—सुभ्रु—शोभने भ्रुवौ यस्याः सा सुभ्रूः, तस्याः सम्बोधने O thou of beautiful eye-brows According to the author of Siddhántakaumudi the Vocative singular of सुभ्रू should be सुभ्रूः and not सुभ्रु as given here, because the long ऊ is shortened in Voc sing of only those words which are termed as नदीसंज्ञक (*i. e*, the words of feminine gender ending in long ई or ऊ) by 'अम्बार्थनद्योर्ह्रस्वः' पा० ७ ३ १०७ । *i e*, the words meaning 'mother' and नदीसंज्ञक are shortened in the Voc. sing, and as the word सुभ्रू is not termed as such because of the rule 'नेयङुवङ्स्थानावस्त्री' पा० १.४.४ । which means that the words of which ई or ऊ are replaced by इयङ् or उवङ्, with the exception of स्त्री

are not termed as नदी, its ऊ should not have been shortened But Mallinatha defends it by saying that according to the Bhashyakara (Patanjali) the shortening of the final vowel may be allowed in rare cases, for in his commentary on 'अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम्' he has given the instance of अलाबू, कर्कन्धू। thereby indicating that sometimes ऊकारान्त words may take ऊङ् and be नदीसंज्ञक so that they can shorten their vowel in the Voc sing Vámana also supports this view by saying 'ऊकारान्तादप्यूङ्प्रवृत्तेः' Thus ऊङ् will be added to सुभ्रू and then its ऊ not being replaced by उवङ् it will be termed as नदी, which means it will be shortened in Voc sing Other poets also have used it in short उ, for instance Cf 'सुभ्रु त्वं कुपितेत्यपास्तमशनं०' quoted by Mallinatha इय—this, i e, yours. अलभ्यशोकाभिभवा—(√लभ्+यत्) न लभ्यौ शोकश्च अभिभवश्च (तिरस्कारश्च) यया सा अलभ्यशोकाभिभवा which is incapable of grief and humiliation Or, न लभ्यः शोकेन अभिभवो यया सा which is incapable of the humiliation of grief It is a supposition that beautiful persons can not be subject to misery विमानना—(√मान्+युच्) अपमानः insult, disrespectful treatment. In कुतः (किम् +तसिल्) किम् is changed to कु by 'कु तिहोः पा० ७.२.१४। पराभिमर्शः—(√मृश् to touch+घञ्) परेण अभिमर्शः पराभिमर्शः being touched or outraged by others. पन्नगरत्नसूचये। पन्नगः—(पन्न+√गम्+डः) पन्नं गच्छतीति

पन्नग (सर्पः) creeping low, i e, a serpent. रत्नस्य सूचिः रत्नसूचिः (the sharp point of the gem), पन्नगस्य रत्नसूचिः पन्नगरत्नसूचिः. तस्यै पन्नगरत्नसूचये (सर्पमणिशलाकामादातुं) the sharp point of the serpent's gem, i e., in order to catch it by its end. The Dative in सूचये is used because of 'क्रियार्थोपपदस्य कर्मणि स्थानिनः' पा० २.३.१४ । i e, the object governed by an infinitive mood not actually used but implied, is put in the Dative Thus सूचये means सूचिं ग्रहीतुम् । करं—हस्त an arm प्रसारयेत्—(प्र + √सृ + णिच् + लिङ्) may extend or stretch out As it is not possible to catch hold of the gem of a serpent's hood, so it was impossible for any one to threaten the person of Parvati 43

Change of Voice :—(हे) सुभ्रु, अनया आकृत्या अलभ्यशोकाभिभवया (भूयते), पितुः गृहे विमाननया कुतः (भूयते), तव पराभिमर्शेण न भूयते, केन पन्नगरत्नसूचये करः प्रसार्येत ? ॥ ४३ ॥

Hindi Translation :—हे सुन्दर भौं वाली, यह तुम्हारा रूप दुःख से पीडित होने योग्य नहीं है, (और फिर) पिता के घर पर अपमान कैसा ? तुम्हें कोई दूसरा व्यक्ति छू (धमका) भी नहीं सकता, (क्योंकि) कौन साँप की मणि की नोक के (लेने के) लिये हाथ बढ़ायेगा ? ॥ ४३ ॥

English Translation —O one of beautiful eyebrows, this (thy) form is incapable of the humiliation of grief, and whence can there be any disrespectful treatment at the father's house ? Nor can there be any

insult from others, (for) who can stretch his arm for (snatching away) the pointed end of a serpent's gem ? 43.

PURPORT IN SANSKRIT—हे शोभनभ्रूयुक्ते पार्वति, 'सामुद्रिकलक्षणयुक्ता आकृतयाऽनिष्टभाजो न दृष्टाः' इति न्यायात् शुभलक्षणोपेतं ते सुन्दरं रूपं दुःखयोग्यं नास्ति । कुमारित्वात् भर्तृकृतानिष्टस्य तु शङ्कैव नास्ति, परं ते पिताऽपि त्वयि नितरां स्निह्यति अतस्तव जनकस्य गृहेऽपि तेऽपमानः केनापि कर्त्तुं न शक्यते । भर्त्तृपित्राद्यतिरिक्तः कश्चिदन्यस्त्वां तिरस्कुर्यादिति शङ्कयाप्यलम्, न हि कश्चिदपि सर्पस्य शिरोमणिं ग्रहीतुं उद्यमं करोति । यथा हि सर्पमणेर्ग्रहणं दुष्करमेवमेव ते धर्षणमपीति तात्पर्यम् ॥ ४३ ॥

किमित्यपास्याभरणानि यौवने

धृतं त्वया वार्धकशोभि वल्कलम् ।

वद प्रदोषे स्फुटचन्द्रतारका

विभावरी यद्यरुणाय कल्पते ॥ ४४ ॥

किमिति । हे गौरि किमिति केन हेतुना यौवने त्वया आभरणानि अपास्य विहाय । वृद्धस्य भावो वार्धकम् । मनोज्ञादित्वात् वुञ्प्रत्ययः । 'वार्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि' इति विश्वः । तत्र शोभत इति वार्धकशोभि वल्कलं धृतम् । प्रदोषे रजनीमुखे स्फुटाः प्रकटाश्चन्द्रस्तारकाश्च यस्याः सा स्फुटचन्द्रतारका विभावरी रात्रिः अरुणाय सूर्यसुताय कल्पते यदि अरुणं गन्तुं कल्पते किम् । वद ब्रूहि । 'क्रियार्थोपपदस्य' इत्यादिना चतुर्थी । दीप्यमानशशाङ्कतारके प्रदोषे यद्यरुण उदेति ततो विभूषणापहारेण तव वल्कलधारणं संघटत इति भावः ॥ ४४ ॥

Prose Order :—(हे गौरि), त्वया यौवने आभरणानि अपास्य वार्धकशोभि वल्कलं किं इति धृतम् ? यदि स्फुटचन्द्र-तारका विभावरी प्रदोषे अरुणाय कल्पते (तर्हि) वद ॥ ४४ ॥

Notes :—यौवने—(युवन्+अण्) यूनो भावः यौवनम्, तस्मिन् in young age अपास्य—(अप+√अस् to throw +ल्यप्) त्यक्त्वा having cast वार्द्धकशोभि । वार्द्धकम्—(वृद्ध+वुञ्—अक् (वृद्धस्य भावः वार्द्धकम् old age The suffix वुञ् which is replaced by अक् is added by ' द्वन्द्व-मनोज्ञादिभ्यश्च ' पा० ५ १ १३३ । वार्द्धके शोभते इति वार्द्धकशोभि (√शुभ् to shine+णिनिः) which looks good in old age , suitable in old age Adj of वल्कलम्—a bark garment, which is generally put on by ascetics स्फुट-चन्द्रतारका—स्फुटाः (प्रकाशमानाः) चन्द्रः तारकाश्च यस्यां सा स्फुटचन्द्रतारका in which the moon and the stars are shining विभावरी—(वि+√भा to shine+वनिप्+ङीप्) विभाति इति विभावरी, रात्रिः night. ' विभावरीतमस्विन्यौ रजनी यामिनी तमी ' इत्यमरः । The suffix ङीप् is added to make it fem. by ' वनो र च ' पा० ४ १.७ । which is also responsible for changing the न of वनिप् into र । प्रदोषे—रात्रिमुखे; रात्रे पूर्वभागे during the first part of night, (i e , when the night is in its youth) ' प्रदोषो रजनी-मुखम् ' इत्यमरः । अरुणाय—for the dawn. अरुण is described as the son of कश्यप and विनता and the elder brother of गरुड । He has no thighs and so is known as अनूरु । He is also personified as the charioteer of the sun. Note that अरुण also means ' red '

hence the red colour which pervades the sky before the sunrise This gives it the title of ' the harbinger of the dawn. ' In अरुणाय the Dative is used because the sense of infinitive is understood अरुणाय—अरुणं गन्तुं, अरुणोदयं कर्त्तुम्। Cf ' क्रियार्थोपपदस्य च० ' quoted in the notes on पन्नगरत्नसूत्रये in the 43rd verse above. कल्पते—प्रभवति to be able or fit for

Shiva means to say as the night in its youth can not think of the dawn, so Parvati also should not have thought of putting on bark garments in her youth The connection between the moon and the stars and Aruna on one hand and the ornaments and bark garment on the other is made all the more effective when their respective lustre and colour are taken into consideration Ornaments glitter like the moon and the stars, while bark is of the same colour as the dawn 44

CHANGE OF VOICE :—(हे गौरि) त्वं यौवने आभरणानि अपास्य वार्धकशोभि वल्कलं किमिति धृतवती ? यदि स्फुटचन्द्र-तारकया विभावर्या प्रदोषे अरुणाय कल्प्यते तर्हि (त्वया) उच्यताम् ॥ ४४ ॥

HINDI TRANSLATION :—(हे पार्वति) तुम ने युवावस्था में आभूषणों को छोड़ कर वृद्धावस्था में अच्छी लगने वाली वृक्ष की छाल क्यों धारण कर ली है ? बता तो सही, कहीं चमकते हुए चन्द्रमा तथा तारों वाली रात्रि प्रारम्भ में ही प्रभात में परिणत हो सकती है ? ॥ ४४ ॥

ENGLISH TRANSLATION —How is it that having abandoned ornaments, thou hast, in youth, put on a bark-garment fit for the old age? Say if the night at its beginning, full of shining moon and stars, is fit to receive the dawn 44

PURPORT IN SANSKRIT :—एष ते भूषणधारणसमयो न तु वल्कलधारणस्य, तर्हि, हे पार्वति! केन कारणेन त्वया भूषणानि त्यक्त्वा वृद्धावस्थायोग्यं वल्कलधारणं कृतम्? किं कदाचिदेतद् भवितु शक्नोति यच्चन्द्रतारकैः शोभमाना रात्रिःअकाल एव प्रभाते परिणता भवेत्? यथा हि रात्रेः प्रारम्भ एव शशाङ्कतारका ग्रस्तं गच्छेयु अरुणश्चोदय गच्छेदिति असंगतमेवमेव नवे वयसि तव आभरणानि त्यक्त्वा वल्कलधारणमसंगतम् ॥ ४४ ॥

दिव यदि प्रार्थयसे वृथाश्रमः
पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना
न रत्नमन्विष्यति मृग्यते हि तत् ॥ ४५ ॥

तप प्रयोजनं निराकर्त्तुमाह । दिवमिति । दिवं स्वर्गं प्रार्थयसे कामयसे यदि तर्हि श्रम तपश्चरणप्रयास वृथा निष्फलः । यदि स्वर्गार्थं तप्यसे तत श्रमं मा कार्षी । कुत. । तव पितुः हिमवतः प्रदेशा देवभूमय । स्वर्गपदार्था तत्रत्या इत्यर्थः । अथ उपयन्तारं वरं प्रार्थयसे तर्हि समाधिना तपसा अलम् । न कर्त्तव्यमित्यर्थ । निषेध्यस्य निषेधं प्रति करणत्वात्तृतीया । तथा हि । रत्नम् । कर्तृ । न अन्विष्यति न मृगयते । ग्रहीतारमिति शेष । किन्तु तत् रत्नं मृग्यते । ग्रहीतृभिरिति शेषः । न हि वरार्थं त्वया तपसि वर्तितव्यं किन्तु तेनैव त्वदर्थमिति भाव. ॥ ४५ ॥

PROSE ORDER —यदि दिवं प्रार्थयसे (तर्हि) श्रमः वृथा, (यतः) तव पितुः प्रदेशाः देवभूमयः (सन्ति), अथ उपयन्तारं (प्रार्थयसे तर्हि) समाधिना अलम्, रत्नम् न अन्विष्यति हि तद् मृग्यते ॥ ४५ ॥

NOTES —दिव—स्वर्ग heaven. प्रार्थयसे—अभिलषसि seek श्रमः—effort ; penance 'अभ्यासे शस्त्रविद्यादौ वेदे तपसि च श्रमः' इति भोजः । पितुः—जनकस्य *i e.*, of the Himalaya देवभूमयः—देवानां भूमय देवभूमयः the land of gods, *i. e*, where the gods live So, when the regions of your father are the land of gods it is no use trying to seek heaven उपयन्तारं—(उप+√यम्+तृच्) वरं husband √यम् to restrain, when preceded by उप means 'to marry.' समाधिना—तपसा austerities Instrumental is used with अलम्, when it means 'enough of' अलं—न कर्त्तव्यमित्यर्थ *i e.*, do not practise it न अन्विष्यति—न मृगयते does not seek रत्नं is the subject of अन्विष्यति and its object ग्राहकं (a customer) is understood Similarly in the clause तद् मृग्यते, तद् (a jewel) is the object and the subject ग्राहकैः (by the customers) is understood मृग्यते—अन्विष्यते is sought for Passive voice present tense of √मृग् to seek The expression 'न रत्नमन्विष्यति मृग्यते हि तत्' is a general statement which means that it is not the business of jewels or other valuable things to find out customers for themselves, but they are sought for by customers So Shiva means to say that Parvati being possessed

of extreme beauty and other virtues she did not need practise any penance to procure a suitable husband 45

CHANGE OF VOICE :—यदि (त्वया) द्यौः प्रार्थ्यते तर्हि श्रमेण वृथा (भूयते), (यतः) तव पितुः प्रदेशै· देवभूमिभिः (भूयते), अथ उपयन्ता (प्रार्थ्यते तर्हि) समाधिना अलम्, रत्नेन (ग्रहीता) न अन्वेष्यते हि (ग्रहीता) तत् मृगयते ॥ ४५ ॥

HINDI TRANSLATION :—यदि तुम स्वर्ग की इच्छा करती हो तो तपस्या व्यर्थ है (क्योंकि) तुम्हारे पिता की भूमि देवताओं का निवास स्थान है। और यदि किसी वर को (चाहती हो) तो तपस्या मत करो, (क्योंकि) रत्न (या श्रेष्ठ वस्तु) खोजा नहीं करती अपि तु वह तो (ग्राहक से) खोजी जाती है ॥ ४५ ॥

ENGLISH TRANSLATION —If thou art seeking heaven the effort is in vain, (since) the regions of thy father are the land of gods And if thou dost seek a husband, cease from this penance , (for) a jewel has not to seek, but it is sought after 45

PURPORT IN SANSKRIT :—जना· स्वर्गप्राप्त्यर्थमपि तपः कुर्वन्ति, परं यदि त्वं तत्प्राप्त्यर्थं तपस्यामाचरसि तर्हि ते प्रयासो वृथैव, यतस्ते पितुर्हिमालयस्य भुमयो देवानां स्थानानि सन्ति। स्वर्गश्च तदेव यत्र देवा निवसन्ति। यदि च त्वं योग्यवरप्राप्त्यर्थं तपः करोषि तदप्यकरणीयम्, यतस्त्वं रूपादिगुणयुक्ता रत्नभूतासि; त्वामेव जना एषिष्यन्ति न तु त्वया तेषामन्वेषणे प्रयत्नः करणीयः। तथा हि—महार्घं रत्नादिकं ग्राहकान् न मृगयतेऽपि तु ग्राहका एव तन्मृगयन्ते ॥ ४५ ॥

निवेदितं निःश्वसितेन सोष्मणा
मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते
भविष्यति प्रार्थितदुर्लभः कथम् ॥ ४६ ॥

वरवाचकात्तरश्रवणानन्तरमेव देव्या उष्णोच्छ्वासमालक्ष्य प्रश्नेषु च प्रत्युत्तरमनुपलभ्य स्वयमेवाशङ्क्याह—निवेदितमिति । सोष्मणा निःश्वसितेन निःश्वासवायुना निवेदितम् । चिन्तानुभावेनोष्णोच्छ्वासेन ते वरार्थित्वं सूचितमित्यर्थः । तर्हि किं प्रश्नवचनेनेत्याह । मे मनस्तु तथापि संशयमेव गाहते प्राप्नोति । कुतः । ते तव । 'कृत्यानां कर्त्तरि वा' इति षष्ठी । प्रार्थयितव्यः प्रार्थयितुमर्हः एव न दृश्यते । प्रार्थितदुर्लभः प्रार्थितो दुर्लभः स कथं भविष्यति । नास्त्येवेत्यर्थः ॥ ४६ ॥

PROSE ORDER :—(यद्यपि) सोष्मणा निःश्वसितेन निवेदितम् मे मनस्तु संशयं एव गाहते, ते प्रार्थयितव्य एव न दृश्यते, प्रार्थितदुर्लभः कथं भविष्यति ? ॥ ४६ ॥

NOTES :—On hearing the word husband, Parvati instead of replying to the question simply heaved a sigh, which led Shiva to conclude that she was practising penance in order to procure a suitable husband But the conclusion was not without doubt, so he continues his enquiry सोष्मणा—ऊष्मणा सह वर्तत इति सोष्म, तेन सोष्मणा (उष्णेन) warm ऊष्मन् (heat) masc gender is declined as—ऊष्मा, ऊष्माणौ, ऊष्माणः । ऊष्माणं, ऊष्माणौ, ऊष्मणः । ऊष्मणा, ऊष्मभ्यां, ऊष्मभिः etc. निःश्वसितेन—(निस्+√श्वस्+क्तः) निःश्वासेन sigh ;

breathing नि श्वसितं also means 'breathing out', and its opposite is उच्छ्वसितं 'drawing in deep breath' निवेदितम्—सूचितम् indicated गाहते—प्राप्नोति plunges into The root is √गाह् to dive into प्रार्थयितव्य—(प्र+अर्थ+णिच्+तव्य) प्रार्थयितुमर्हः to be sought after; to be requested ते—तव of thee In the case of Potential passive participles the agent of the action is put in the genitive or in the Instrumental case *Cf* 'कृत्यानां कर्त्तरि वा' पा० २ ३ ७१ । प्रार्थितदुर्लभः—प्रार्थितश्चासौ दुर्लभश्च प्रार्थितदुर्लभः unavailable when sought for Shiva means—you need not seek the husband, the husband must seek you; and if you seek after him it should not be difficult to obtain him 46

Change of Voice :—(यद्यपि) सोष्म निःश्वसितं निवेदितवत्, मे मनसा तु संशय एव गाह्यते, ते प्रार्थयितव्यं एव (अहं) न पश्यामि, प्रार्थितदुर्लभेन कथं भविष्यते ॥ ४६ ॥

Hindi Translation —यद्यपि (तुम्हारी) गर्म सांस ने (मुझे) बता दिया, परन्तु फिर भी मेरा मन सन्देह करता है। तुम से चाहने योग्य कोई दीखता ही नहीं (तो) चाहा हुआ कठिनता से मिले ऐसा कैसे हो सकता है ? ॥ ४६ ॥

English Translation —(Thy) hot sigh have indicated to me, yet my mind plunges deep into doubt, there is none who is to be sought after by thee, how can there be one, who is unavailable when sought after ? 46,

PURPORT IN SANSKRIT —वरशब्दश्रवणेन पार्वत्या किञ्चिदुत्तरमदत्त्वैव दीर्घोष्णो निःश्वासो गृहीतस्तद् दृष्ट्वा शिवः कथयति —यद्यपि तव दीर्घोष्णनिःश्वासेनाहं विज्ञापितो यत्त्वं वरप्राप्त्यर्थमेव तप आचरसि, तथाप्यस्मिन् विषये मे चित्तं सन्देहरहितं नास्ति, यतो मन्मतौ तु संसारे कश्चिदपि नैतादृश पुमान् यस्त्वया प्रार्थ्येत (अभ्यर्थनामर्हति), पुनरेतादृशस्तु को यस्तव प्रार्थनानन्तरमपि सुलभतया न लभ्येत । सर्वोत्कृष्टगुणोपेता त्वमेव प्रार्थनीया न तु त्वयान्ये प्रार्थनीयाः । यदि च त्वं कमपि विशेषं जनमिच्छसि तर्हि तेन सुलभेन भवितव्यम् ॥ ४६ ॥

अहो स्थिरः कोऽपि तवेप्सितो युवा
चिराय कर्णोत्पलशून्यतां गते ।
उपेक्षते यः श्लथलम्बिनीर्जटाः
कपोलदेशे कलमाग्रपिङ्गलाः ॥ ४७ ॥

अथ पतिप्रार्थनामेव सिद्धवत्कृत्वाह । अहो इति । अहो चित्रम् । तव ईप्सित आप्तुमिष्टः युवा कः अपि स्थिरः कठिनः । वर्तत इति शेषः । यः युवा चिराय चिरात्प्रभृति कर्णोत्पलशून्यतां गते प्राप्ते कपोलदेशे गण्डस्थले श्लथाः शिथिलबन्धनाः अत एव लम्बिन्यस्ताः श्लथलम्बिनीः कलमाग्रपिङ्गलाः कलमाः शालिविशेषास्तेषामग्राणि तद्वत्पिङ्गलाः जटाः उपेक्षते । यस्त्वामीदृशीं दृष्ट्वा न व्यथते स नूनं वज्रहृदय इत्यर्थः ॥ ४७ ॥

PROSE ORDER :—तव ईप्सितः कः अपि युवा स्थिरः (अस्ति) अहो, यः चिराय कर्णोत्पलशून्यतां गते कपोलदेशे श्लथलम्बिनीः कलमाग्रपिङ्गला जटाः उपेक्षते ॥ ४७ ॥

NOTES :—ईप्सितः—(√आप् to obtain+सन्+क्तः) प्राप्तुं काङ्क्ष्यमाणः. Desired to be obtained. This is Past

Passive Participle, used in the sense of the present tense, of the Desiderative of √ आप्। आ of √ आप् is changed to ई before सन् suffix by ' आप् ज्ञप्यृधामीत् ' पा० ७४ ५५। In तव, Genitive case is used because the past passive participle has been used in the sense of the present tense. *Cf* ' क्तस्य च वर्त्तमाने ' पा० २ ३ ६७। कः अपि—अविज्ञातनामधेयः, यः कोपि भवेत् whosoever he may be. स्थिरः—अतिकठिनहृदयः firm ; not easily moved ; hard अहो—आश्चर्यं इदम् it is strange ; alas चिराय—बहोः कालात् since long. It is an indeclinable word and not the Dative sing. of चिर। *Cf.* ' चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः ' इत्यमरः। कर्णोत्पलशून्यताम्—कर्णयोः उत्पलाभ्यां (कर्णावतंसीकृताभ्यां कमलाभ्यां) शून्य (रहितः) कर्णोत्पलशून्यः, तस्य भावः कर्णोत्पलशून्यता, ताम् Or, कर्णालङ्कारभूतमुत्पलं तेन शून्य. कर्णोत्पलशून्यस्तस्य भाव कर्णोत्पलशून्यता, ताम् from which the ear-lotus has been absent. At times flowers are used particularly by women living in hermitages, as ornaments. Parvati also did so, but since her assuming the life of an ascetic she gave up the practice. गते—Loc. sing. of गत past part. Adj. of कपोलदेशे over which the ear-lotus used to hang. कपोलदेशे—कपोल एव देशः कपोलदेशः, तस्मिन् over her cheeks. श्लथलम्बिनीः—श्लथाश्च ताः लम्बिन्यश्च श्लथलम्बिनीः, ताः loose or untied and (or, therefore hanging लम्बिनीः (√लम्ब्+णिनिः+ङीप्) is in Acc. plu., declined like नदी। Some books

read श्लथबन्धिनीः—श्लथः बन्धो यासां विद्यते ताः श्लथबन्धिन्यः, ताः with their tie loosened कलमाग्रपिङ्गलाः—कलमानां (शालिविशेषाणां) अग्रवत् पिङ्गलाः tawny like the tips of the blades of paddy कलम is a kind of rice, known as paddy Both these are Adjectives of जटाः —Matted hair उपेक्षते—अनादरेण सहते tolerates , is indifferent towards √ईक्ष् ' to see ' when preceded by उप means ' to see indifferently ' Shiva means to say that the bridegroom who is sought after by her must be very hard-hearted who does not take pity on this condition of Parvati 47

CHANGE OF VOICE :—तव ईप्सितेन केन अपि यूना स्थिरेण (भूयते), अहो, येन चिराय कर्णोत्पलशून्यतां गते कपोलदेशे श्लथलम्बिन्यः कलमाग्रपिङ्गलाः जटा उपेक्ष्यन्ते ॥ ४७ ॥

HINDI TRANSLATION :—तुम्हारा चाहा हुआ युवक, चाहे कोई सा हो, कठोर हृदय का है, (क्योंकि) आश्चर्य है कि वह दीर्घ काल से कर्णफूल की तरह प्रयुक्त कमलों से रहित गालों पर खुली हुई लटकने वाली तथा धानविशेष की नोक के समान कपिश वर्ण की जटाओं को उदासीनता से देखता है ॥ ४७ ॥

ENGLISH TRANSLATION —The young man, who is desired by thee, must be hard-hearted, (since) it is a wonder, he can tolerate the matted hair, tawny like the tips of the blades of paddy, hanging loosely on (thy) cheeks which have been devoid of ear-lotus since long. 47

PURPORT IN SANSKRIT :—यं लक्ष्यीकृत्य त्वं तपः करोषि स जनो नितरां पाषाणवत् कठोरहृदयः प्रतीयते, यतो यद्यपि त्वया दीर्घकालं कमलादीनां पुष्पैः कर्णयोर्मण्डनं त्यक्तं तत्स्थाने च कपोलयोरुपरि शान्तिविशेषवदीपद्रक्तवर्णाः शिथिलबन्धनाः जटाः धार्यन्ते—सर्वप्रकारेण ते तपस्विनामिव दयनीयाकृतिः—तथापि स त्वयि दयां न दर्शयति ॥ ४७ ॥

मुनि व्रतैस्त्वामतिमात्रकर्शितां
दिवाकराप्लुष्टविभूषणास्पदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा
सचेतसः कस्य मनो न दूयते ॥ ४८ ॥

मुनिव्रतैरिति । मुनिव्रतैः चान्द्रायणादिभिः अतिमात्रकर्शितां अतिमात्रमत्यन्तं कर्शितां कृशीकृतां दिवाकराप्लुष्टविभूषणास्पदां दिवाकरेण सूर्येण आप्लुष्टानि दग्धानि वातातपसस्पर्शान्मृदुत्वाच्च श्यामीकृतानि विभूषणास्पदानि भूषणस्थानानि यस्यास्तां तथोक्ताम् । अत एव दिवा अहनि शशाङ्कलेखामिव स्थितां त्वां पश्यतः सचेतस जीवतः कस्य पुंसः मनः न दूयते न परितप्यते । अपि तु सर्वस्यैवेत्यर्थः ॥ ४८ ॥

PROSE ORDER :—मुनिव्रतैः अतिमात्रकर्शितां दिवाकराप्लुष्ट विभूषणास्पदां दिवा शशाङ्कलेखां इव त्वां पश्यतः सचेतसः कस्य मनः न दूयते ? ॥ ४८ ॥

NOTES :—मुनिव्रतैः—मुनिजनोचितैः व्रतैः by the vows observed by ascetics (and not by ordinary people. अतिमात्रकर्शितां—अत्येव अतिमात्रम् , or अतिक्रान्ता मात्रा यस्मिन् कर्मणि तदतिमात्रम् (अव्ययीभावः), अतिमात्रं कर्शितां

अतिमात्रकर्शिताम् very much emaciated दिवाकराप्लुष्ट-विभूषणास्पदाम् । दिवाकर—(कृ+टः) दिवा करोति इति दिवाकरः (सूर्यः) the sun आप्लुष्टं—(आ+√प्लुष् to burn +क.) दग्धं scorched विभूषणं—(वि+भूष्—ल्युट्+अन) विभूषयत्यनेन इति विभूषणं an ornament आस्पदं—स्थानं a place दिवाकरेण आप्लुष्टानि विभूषणानां आस्पदानि यस्याः सा दिवाकराप्लुष्टविभूषणास्पदा, ताम् the places of ornaments of whose (body) have been scorched by the sun दिवा—दिवसे during the day-time It is an indeclinable (अव्यय) । शशाङ्कलेखां-शशः विद्यते अङ्के यस्य सः शशाङ्कः (चन्द्रः) तस्य लेखा शशाङ्कलेखा (चन्द्रकला), ताम् the crescent of the moon The simile is very effective—just as the crescent of the moon is very thin and is dimmed by the light of the sun so did appear Parvati who was emaciated and sun-burnt during her observance of hard vows पश्यतः—अवलोकयतः who sees you. Genitive sing of पश्यत् pres part. of √दृश् । सचेतसः—चेतसा सह वर्त्तते इति सचेता, तस्य सचेतसः (सहृदस्य) possessing consciousness or heart; full of feeling. दूयते—(√दूङ् परितापे+लट्) suffers pain. It is implied that Shiva's mind also was pained at this condition of Parvati. 48.

Change of Voice :—मुनिव्रतैः अतिमात्रकर्शितां दिवाकराप्लुष्टविभूषणास्पदां दिवा शशाङ्कलेखामिव त्वां पश्यतः सचेतसः कस्य मनसा न दूयते ? ॥ ४८ ॥

Hindi translation :—मुनियों के योग्य व्रतों (के करने)

से अत्यधिक कृश की हुई, सूर्य (की गर्मी) से झुलसे हुये आभूषण पहिनने के स्थान वाली, तथा दिन में चन्द्रमा की कला जैसी तुम को देखने वाले किस भावुक का मन दुःखी न होगा ? ॥ ४८ ॥

ENGLISH TRANSLATION —Of what person, having a heart, the mind is not afflicted, on seeing thee, like the crescent of the moon by day, who is extremely emaciated by (the observance of) saintly vows and whose places of ornaments have been scorched by the sun ? 48

PURPORT IN SANSKRIT :—त्वं मुनिसम्बन्धिकठोरव्रतपालनेन नितरां कृशा जाता, तव भूषणस्थानीयानि गात्राणि च सूर्यस्य तापेन दग्धानि। तव दशा तु दिवसकाले सूर्यप्रकाशेन मन्दीकृतायाः क्षीणायाश्चन्द्ररेखाया इव दयनीयास्ति, तर्हि क एतादृशो भावुको यस्त्वामीदृशीं दृष्ट्वापि दुःखी न भवेत् ? ॥ ४८ ॥

अवैमि सौभाग्यमदेन वञ्चितं
तव प्रियं यश्चतुरावलोकिनः।
करोति लक्ष्यं चिरमस्य चक्षुषो
न वक्त्रमात्मीयमरालपक्ष्मणः ॥ ४९ ॥

अवैमीति। तव प्रियं वल्लभं सौभाग्यमदेन सौन्दर्यगर्वेण। कर्त्रा। वञ्चितं विप्रलब्धम् अवैमि वेद्मि य॰। प्रियश्चतुरं मधुरमवलोकत इति चतुरावलोकिनः अरालपक्ष्मणः कुटिलरोम्णः। 'अराल वृजिनं जिह्मम्' इत्यमरः। अस्य त्वदीयस्य चक्षुषः आत्मीयं वक्त्रं मुखं चिरं लक्ष्यं विषयं न करोति। दृष्टिपथं न गच्छतीत्यर्थः। तदयं गर्वेण हतो निष्फलात्मलाभो जात इति भावः॥ ४९ ॥

PROSE ORDER :—तव प्रियं सौभाग्यमदेन वञ्चितं अवैमि, य आत्मीयं वक्त्रं चतुरावलोकिनः अरालपक्ष्मणः अस्य चक्षुषः चिरं लक्ष्यं न करोति ॥ ४९ ॥

NOTES :—तव प्रियं—your beloved, i e the person whom you have chosen as your would-be husband सौभाग्यमदेन—(सुभग + ष्यञ्) सुभगस्य भावः सौभाग्यं, तस्य मदः सौभाग्यमदः, तेन (सौन्दर्यगर्वेण) by the pride of (his) beauty वञ्चितं—प्रतारित cheated Because regarding himself beautiful he does not care to see Parvati and is thus deprived of the pleasure of seeing her face He does not possess the real good fortune which lies in being loved by Parvati अवैमि—(अव + √इ + लट्) जानामि I think √ इ to go, when preceded by अव means 'to know' Similarly all the roots meaning 'to go' when preceded by अव mean 'to know' आत्मीयं —(आत्मन् + छः—ईय) आत्मन इदं आत्मीयम् (स्वकीयम्) his own वक्त्रं—मुखं the face चतुरावलोकिनः—(अव + √लोक to see + णिनिः = अवलोकि) चतुरं (सुन्दरं) अवलोकते इति चतुरावलोकि, तस्य चतुरावलोकिनः which casts lovely glances ; which sees in a lovely manner अरालपक्ष्मणः—अरालानि (कुटिलानि) पक्ष्माणि (नेत्रलोमानि) यस्य तत् अरालपक्ष्म, तस्य of which the eye-lashes are curved. अराल means crooked or curved. ' अरालं कुटिलं जिह्मम् ' इत्यमरः । curved eyelashes are regarded beautiful पक्ष्मन् eye-lashes, is Neuter Gender and is declined as पक्ष्म, पक्ष्मणी, पक्ष्माणि etc. Both चतुरावलोकिनः and

अरालपद्मणः are Adjectives of **चक्षुषः**। **अस्य**—of this, *i e*, yours **चिरं**—for a long time **लक्ष्यं—दर्शनविषयम्** target or object of sight *i e*, does not bring him to the view of your eyes Some books read the third line as '**करोति लक्ष्यं रविमस्य चक्षुषः**' makes the sun the mark for your eyes, *i e*, makes you practise the **पञ्चाग्नि** penance 49.

Change of Voice :—(मया) तव प्रियः सौभाग्यमदेन वञ्चितः अवेयते (अव + ईयते), येन आत्मीयं वक्त्रं चतुरावलोकिनः अरालपद्मणः अस्य चक्षुषः चिरं लक्ष्यं न क्रियते॥ ४९ ॥

Hindi Translation :—(मैं) तेरे प्यारे को (उसकी) सुन्दरता के गर्व से ठगा हुआ समझता हूँ, जो कि अपने चेहरे को सुन्दर चितवन तथा टेढ़े रोमवाली इन (तेरी) आँखों का निशाना नहीं बनाता ॥ ४९ ॥

English Translation —I regard (thy) lover to be cheated by the pride of his beauty, who does not, for a long time, make his face the target for (thy) eyes of lovely glances and curved eye-lashes 49

Purport in Sanskrit :—त्वया काङ्क्षितो जनस्तु सत्यमेव विचित्रचरित्रवान्। स निजसौन्दर्यदर्पेण वृथैवात्यन्तं गर्वितो दृश्यते—अनेन कारणेनैव स तव प्रार्थनां प्रतीक्षमाणस्तव सम्मुखं नायाति। यदि हि स अत्रागमिष्यत् तर्हि तव मधुरावलोकनयुक्ते सुन्दररोमसहिते च नेत्रे विलोक्य नूनमेव हृतदर्पोऽभविष्यत् यथार्थसौभाग्यसुखञ्चाप्स्यत्। असत्येन सौभाग्यमदेन तस्येदं वास्तविकं सौभाग्यं प्रतिरुद्धमिति स वञ्चित एव मया मन्यते ॥ ४९ ॥

कियच्चिरं श्राम्यसि गौरि विद्यते
ममापि पूर्वाश्रमसंचितं तपः ।
तदर्धभागेन लभस्व काङ्क्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥ ५० ॥

कियदिति । हे गौरि । कियत् किं प्रमाणकम् । चिरं श्राम्यसि तपस्यसि । अत्यन्तसंयोगे द्वितीया । ममापि पूर्वाश्रमसंचितं पूर्वाश्रमः प्रथमाश्रमो ब्रह्मचर्याश्रमस्तत्र संचितं संपादितं तपः विद्यते । तदर्धभागेन अर्धश्चासौ भागश्च तेन तस्य तपसोऽर्धभागेनैकदेशेन काङ्क्षितं इष्टं वरं उपयन्तारं लभस्व । तं वरं साधु सम्यक् वेदितुं ज्ञातु इच्छामि च । यद्यसौ योग्यो भवति तदा ममापि संमतिरिति भावः ॥ ५० ॥

PROSE ORDER :—गौरि, कियच्चिरं श्राम्यसि ? पूर्वाश्रमसञ्चितं मम तपः अपि विद्यते, तदर्धभागेनकाङ्क्षितं वरं लभस्व, तं च साधु वेदितुं इच्छामि ॥ ५० ॥

NOTES :—कियत्—(किं+वतु) किं परिमाणमस्येति कियत् how much वतुप् is added and व of वतुप् is changed to घ by ‘ किमिदंभ्यां वो घः ’ पा० ५ २ ४० । घ is then changed to इय and किं is changed to कि before दृग्, दृश and वतु by ‘ इदंकिमोरीश्की ’ पा० ६ ३ ९० । चिरम् for a long time Accusative is used on account of ‘ कालाध्वनोरत्यन्तसंयोगे ’ पा० २.३ ५ । *i. e*, intransitive roots govern the Accusative of nouns denoting space or country, or duration of time and distance. श्राम्यसि —तपस्यसि to take pains ; to torture (the body) The

√श्रम् 'to fatigue' means 'to take rest' when preceded by वि। *Cf* विश्राम। पूर्वाश्रमसञ्चितं—पूर्वस्मिन् आश्रमे (ब्रह्मचर्याश्रमे) सञ्चितं पूर्वाश्रमसञ्चितं accumulated in the first stage of life तदर्धभागेन—अर्धःभागः अर्धभागः, तस्य अर्धभागः, तदर्धभागः, तेन by a half of it काङ्क्षित—(√काङ्क्ष्+क्तः) स्वाभिलषितं desired; of your choice वर—a bridegroom. तं—वरं *i e*. all about that bridegroom साधु—सम्यक्; पूर्णतया fully, properly. Adverb to वेदितुं—ज्ञातुं to know. Some commentators have interpreted the word तपः to mean body, which is a means of performing penance. They mean to say that Shiva had offered to make Parvati his own अर्द्धांगिनी *Cf.* 'तपः शब्दो लक्षणया तपः साधनभूतस्य शरीरस्य बोधकः, 'शरीरमाद्यं खलु धर्मसाधनम्' इत्युक्तत्वात्।' But, this seems to be far fetched 50

CHANGE OF VOICE :—गौरि, (त्वया) कियच्चिरं श्रम्यते? पूर्वाश्रमसञ्चितेन मम तपसा अपि विद्यते, तदर्धभागेन काङ्क्षितः वरः (त्वया) लभ्यताम्, स च (मया) साधु वेदितुं इष्यते ॥ ५० ॥

HINDI TRANSLATION :—हे पार्वति, कब तक तपस्या करोगी? प्रथमाश्रम में एकत्रित किया हुआ मेरा तप भी है, उसके आधे अंश से (तुम अपने) चाहे वर को प्राप्त कर लो, परन्तु उस (वर) को मैं पूरी तरह जानना चाहता हूँ ॥ ५० ॥

ENGLISH TRANSLATION —O Gauri, how long wilt thou practise penance? I too have penance (to my credit) practised in the first stage of life. Thou mayst

get the desired bridegroom by a half of it, him, however, I desire to know well 50

PURPORT IN SANSKRIT :—हे पार्वति ! त्वया दीर्घकालं तपस्या कृता, इदानीमितोऽधिकतपस्यायाः काप्यावश्यकता न दृश्यते। यदि चाधिकतपसैव तेऽभीष्टं साध्यं नहि ममापि ब्रह्मचर्याश्रमे कृतं तपोऽस्ति तस्यार्धमहं तुभ्यं दातुमुद्यतः, त्वं तत्सहायतया स्वेच्छितं वरं लब्धुं शक्नोषि। परं पूर्वमहं तस्य वरस्य विषये सर्वमपि ज्ञातुमिच्छामि ॥ ५० ॥

इति प्रविश्याभिहिता द्विजन्मना
मनोगतं सा न शशाक शंसितुम्।
अथो वयस्यां परिपार्श्ववर्त्तिनीं
विवर्त्तितानञ्जननेत्रमैक्षत ॥ ५१ ॥

इतीति। इति इत्थं द्विजन्मना द्विजेन प्रविश्य अन्तर्गत्वा। आत्मवद्रहस्यमुद्भाव्येत्यर्थः। अभिहिता उक्ता सा पार्वती मनोगतं हृदिस्थं वरं शंसितुं वक्तुं न शशाक समर्था नाभूत्। लज्जयेति शेषः। अथो अनन्तरं परिपार्श्ववर्त्तिनीं वयस्यां सखीं विवर्तितानञ्जननेत्रं विवर्तितं विचालितमनञ्जनं व्रतवशाद्वर्जितकज्जलं नेत्रं यस्मिन् कर्मणि तत्तथा ऐक्षत। नेत्रसंज्ञयैव प्रत्युत्तरं वाचयाञ्चकारेत्यर्थः ॥५१॥

PROSE ORDER :—द्विजन्मना प्रविश्य इति अभिहिता सा मनोगतं शंसितुं न शशाक, अथो परिपार्श्ववर्त्तिनीं वयस्यां विवर्तितानञ्जननेत्रं ऐक्षत ॥ ५१ ॥

NOTES :—द्विजन्मना—द्वे जन्मनी यस्य स द्विजन्मा, तेन (विप्रेण) by that Brahmana See notes on द्विजाति in the 40th verse above. प्रविश्य—अन्तर्गत्वा having entered into; having penetrated her mind or the secret of

her heart. अभिहिता—(अभि+√धा+क्त) कथिता being addressed The √धा 'to put on' comes to mean 'to say' when preceded by the preposition अभि। Note that धा changes into हि by 'दधातेर्हिः' पा० ७.४.४२। मनोगतं—मनसि गतं मनोगतं (हृदयस्थ भावं वरं वा) the desire or secret of her mind शंसितु—(√शंस्+तुमुन्) कथयितुं to relate, to disclose शशाक—समर्था अभूत् was able. It was evidently on account of modesty which is so natural for a high born maiden that Parvati could not frankly talk to the Bráhmana अथो—अनन्तरं Then It is an indeclinable difference from अथ, though means the same परिपार्श्ववर्तिनीं—(परिपार्श्व+√वृत्+णिनिः+ङीप्) परिपार्श्वे (समीपे) वर्त्तते इति परिपार्श्ववर्त्तिनी, ताम् who was by her side. वयस्यां—(वयस+यत्+आ) वयसा (आयुषा) तुल्या (समा) वयस्या (सखी) who is equal in age, *i e*, a lady-friend The suffix यत् is added by नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु' पा० ४.४.९१ । *i. e*, यत् is added to the words नौ, वयस् etc in the sense of तार्य (which can take to the other side of water), तुल्य (which is equal) etc विवर्तितानञ्जननेत्रम्—विवर्तित+अनञ्जन+नेत्रम् । अविद्यमानं अञ्जनं ययोः (नेत्रयोः) ते अञ्जने, विवर्तिते अनञ्जने नेत्रे यस्मिन् कर्मणि यथा भवति तथा विवर्तितानञ्जननेत्रम् having turned towards (her) the eyes devoid of collyrium ; *i e*, she made a sign to her friend by means of turning the eyes towards her to give a

reply to the enquiry of the Brahmana Parvati did not apply collyrium to her eyes, because ascetics are not permitted to do so The compound is an Adverb to प्रेक्षत—looked at 51

CHANGE OF VOICE :—द्विजन्मना प्रविश्य इति अभिहितया तया मनोगतं शंसितुं न शेके, अथो, परिपार्श्ववर्तिनी वयस्या विवर्तितानञ्जननेत्रं प्रेक्ष्यत ॥ ५१ ॥

HINDI TRANSLATION :—(उसके हृदय) की बात में घुस कर उस ब्राह्मण से पूछी हुई वह अपने मन की बात को न कह सकी । तब उसने अपने पास में स्थित सखी की ओर अञ्जनरहित नेत्रों को मोड़ कर देखा ॥ ५१ ॥

ENGLISH TRANSLATION — She, thus addressed by the Bráhmana, having entered (the secret of her heart), could not speak out the desire of her mind Then she looked at her friend, who was by her side, with eyes devoid of collyrium. 51

PURPORT IN SANSKRIT :—एवं स ब्राह्मण· पार्वतीं तस्या हार्दिकभावमपृच्छत्, परं सा लज्जावशात् स्वहृदयस्थं भावं कथयितुं समर्था नाभूत् । स्वयमुत्तरमदत्त्वैव स्वसमीपवर्त्तिनीं निजसखीं प्रति स्वायाञ्जनरहिताभ्यां नेत्राभ्यां दृष्ट्वा च तां शिवाय निवेदयितुं प्रेरयामास ॥ ५१ ॥

सखी तदीया तमुवाच वर्णिनं
निबोध साधो तव चेत्कुतूहलम् ।
यदर्थमम्भोजमिवोष्णवारणं
कृतं तपःसाधनमेतया वपुः ॥ ५२ ॥

सखीति । तस्याः पार्वत्या इयं तदीया सखी वयस्या तम् । 'वर्णः प्रशस्तिः' इति क्षीरस्वामी । सोऽस्यास्तीति वर्णिन ब्रह्मचारिणम् । 'वर्णाद्ब्रह्मचारिणि' इतीनिप्रत्ययः । उवाच ब्रूते स्म । किमिति । हे साधो विद्वन् तव कुतूहलं चेत् श्रोतुमस्तीति शेषः । तर्हि निबोध अवगच्छ । आकर्णयेत्यर्थः 'बुध अवगमने' इति धातोर्भौवादिकाल्लोट् । श्रोतव्यं किं तदाह—यस्मै लाभायेदं यदर्थम् । 'अर्थेन सह नित्यसमासः सर्वलिङ्गता चेति वक्तव्यम्' इति वार्तिकनियमात्क्रियाविशेषणम् । एतया पार्वत्या अम्भोजं पद्मम् उष्णवारणं आतपत्र इव वपुः शरीरं तपः साधनं कृतम् । तपःप्रवृत्तिकारणमुच्यते श्रूयतामित्यर्थः ॥ ५२ ॥

PROSE ORDER —तदीया सखी तं वर्णिनं उवाच, (हे) साधो, तव चेत् कुतूहलम् (तर्हि) निबोध, एतया यदर्थं अम्भोजं उष्णवारणमिव वपुः तपः साधनं कृतम् ॥ ५२ ॥

NOTES —तदीया—(तद्+छः+ईय+आ) तस्या इयं तदीया of her, i e, of Parvati See notes on तदीयं in the verse 21 वर्णिन—(वर्ण+इनिः=वर्णिन्) वर्णः (प्रशस्तिः) अस्यास्तीति वर्णिन्, तं वर्णिनं to the Brahmacharin ; an ascetic. The word वर्ण means प्रशस्तिः (freedom from carnal enjoyment—'वर्णः प्रशस्तिः) or वेदाध्ययनार्थं ब्रह्मचर्यम् (the first stage of life—Brahmacharya), or a particular colour *Cf* 'वर्णो द्विजादिशुक्लादियज्ञे गुणकथासु च स्तुतौ ना' इति मेदिनी । The suffix इनि is added to वर्ण by 'वर्णाद्ब्रह्मचारिणि' पा० ५ २.१३४ । When the meaning is other than ब्रह्मचारिन् this suffix will not be added and the form would be वर्णवान् । For the meaning of प्रशस्ति *Cf*. "स्मरणं कीर्त्तनं केलिः

प्रेक्षणं गुह्यभाषणम् । संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च । एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।" एतदष्टविधमैथुनाभावः प्रशस्तिः ।' साधो—साध्नोति परेषां कार्याणि इति साधुः, तस्य सम्बोधने साधो (सज्जन) O one who accomplishes another's business O sage ; noble sir Voc. sing of साधु कुतूहलं—Curiosity to know about the bridegroom desired by Parvati निबोध—जानीहि you may hear or know यदर्थं यस्मै इति यदर्थं for whom. The compound with अर्थ is a नित्यसमास and takes the gender and number of the noun it qualifies *Cf.* 'अर्थेन सह नित्यसमासः सर्वलिङ्गता चेति वक्तव्यम् ।' For the meaning of नित्यसमास (अविग्रहो नित्यसमासः अस्वपदविग्रहो वा) see notes on क्रियार्थं in verse 33 above. अम्भोजं—अम्भसि (जले) जात इति अम्भोजं a lotus Synonyms of अम्भोज may be had by adding ज to word meaning water. उष्णवारणं—उष्णस्य वारणं उष्णवारणम् (छत्रम्) warding off the sun ; an umbrella. तपःसाधनं—तपसः साधनं तपःसाधनं a means of practising religious austerities Just as people use a lotus leaf for warding off the sun so did Parvati employ her body to practise penance 52

CHANGE OF VOICE:—तदीयया सख्या स वर्णी ऊचे, (हे) साधो, चेत् तव कुतूहलं (तर्हि त्वया) निबुध्यताम्, एषा यदर्थं अम्भोजं उष्णवारणमिव वपुः तपःसाधनं कृतवती ॥ ५२ ॥

HINDI TRANSLATION :—उसकी सहेली उस ब्रह्मचारी से बोली—(हे) साधु, यदि तुम्हें उत्सुकता हो तो सुनो (या

जानो) जिस लिये इसने (अपने) शरीर को (उसी प्रकार) तप करने का साधन बनाया है जिस प्रकार कमल धूप दूर करने के लिये बनाया जाता है ॥ ५२ ॥

ENGLISH TRANSLATION —Her friend said to the ascetic—' O sage, if such be thy curiosity, thou mayst know then, for whom this lady has made her body a means of practising penance, as one makes a lotus (a means of) warding off the sun 52

PURPORT IN SANSKRIT :—ब्राह्मणजिज्ञासां दृष्ट्वा तस्या वयस्या ब्राह्मणं प्रत्युवाच—' हे महाशय, यदि ते महती जिज्ञासा तर्हि मया कथ्यमानं तत्प्रयोजनं शृणु यदर्थं अनया स्वशरीरं तथैव शीतातपादिसहने नियुक्तं यथा कश्चित्पुरुषस्तापदूरीकरणाय कमल-दलमेकं प्रयुङ्क्ते ॥ ५२ ॥

इयं महेन्द्रप्रभृतीनधिश्रिय-

श्चतुर्दिगीशानवमत्य मानिनी ।

अरूपहार्यं मदनस्य निग्रहात्

पिनाकपाणिं पतिमाप्तुमिच्छति ॥ ५३ ॥

' दृङ्मनःसङ्गसंकल्पा जागरः कृशताऽरतिः । ह्रीत्यागोन्माद-मूर्छान्ता इत्यनङ्गदशा दश । ' इति । तत्रास्याः काश्चिद्दशाः क्रम-मनादृत्यैव योजयति—इयमित्यादिभिः षड्भिःश्लोकैः—

इयमिति । मानिनी इन्द्राणीप्रभृतीरतिशय्य वर्तितव्यमित्य-भिमानवती इयं पार्वती अधिश्रियः अधिकैश्वर्यान् महेन्द्रप्रभृतीन् इन्द्रादींश्चतसृणां दिशामीशान् चतुर्दिगीशान् इन्द्रवरुणयम-कुबेरान् । ' तद्धितार्थ '—इत्यादिनोत्तरपदसमासः । अवमत्य

अवधूय मदनस्य निग्रहात् निवर्हणाद्धेतो । अकामुकत्वादित्यर्थः । रूपेण सौन्दर्येण हार्या वशीकरणीयो न भवतीति अरूपहार्यं पिनाकः पाणौ यस्य तं पिनाकपाणि हरम् । 'प्रहरणार्थेभ्यः परे निष्ठा-सप्तम्यौ भवतः' इति साधु । पति भर्तारं आप्तुं इच्छति । एतेन संकल्पावस्था सूचिता ॥ ५३ ॥

Prose Order :—मानिनी इयं अधिश्रियः महेन्द्रप्रभृतीन् चतुर्दिगीशान् अवमत्य मदनस्य निग्रहात् अरूपहार्यं पिनाकपाणि पति आप्तुं इच्छति ॥ ५३ ॥

Notes :—मानिनी—(मान+इनिः+ङीप्) मानोऽस्या अस्तीति मानिनी (अभिमानवती) a high-minded lady. अधिश्रियःअधिका श्रीः (ऐश्वर्य) येषां ते, अधिगता वा श्रीः यैस्ते, तान् अधिश्रियः pre eminently rich Acc. plural, Adjective of चतुर्दिगीशान् । महेन्द्रप्रभृतीन्—महांश्चासौइन्द्रः, महेन्द्रः, महेन्द्रः प्रभृतिः (आदि) येषां ते महेन्द्रप्रभृतयः, तान् महेन्द्रप्रभृतीन् the great Indra and others चतुर्दिगीशान्—(चतुर्दिक्+ईशान्) चतसृणां दिशां समाहारः चतुर्दिक्, तस्य ईशान्, Or simply चतसृणां दिशां ईशाः (स्वामिनः) चतुर्दिगीशाः, तान् the lords of all the four quarters. Indra, Varuna, Yama and Kubera are the lords of east, west, south and north respectively. The compound is an उत्तर-पदसमास by 'तद्धितार्थोत्तरपदसमाहारे च' पा० २.१.५१ । *i. e.*, words denoting a cardinal point or numerals may be compounded with any other noun when a Taddhita termination is to be affixed to the compound so formed, or when the compound itself becomes

the first member of another compound or when the compound forms a proper name अवमत्य—(अव + √मन् + क्त्वा—ल्यप्) अनादृत्य having disdained, not attaching any importance to them. मदनस्य—of Cupid. निग्रहात्—दण्डनात् by his punishing or destroying (Cupid) अरूपहार्यम्—(√हृ + ण्यत्) हर्त्तुं शक्यो हार्यः रूपेण हार्यः रूपहार्यः, न रूपहार्यः अरूपहार्यः तम् who cannot be conquered by means of beauty When Shiva could not be allured by Cupid, it is quite appropriate to say that he could not be conquered by physical charms This was the reason why Parvati wanted to win him over by the power of penance पिनाकपाणिम्—पिनाकः (धनुर्विशेषः) पाणौ यस्य स पिनाकपाणि (शिवः) तं who holds Pinàka in his hand, i e, Shiva Pinàka is the proper name of Shiva's bow 'पिनाकोऽस्त्री रुद्रचापे पांसुवर्षत्रिशूलयो.' इति मेदिनी । The Locatnee of पाणि is made the second member, instead of the first, of the compound by 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' । आप्तुं—अधिगन्तुं to obtain.

In this and the following five verses the poet has described some of the ten states of Pàrvati to which she was subjected because of her attachment for Shiva. These states are known as अनङ्गदशाः i. e, the various states of a person's mind and body when he is in love with somebody. They are—' दृङ्मनःसङ्गसंकल्पा जागरः कृशताऽरतिः । ह्रीत्यागोन्माद-

मूर्च्छान्ता इत्यनङ्गदशाः दश ॥' In this verse Parvati's सङ्कल्प *i. e.*, determination to obtain Shiva has been suggested. 53.

CHANGE OF VOICE :—मानिन्या अनया अधिश्रियः महेन्द्रप्रभृतीन् चतुर्दिगीशान् अवमत्य मदनस्य निग्रहात् अरूपहार्यः पिनाकपाणिः पतिः आप्तुं इष्यते ॥ ५३ ॥

HINDI TRANSLATION :—अभिमान वाली यह (पार्वती) अत्यधिक ऐश्वर्यशाली इन्द्रादि चारों दिशाओं के स्वामियों का अपमान करके, कामदेव को जलाने के कारण सुन्दरता से वश में न होने वाले (जाने गये) महादेव को पति (रूप में) प्राप्त करना चाहती है ॥ ५३ ॥

ENGLISH TRANSLATION :—This high-minded lady, disdaining the lords of the four quarters, the great Indra and others, highly refulgent, seeks to obtain as her husband the holder of the Pináka bow (*i. e*, Shiva) who is not to be conquered by beauty (as is evident) by his destruction of Cupid. 53

PURPORT IN SANSKRIT :—पर्वतराजस्य पुत्री गौरी इन्द्रादिषु देवेषु कमपि परीतुं न शक्नोति स्म, परमभिमानवती सा शिवं तेभ्योधिकं मन्यमाना ऐश्वर्यशालिन इन्द्रादीन् दिशामीशान् तिरस्कृत्य सर्वेषामधिपतिं शिवमेव स्वस्वामिनं कर्त्तुं कामयते, यो हि शिवः केनापि सौन्दर्येण वशीकर्त्तुमशक्यो यतः सोऽनुपमसौन्दर्यशालिनं काममपि भस्मसात् कृतवान् ॥ ५३ ॥

असह्यहुँकारनिवर्त्तितः पुरा
पुरारिमप्राप्तमुखः शिलीमुखः ।

इमां हृदि व्यायतपातमक्षिणो-
द्विशीर्णमूर्तेरपि पुष्पधन्वनः ॥ ५४ ॥

असह्येति। पुरा पूर्वं असह्यहुंकारनिवर्तितः असह्येन सोढुमशक्येन हुङ्कारेण रौद्रेण निवर्तितः। अतएव पुरारिं हरं अप्राप्तमुखः अप्राप्तफलः विशीर्णमूर्त्तेः नष्टशरीरस्य अपि पुष्पधन्वनः कामस्य शिलीमुखः बाणः इमां पार्वतीं हृदि व्यायतपातं व्यायतः। सुदूरावगाढ इति यावत्। तादृक्पातः प्रहारो यस्मिन् कर्मणि तत्तथा अक्षिणोत् अकर्शत्। दग्धदेहस्यापि मार्गणो लग्नः। 'मृदुः सर्वत्र बाध्यते' इति भावः। अनेन 'विवृण्वती शैलसुतापि भावम्' (३।६८) इत्यत्रोक्तं चक्षुः प्रीतिमनःसङ्गाख्यमवस्थाद्वयमनन्तरावस्थोपयोगितयानूद्य कार्श्यावस्था सूचिता ॥ ५४ ॥

PROSE ORDER :—पुरा विशीर्णमूर्त्तेः अपि पुष्पधन्वनः शिलीमुखः असह्यहुङ्कारनिवर्तितः पुरारिं अप्राप्तमुखः इमां हृदि व्यायतपातं अक्षिणोत् ॥ ५४ ॥

NOTES :—पुरा—पूर्वं formerly This refers to the time when Cupid vainly tried to allure Shiva and was ultimately reduced to ashes by him. विशीर्णमूर्त्तेः—(वि+√शॄ+क्तः) विशीर्णा (नष्टा) मूर्त्तिः यस्य स विशीर्णमूर्त्तिः, तस्य विशीर्णमूर्त्तेः whose body had been destroyed For विशीर्ण, see notes on this word in verse 28 above. अपि—still, *i. e.*, though Cupid had been physically destroyed, his arrow could still work. पुष्पधन्वनः—(पुष्प+धनुष्+अनङ्) पुष्पाण्येव धनुर्यस्य स पुष्पधन्‍ [illegible] न्वनः *Cf.* the Flower-bowed ; whos [illegible] of flowers. It is a

name of the god of love The word धनुष् at the end of a Bahuvrihi compound becomes धन्वन् by the addition of अनङ् by 'धनुषश्च' पा० ५ ४ १३२, when the compound is a noun the change is optional, hence its another form is पुष्पधनु । शिली-मुखः—शिली (शल्यं) मुखे यस्य स शिलीमुखः (बाणः) an arrow. It also means 'a black bee' 'अलिबाणौ शिली-मुखौ' इत्यमर । असह्यहुङ्कारनिवर्तितः । असह्य —(√सह्+यत्) सोढुं योग्यं सह्यं न सह्यं असह्यं which can not be borne हुङ्कारः—the sound hum (हुं) expressive of menace or contempt According to some Humkāra is the weapon of Shiva as Rudra. असह्येन हुङ्कारेण निवर्तितः असह्यहुङ्कारनिवर्तितः hurled back with the Humkāra sound. पुरारिं—पुराणां (दैत्यनगराणां) अरिं पुरारिम् (शिवं) the enemy of the cities, i e Shiva Shiva is known as पुरारि and त्रिपुरारि because he destroyed the three cities made of gold, silver and iron, in the sky, the ethereal region and on earth by the demon Maya and presided over by himself, Vidyunmàli and Tàrakásura अप्राप्तमुखः—अप्राप्तं मुखं (बाणाग्रं फलकं) यस्य सः whose point did not reach (Shiva), because it was returned on its way. इमाम्—पार्वतीम् । while Shiva remained invincible, Parvati fell a victim to the arrows of Cupid. व्यायतपातम्—(वि+आ+√यम्+क्तः=व्यायत. । √पत्+घञ्=पातः) विशेषेण आयतः व्यायतः (अति तीव्रः; दीर्घः) पातः (प्रहारः) यस्मिन्

कर्मणि यथा भवति तथा व्यायतपातम् with a cruel blow; so as to make a deep wound An Adverb to अविणोत् —विव्याध struck. Imperfect (लङ्) of √क्षि हिंसायाम्।

In this verse the three states, *viz*, दृक्सङ्ग (attachment through eyes), मनःसङ्ग (attachment through mind) and कृशता (leanness) of Parvati have been suggested by the poet. 54

Change of Voice :—पुरा विशीर्णमूर्त्तेः अपि पुष्पधन्वनः शिलीमुखेन असह्यहुङ्कारनिवर्तितेन पुरारिं अप्राप्तमुखेन इयं हृदि व्यायतपातं अक्षीयत ॥ ५४ ॥

Hindi Translation :—पहिले समय में नष्ट शरीर वाले भी पुष्प के धनुष वाले (कामदेव) के बाण ने, जो कि (शिव की) न सहने योग्य हुङ्कार से लौटा दिया गया था और महादेव तक जिसकी नौक नहीं पहुँच पायी थी, इसके हृदय में गहरा घाव कर दिया ॥ ५४ ॥

English Translation —Formerly, although his body had been destroyed, the arrow of the Flower-bowed (*i e.*, Cupid) which was hurled back with the Hunkara sound, difficult to be borne (and) whose point failed to reach the enemy of the cities (*i e*, Shiva), struck her in the heart with a cruel blow 54

Purport in Sanskrit —पूर्वस्मिन् काले कन्दर्पः शिवं विजेतुं तस्योपरि स्वबाणममुञ्चत् परं स बाणस्तेन गम्भीरेण हुंशब्देन परावर्तितः कामश्च दग्धः, ततो नष्टस्यापि कामस्य बाणः कोमलहृदयामिमां पार्वतीं हृदयेऽतितीव्रतया विव्याध ।

This verse suggests Parvati's अरति (indifference towards worldly pleasures) or सज्वर (fever caused by passion) 55

CHANGE OF VOICE :—तदा प्रभृति पितुः गृहे उन्मदनया ललाटिकाचन्दनधूसरालकया बालया तुपारसंघातशिलातलेष्वपि जातु निर्वृति न लभ्यते स्म ॥ ५५ ॥

HINDI TRANSLATION .—तभी से लेकर पिता के घर में उत्कट काम वाली, माथे के तिलक के चन्दन से सफ़ेद बालों वाली वह युवती बर्फ़ की चट्टानो पर भी सुख न पाती थी ॥ ५५ ॥

ENGLISH TRANSLATON .—Since then the maiden, whose passion had been greatly excited, (and) whose curling tresses were whitened by the sandal applied as a mark on the forehead, never felt at ease even when reclining on the surfaces of snow-slabs while in her father's house 55

PURPORT IN SANSKRIT .—तस्मादेव कालात् शिवप्राप्त्यै समुत्सुका कामेनातितरां पीडिता पार्वती स्वजनकस्य हिमालयस्यापि शीतप्रधाने भवने शान्ति नालभत , हिमशिलासु शयनमपि तद्दाहं शमयितुं नाशक्नोत् । तापशान्तये तस्याः मस्तके लिप्तं चन्दनञ्च क्षणादेव शुष्कं सत् तत्केशान् धूसरवर्णान् अकरोत् । गौरी नितरां कामपीडितासीत् तस्यास्तापशान्त्यै कृताश्चन्दनलेपादिरूपा उपचारा व्यर्था एवाभवन् इति भावः ॥ ५५ ॥

उपात्तवर्णे चरिते पिनाकिनः

सबाष्पकण्ठस्खलितैः पदैरियम् ।

अनेकशः किंनरराजकन्यका
वनान्तसंगीतसखीररोदयत् ॥ ५६ ॥

उपात्तेति । इयं पिनाकिनः शम्भोः चरिते त्रिपुरविजयादिचेष्टिते उपात्तवर्णे प्रारब्धगीतक्रमे । ' गीतक्रमे स्तुतौ वेदे वर्णशब्दः प्रयुज्यते ' इति हलायुधः । सबाष्पकण्ठस्खलितैः सबाष्पे गद्गदे कण्ठे स्खलितैः विशीर्णैः पदैः सुप्तिङन्तरूपैः । करणैः वनान्तसंगीतसखीः वनान्ते संगीतेन निमित्तेन सखीर्वयस्याः किंनरराजकन्यकाः अनेकशः बहुशः अरोदयत् अश्रुमोक्षमकारयत् । हरिचरितगानजनितमदनवेदनामेनां वीक्ष्य किंनर्योऽपि रुरुदुरिति भावः । अत्र वर्णस्खलनलक्षणकार्योक्त्या पुनः पुनस्तत्कारणीभूतमूर्च्छावस्थाप्रादुर्भावो व्यज्यतेऽन्यथा सखीरोदनानुपपत्तेरिति । द्वादशावस्थापक्षे तु प्रलापावस्था व्यज्यते । प्रलापो गुणकीर्त्तनम् ' इत्यालकारिकाः ॥ ५६ ॥

Prose Order :—इयं पिनाकिनः चरिते उपात्तवर्णे (सति) सबाष्पकण्ठस्खलितैः पदैः वनान्तसंगीतसखीः किंनरराजकन्यकाः अनेकशः अरोदयत् ॥ ५६ ॥

Notes :—पिनाकिनः—(पिनाक + इनि) पिनाकः अस्यास्तीति पिनाकिन्, तस्य पिनाकिनः of the wielder of the Pinaka See notes on पिनाकपाणि in verse 53 पिनाकिनः चरिते the exploits of the Pinaka- holder (*i. e*, Shiva) such as the destruction of the three cities of demons etc उपात्तवर्णे । उपात्तः—(उप + आ + √दा + क्त = उपात्तः) गृहीतः, आरब्धः begun. Past part of √ दा with आ ' to take ' वर्णः—गीतिक्रमः letters; the arrangement of words in a song ' शुक्लादौ ब्राह्मणादौ च शोभायामक्षरे

तथा । गीतिक्रमे स्तुतौ वेषे वर्णशब्द प्रयुज्यते । ' इति हलायुधः । उपात्त वर्णः यस्मिन् स उपात्तवर्णः, तस्मिन् begun to be sung in due order. After this सति is understood. सबाष्पकण्ठस्खलितैः—बाष्पेण सह वर्त्तमानः सबाष्पः (गद्गदः) सबाष्पे कण्ठे स्खलितैः (अस्पष्टोच्चारितैः) सबाष्पकण्ठस्खलितैः faltering (*i e.*, inarticulate) in the throat choking with tears. Evidently Parvati was moved while singing the heroic feats of Shiva पदैः—by her words. वनान्तसंगीतसखीः—वनान्ते (वनप्रदेशे) संगीते संगीतेन वा सख्यः वनान्तसंगीतसख्यः, ताः वनान्तसंगीतसखीः (Acc. plural) Companions in the songs sung in the forest plots संगीत is Past part. from √ गै to sing गै is changed to गी by ' घुमास्थागापाजहातिसां हलि ' पा० ६ ४.६६ । किन्नरराजकन्यकाः—किन्नराणां राजा किन्नरराजः, किन्नरराजस्य कन्यकाः किन्नरराजकन्यका , ताः (Acc. plural) the daughters of the Kinnara king किन्नरs in later mythology are reckoned among the Gandharvas or celestial choristers and celebrated as musicians In कन्यकाः (कन्या+कन्) the कन् suffix is in स्वार्थे (*i e*; its presence does not cause any change in the meaning of the word), so कन्या. एव कन्यकाः । Parvati, being herself a princess could make friends only with princesses. अनेकशः—एकं एकं इति एकशः (एक+शस्) ; न एकशः अनेकशः (बहुशः) many a time ; in numbers. शस is added to numerals when repetition is made by ' संख्यैकवचनाच्च वीप्सायाम् ' पा० ५.४.४३. । अरोदयत्—(√रुद्

णिच्+लङ्) made them weep. Causal Imperfect of √रुद्।

In this verse there is a reference to मूर्छावस्था (the state of being unconscious) or, according to others प्रलापावस्था (*i. e.*, singing in praise of one's beloved). 56.

CHANGE OF VOICE :—अनया पिनाकिनः चरिते उपात्तवर्णे सवाष्पकण्ठस्खलितैः पदैः वनान्तसंगीतसख्यः किन्नरराजकन्यकाः अरोद्यन्त ॥ ५६ ॥

HINDI TRANSLATION :—महादेव की वीरता के गीतों के गाने पर यह अश्रुसहित (गद्‌गद) कण्ठ से अस्पष्ट निकलने वाले शब्दों के द्वारा वन प्रदेश में साथ गाने वाली अपनी सहेलियों, किन्नर राजाओं की कन्याओं को बार बार रुलाती थी ॥ ५६ ॥

ENGLISH TRANSLATION :—She made many a time the daughters of the Kinnara kings, her companions in the music (sung) in the woods, burst into tears, by her words, faltering in the throat choking with tears, while the exploits of the Pinaka-holder were being sung 56

PURPORT IN SANSKRIT :—शिवप्रीतिमग्ना पार्वती वनप्रदेशेषु गत्वा शिवस्तुतिगीतान्यगायत्, परं मध्य एव शिवविषयकभावेनाभिभूता गद्‌गदकण्ठाभूत् गातुञ्चासमर्था अश्रुपूर्णनेत्रावर्तत। तस्या इमां करुणां दशाञ्चावलोक्य किन्नराणां राजपुत्र्यस्तत्सख्योऽत्यन्तं अरोदिषुः ॥ ५६ ॥

त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ व्रजसीत्यलक्ष्यवा—
गसत्यकण्ठार्पित बाहुबन्धना ॥ ५७ ॥

त्रिभागेति । च किं च इति चार्थः । त्रिभागशेषासु शिष्यते इति शेषः । कर्मणि घञ् । त्रिभ्यो भागेभ्य शेषास्ववशिष्टासु । यद्वा रात्रेस्त्रियामत्वेन प्रसिद्धत्वात् तृतीयो भागस्त्रिभागः संख्या शब्दस्य वृत्तिविषये पूरणार्थत्वमिष्यते । यथा शतांशः सहस्रांश इति । त्रिभागः शेषो यासां तासु निशासु क्षणं क्षणमात्रं नेत्रे निमील्य मोलयित्वा सहसा सद्यः हे नीकलण्ठ क्व व्रजसि कुत्र गच्छसि इति अलक्ष्यवाक् अलक्ष्या निर्विषया वाग्वचनं यस्याः सा तथोक्ता । तथा असत्यकण्ठार्पितबाहुबन्धना असत्ये मिथ्याभूते कण्ठे अर्पित बाहुबन्धन यस्याः सा तथा सती व्यबुध्यत विबुद्धवती । एतेन जागरोन्मादौ सूचितौ ॥ ५७ ॥

Prose Order :—(किं) च त्रिभागशेषासु निशासु क्षणं नेत्रे निमील्य सहसा (हे) नीलकण्ठ, क्व व्रजसि इति अलक्ष्यवाक् असत्यकण्ठार्पितबाहुबन्धना व्यबुध्यत ॥ ५७ ॥

Notes :—त्रिभागशेषासु—शिष्यते इति शेषः (√शिष्+घञ्) what is left The comp. त्रिभागशेषासु may be expounded and interpreted in two different ways. (i) त्रिभ्यो भागेभ्यः शेषासु त्रिभागशेषासु (उत्तरपदे द्विगुः) what was left of nights after their three parts had passed, *i. e.* during the fourth part of the night. In this case the night is divided into four

parts or quarters (ii) तृतीयो भागः त्रिभाग, त्रिभागः शेषो यासां ता त्रिभागाः, तासु in the nights of which only the third part was left Here a night is divided into three parts or watches, (*Cf* The word त्रियामा त्रयो यामाः यस्याः सा—a night), and the word त्रि is taken in the sense of the ordinal तृतीय, just as शत and सहस्र are ordinals in the words शतांशः (=शततमांशः) and सहस्रांशः (=सहस्रतमांशः) । Parvati could not get sound sleep during the whole of night and she was generally awakened by her thoughts about Shiva during the last part of the night निमील्य—(नि+√मील् to close+ल्यप्) having shut क्षणं नेत्रे निमील्य—*i e.*, having slept for a little while. When preceded by उत्, √मील् means 'to open', *e g*, उन्मीलन । सहसा—अकस्मात् all of a sudden नीलकण्ठ—नील कण्ठो यस्य स नीलकण्ठ, तस्य संबोधने O thou of azure neck ; blue-necked Shiva is called Nílakantha because his neck had become black by swallowing the poison produced at the churning of the ocean 'क व्रजसि'—'where art thou going?' such were the cries uttered by Parvati in the subconscious state of her mind. अलक्ष्यवाक्—अविद्यमानं लक्ष्यं यस्याः सा अलक्ष्या (Adj of वाक्) ; अलक्ष्या वाग् यस्याः सा अलक्ष्यवाक् (Adj. of Parvati) whose speech was uttered without a particular aim or without there being any person present to whom the words could be

addressed, *i e.* whose cries were incoherent. असत्य-कण्ठार्पितबाहुबन्धना—न सत्य. असत्यः (अविद्यमान.); असत्ये कण्ठे अर्पितं (दत्तं) बाह्वो बन्धनं यया सा, having her arms thrown tight round an imaginary neck. Although there was no person at the time near about Parvati, yet she used to address words as if to some person present there and to throw her arms for embracing the person imagined to be present. व्यबुध्यत—(वि+√बुध to get up+लङ्) woke up

This verse is quoted in the Sahityadarpana as an instance of प्रलाप (अलक्ष्यवाक् प्रलापः स्याच्चेतसो भ्रमणाद् भृशम्) । According to Mallinátha it describes जागर (absence of sleep) and उन्माद (madness, in which incoherent words are uttered). 57.

Change of Voice :—(किं) च, त्रिभागशेषासु निशासु क्षणं नेत्रे निमील्य सहसा (हे) नीलकण्ठ ! (त्वया) क व्रज्यते, इति अलक्ष्यवाचा असत्यकण्ठार्पितबाहुबन्धनया (अनया) व्यबुध्यत ॥ ५७ ॥

Hindi Translation :—और, रात्रि के तीसरे (या चौथे) भाग के शेष रह जाने पर, मुहूर्त्तमात्र के लिये आँखों को बन्द करके (अर्थात् सो कर) अकस्मात् ‘ हे नीलकण्ठ (शिव) ! कहाँ जाते हो ?’ इस प्रकार असंगत वाणी बोलती हुई (तथा) एक काल्पनिक गले में ही अपने बाहुओं को लपेटती हुई जग पड़ती थी ॥ ५७ ॥

English Translation —Moreover, at night, when its third (or fourth) part only remained, she, having

closed her eyes for a moment, all of a sudden woke up with cries without a listener such as 'O thou of blue neck, where dost thou go ?' (and) having her arms thrown tight round an imaginary neck 57

PURPORT IN SANSKRIT :—शिवेऽत्यन्तमनुरक्ता पार्वती दिवानिशं तमेव ध्यायन्ती रात्रावपि गाढनिद्रामलभमाना स्वल्पशयनानन्तरमेव अकस्मादेव विबुध्यते स्म, उन्मादाभिभूता चाविद्यमानमपि शिवं लक्ष्यीकृत्य 'हे शिव ! त्वं कुत्र गच्छसि ? किमर्थं मत्समीपं नायासि ?' इत्यादिकमालपन्ती काल्पनिकं शिवमालिङ्गितुञ्च तस्य ग्रीवां परितः स्वबाहू प्रसारयति स्म ॥ ५७ ॥

यदा बुधैः सर्वगतस्त्वमुच्यसे
न वेत्सि भावस्थमिमं कथं जनम् ।
इति स्वहस्तोल्लिखितश्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखरः ॥ ५८ ॥

स्वप्नसादृश्यप्रतिकृतिदर्शनतदङ्गस्पृष्टस्पर्शाख्याश्चत्वारो विरहिणां विनोदाः । तत्र स्वप्नसंदर्शनमुक्त्वा प्रतिकृतिदर्शनमाह-यदेति । यदा यत इत्यर्थः । 'यदेति हेतौ' इत्युक्त्वा गणव्याख्यानेऽस्योदाहृतत्वात् । त्वं बुधैः मनीषिभिः सर्वगतः सर्वव्यापीति उच्यसे । तत इत्यध्याहारः । भावे रत्याख्ये तिष्ठतीति भावस्थम् । त्वय्यनुरागिणमित्यर्थः । इमं जनम् । इममित्यात्मनिर्देशः । कथं न वेत्सि न जानासि । इति मुग्धया मूढया । अकिञ्चित्करश्चित्रगतोपालम्भ इत्यजानानयेत्यर्थः । तया स्वहस्तोल्लिखितः स्वहस्तेनोल्लिखितश्चित्रे लिखितः चन्द्रशेखरः रहसि एकान्ते । सखीमात्रसमक्षमित्यर्थः । उपालभ्यत साधिक्षेपमुक्तः च । उक्तसमुच्चयार्थश्च-

कार । यद्यपि रहसीत्युक्तं तथापि सखीसमक्षकरणाल्लज्जात्यागो व्यज्यत एव ॥ ५८ ॥

PROSE ORDER :—यदा त्वं बुधैः सर्वगतः उच्यसे (ततः) भावस्थं इमं जनं कथं न वेत्सि ? इति मुग्धया (अनया) स्वहस्तोल्लिखितः चन्द्रशेखरः रहसि उपालभ्यत ॥ ५८ ॥

NOTES —यदा—when Some books read सदा for यदा । बुधैः—(√बुध्+कः) पण्डितैः by the wise सर्वगतः—सर्वं गतः (प्राप्तः) सर्वगतः (सर्वान्तर्यामी) all-pervading; omnipresent The compound is द्वितीयातत्पुरुष by 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' पा० २.१.२४। उच्यसे—कथ्यसे is said or known Passive present second pers. sing of √वच् 'to speak' भावस्थं—(√स्था+क) भावे (अनुरागे) तिष्ठतीति भावस्थः, तम् (त्वदनुरागिणम्) being in love (with you); who is love-smitten; enamoured क is added by 'सुपि स्थः' पा० ३.२.४। The compound is an instance of उपपदसमास i e, in which the second member of a Tatpurusha Comp is a root noun derived from a root which takes a particular Krit affix (here कः) by virtue of the presence of the first member. इमं जनम्—i e, Párvati मुग्धया—(√मुह् to be foolish; to faint+क्तः। ह् is changed to घ् and then to ग्, and त to ध) by the foolish; innocent. Párvati has been rightly termed so, because she being love-smitten did not realize that it was of little avail to talk to a picture. In the books on rhetoric मुग्धा is a variety of नायिका।

स्वहस्तोल्लिखितः । उल्लिखितः—(उत्+√लिख्+क्तः) चित्रितः painted or drawn. स्वेन हस्तेन उल्लिखितः स्वहस्तोल्लिखित drawn with her own hand चन्द्रशेखरः—चन्द्रः शेखरो यस्य or चन्द्रः शेखरे यस्य सः moon-crested i e, Shiva It is well-known that Shiva bears the crescent moon on his forehead. रहसि—एकान्ते in private उपालभ्यत—(उप+√लभ्+य+लङ्) अधिक्षिप्यते स्म was upbraided; scolded √लभ् when preceded by उप+आ means ' to reproach, to censure. '

" Drawing the beloved's picture is one of the four ways by which lovers in separation beguile longing " The other three ways are स्वप्नदर्शन, सादृश्यदर्शन and तदङ्गस्पृष्टस्पर्श । *Cf* "वियोगावस्थासु प्रियजनसदृक्षानुभवनं, ततश्चित्रं कर्म स्वपनसमये दर्शनमपि । तदङ्गस्पृष्टानामुपगनवतां स्पर्शनमपि, प्रतीकारः कामव्यथितमनसां कोऽपि कथितः । ' Of the ten states of lovers caused by love-affliction this verse refers to ह्रीत्यागः (abandonment of modesty). 58.

CHANGE OF VOICE :—यदा त्वां बुधाः सर्वगतं ब्रुवन्ति (ततः) भावस्थः अयं जनः (त्वया) कथं न वेद्यते ? इति मुग्धा (सा) स्वहस्तोल्लिखितं चन्द्रशेखरं रहसि उपालभत ॥ ५८ ॥

HINDI TRANSLATION :—' जब कि ज्ञानी लोग तुम्हें सर्वव्यापक बताते हैं तो अपने प्रेमी इस व्यक्ति को तुम क्यों नहीं जानते ? ' इस प्रकार वह (प्रेम में) भोली (पार्वती)

अपने हाथ से चित्रित महादेव को, एकान्त में, उलाहना देती थी ॥ ५४ ॥

English Translaton :—" When, thou art declared to be all-pervading by the wise ; how, dost thou know not this person in love with you ?" thus was the moon-crested (Shiva), drawn with her own hand, upbraided in private by this foolish girl. 58.

Purport in Sanskrit :—निजमनोविनोदार्थं पार्वती स्वप्रियस्य शिवस्य चित्रमुल्लिख्य तेन सह नानाप्रकारेण वार्त्तालापं विदधत्यकथयत्—यत् 'हे शिव ! विद्वांसो जनास्त्वां सर्वव्यापकं कथयन्ति, तर्हि त्वं मम हृदये विद्यमानोऽपि स्वविषयकं मेऽनुरागं कथं न जानासि ?' ॥ ५८ ॥

यदा च तस्याधिगमे जगत्पते-
रपश्यदन्यं न विधिं विचिन्वती ।
तदा सहास्माभिरनुज्ञया गुरो-
रियं प्रपन्ना तपसे तपोवनम् ॥ ५९ ॥

यदेति । जगत्पतेः तस्य ईश्वरस्य अधिगमे प्राप्तौ अन्यं विधिं उपायं विचिन्वती मृगयमाणा यदा न अपश्यत् तदा इयं पार्वती गुरोः पितुः अनुज्ञया अस्माभिः सह तपसे तपश्चरितुं तपोवनं प्रपन्ना प्राप्ता च ॥ ५९ ॥

Prose Order :—(अथ) च जगत्पतेः तस्य अधिगमे विचिन्वती यदा अन्यं विधिं न अपश्यत्, तदा गुरोः अनुज्ञया अस्माभिः सह तपसे तपोवनं प्रपन्ना ॥ ५९ ॥

Notes :—जगत्पतेः—जगतां (संसारस्य) पतिः जगत्पतिः, तस्य जगत्पतेः of the Lord of the worlds. Compound

nouns ending in पति are declined like हरि; hence जगत्पतेः and not जगत्पत्युः। अधिगमे—(अधि+√गम्+अप्) प्राप्तौ to obtain; to win over. √गम् with अधि means 'to obtain.' विचिन्वती—वि+√चिञ्+शतृ+ङीप्) मृगयमाणा searching hard. विधि—उपायं a means. Mark that विधि is Masculine and so are the words formed with the suffix किः *e. g.*, उद्धि etc. गुरोः—पितुः of her father. गुरुः गीष्पति पित्राद्यौ' इत्यमरः। अनुज्ञया—आज्ञया with permission or consent. This is mentioned in verse 6 above. तपसे—तपः कर्तुं to practise penance. The Dative is used in the sense of infinitive. See notes on क्रियार्थं in verse 33. प्रपन्ना—(प्र+√पद्+क्तः) प्राप्ता ; आगता came. 59.

Change of Voice :—(अथ) च जगत्पतेः तस्य अधिगमे विचिन्वत्या (तया) यदा अन्यः विधिः न अदृश्यत, तदा गुरोः अनुज्ञया (अनया) अस्माभिः सह तपसे तपोवनं प्रपन्नम् ॥ ५९ ॥

Hindi Translation :—फिर, जब संसार के स्वामी (शिव) की प्राप्ति के लिये खोज करती हुई (उसने) कोई दूसरा उपाय न देखा, तब पिता जी की आज्ञा लेकर तप करने के लिये हमारे साथ इस तपोवन में आगयी ॥ ५९ ॥

English Translation :—At last, when she searching hard to obtain the Lord of the worlds could find no other way, (she) with the permission of her father came with us to this penance forest for practising penance. 59.

PURPORT IN SANSKRIT :—संसारस्वामिन शिवस्य प्राप्त्यर्थं सा नानाविधानुपायानकरोत्, परं सर्वेषूपायेषु विफलेषु सत्सु 'सर्वमपि तपसाधिगम्यम्' इति विचारयन्ती पार्वती पितुराज्ञामादाय स्वसखीभिरस्माभिः सार्धं तप आचरितुमिदं तपोवनमागता ॥ ५९ ॥

द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याः शशिमौलिसंश्रयः ॥ ६० ॥

द्रुमेष्विति । सख्या पार्वत्या स्वयं कृतजन्मसु कृतं जन्म येषां तेषु । स्वयं रोपितेष्वित्यर्थः । तपःसाक्षिषु तपसः साक्षिषु साक्षात् द्रष्टृषु एषु द्रुमेषु अपि फलं दृष्टं लब्धम् । जनितमित्यर्थ । अस्याः पार्वत्याः च शशिमौलिसंश्रय चन्द्रशेखरविषयः मनोरथः तु प्ररोहाभिमुखः अङ्कुरोन्मुखः अपि न दृश्यते । 'प्ररोहस्त्वङ्कुरः' इति वैजयन्ती । स्वयं रोपितवृक्षफलकालेऽप्यस्या मनोरथस्य नाङ्कुरोदयोऽप्यस्ति । फलाशा तु दूरापास्तेत्यर्थ ॥ ६० ॥

PROSE ORDER :—सख्या स्वयं कृतजन्मसु तपःसाक्षिषु एषु द्रुमेषु अपि फलं दृष्टम्, शशिमौलिसंश्रयः अस्याः मनोरथः च प्ररोहाभिमुखः अपि न दृश्यते ॥ ६० ॥

NOTES :—सख्या—by our friend Parvati कृतजन्मसु-कृतं जन्म येषां ते, तेषु which were given birth to, which were planted (by her) तपःसाक्षिषु—तपः साक्षिषु which have been the witness of her penance. For the word साक्षिन् see notes on तपःसाक्ष्ये in verse 25

above. The trees have been described as witnesses of Parvati's penance because they were planted just on her arrival in the forest and because they remained by her side day and night during the practice of penance शशिमौलिसंश्रयः। शशिमौलिः—शशः अस्यास्तीति शशी (शश+इनिः) चन्द्रः, शशी मौलौ (मस्तके) यस्य or शशी मौलिः (शेखर) यस्य स शशिमौलिः (शिव) the moon-crested, *i e*, Shiva The word मौलि means 'head' as well as 'a crest', hence the compound may be expounded in both the ways संश्रयः—(सं+√श्रि +अच्) संश्रीयते इति संश्रयः (अवलम्बः) basis, support. शशिमौलिः संश्रया यस्य स शशिमौलि संश्रय which has as its basis the moon-crested God मनोरथः—अभिलाषः desire, craving of her heart *i e* the longing to win Shiva प्ररोहाभिमुखः। प्ररोहः—(प्र+√रुह्+घञ्) प्ररोहतीति प्ररोहः (अङ्कुरः) a sprout ' प्ररोहस्त्वङ्कुरः ' इति वैजयन्तीकोशः । प्ररोहस्य अभिमुखः प्ररोहाभिमुखः towards sprouting; about to sprout न दृश्यते— *i e* does not seem to be showing signs of sprouting, she has not even a distant hope of the fulfilment of her object. The contrast between the plants and the desire of Parvati is really poetic. 60

CHANGE OF VOICE :—सख्या स्वयं कृतजन्मसु तपः साक्षिषु एषु द्रुमेषु अपि (वयं) फलं दृष्टवन्तः, (परं) शशिमौलिसंश्रयं अस्याः मनोरथं च प्ररोहाभिमुखं अपि न पश्यामः ॥ ६० ॥

HINDI TRANSLATION :—हमारी सहेली द्वारा अपने आप लगाये हुए, तप के साक्षीभूत इन वृक्षों में भी फल लग गये, (परन्तु) शिव सम्बन्धी इसकी इच्छा अभी अङ्कुरित होने वाली भी नहीं दीखती ॥ ६० ॥

ENGLISH TRANSLATION :—Fruits have been seen even on these trees which were planted by our friend herself and which have been the witnesses of her austerities, but the longing of her heart, which has for its basis the moon-crested God, does not seem even about to sprout. 60.

PURPORT IN SANSKRIT :—तपश्चरन्त्या अस्याः पार्वत्या दीर्घः कालो जातः । अत्रागत्य चानया स्वहस्तेनैव ये वृक्षा आरोपितास्ते फलिताः दृश्यन्ते, परमेतावत्तपस्याचरणानन्तरमपि शिवसम्बन्धिनी अस्याः भावना लेशमात्रमपि साफल्योन्मुखी न दृश्यते ॥ ६० ॥

न वेद्मि स प्रार्थितदुर्लभः कदा
सखीभिरस्रोत्तरमीक्षितामिमाम् ।
तपःकृशामभ्युपपत्स्यते सखीं
वृषेव सीतां तदवग्रहक्षताम् ॥ ६१ ॥

नेति । प्रार्थितः सन्दुर्लभः प्रार्थितदुर्लभः स देवः तपःकृशां तपसा कृशां क्षीणां अतएव सखीभिः अस्रोत्तरं अश्रुप्रधानं यथा भवति तथा ईक्षितां इमां नः सखीं तदवग्रहक्षतां तस्येन्द्रस्यावग्रहेणाना-वृष्ट्या क्षतां पीडिताम् । 'वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ' इत्यमरः । 'अवे ग्रहो वर्षप्रतिबन्धे' इत्यप् प्रत्ययः । सीतां कृष्ट-भुवम् । 'सीता लाङ्गलपद्धतिः' इत्यमरः । वृषा वासवः इव ।

'वास्तवो वृत्रहा वृषा ' इत्यमरः। कदा अभ्युपपत्स्यते कदा अनुग्रहीष्यति न वेद्मि। अत्र वाक्यार्थः कर्म। तदवग्रहक्षतामित्यत्राव-ग्रहक्षतामित्यनेनैव गतार्थत्वे तत्पदस्य वैयर्थ्यापत्तेस्तदिति भिन्नं पदं वेद्मीत्यस्य कर्मेति युक्तमुत्पश्यामः ॥ ६१ ॥

PROSE ORDER :—प्रार्थितदुर्लभः सः तपःकृशां सखीभिः अस्त्रोत्तरं ईक्षितां इमां सखीं तदवग्रहक्षतां सीतां वृषा इव कदा अभ्युपपत्स्यते (इति) न वेद्मि ॥ ६१ ॥

NOTES .—प्रार्थितदुर्लभः—(प्र+√अर्थ्+क्तः । दुर्+√लभ्+खल्) प्रार्थितश्चासौ दुर्लभश्च इति प्रार्थितदुर्लभः who is difficult to be obtained though sought after. This is a reply to ' भविष्यति प्रार्थितदुर्लभः कथम् ? ' in verse 46 above सः—शिवः। तपःकृशां—तपसा कृशा तपःकृशा, ताम् emaciated by austerities कृश—(√कृश+क्त) Past Part of √कृश् It is formed irregularly by dropping क्तः। अस्त्रोत्तरम्—अस्त्रं (अश्रु) उत्तरं (प्रधानं) यस्मिन् कर्मणि तद् अस्त्रोत्तरम् or अस्त्रैः उत्तरं यथा स्यात् तथा अस्त्रोत्तरम् with tears ईक्षिताम्—दृष्टाम् seen तदवग्रहक्षताम्। अवग्रहः—(अव+ग्रह्+अप्) वर्षप्रतिबन्धः drought. ' वृष्टिर्वर्षं तद्विघातेऽवग्रहावग्रहौ समौ ' इत्यमरः। The अप् suffix is optionally added by ' अवे ग्रहो वर्षप्रतिबन्धे ' पा० ३. ३ ५१. The other form is अवग्राहः which is formed by adding घञ् तस्य (इन्द्रस्य) अवग्रहेण क्षतां (पीडितां) तदवग्रहक्षताम् distressed by his holding off the rain As अवग्रह means ' absence of rain ' there is no use saying तद् अवग्रह, so Mallinatha takes तद् separately as the object of न वेद्मि But this seems

to be far-fetched तद् is a part of the compound and it refers to वृषन् सीतां—लाङ्गलरेखा ; कर्षां भुवम् a furrow or line of a plough-share, hence ploughed land ' सीता लाङ्गलरेखा स्याद् व्योमगङ्गा च जानकी । वृषा—वर्षति इति वृषा the showerer, Indra ; the god of rain. ' वासवा वृत्रहा वृषा ' इत्यमरः । अभ्युपपत्स्यते—अनुग्रहीष्यति will favour. अभि+उप्+√पद् means 'to favour ' ; to confer a benefit or kindness The whole sentence from प्रार्थितदुर्लभ. to अभ्युपपत्स्यते is the object.

In the verse Shiva has been compared to Indra and Parvati to the earth Just as the earth is distressed by the stoppage of the rain so was Parvati suffering from the indifference of Shiva

CHANGE OF VOICE :—प्रार्थितदुर्लभेन तेन तप.कृशा सखीभिः अस्त्रोत्तरं ईक्षिता इयं सखी तद्वग्रहक्षता सीता वृष्णा इव कदा अभ्युपपत्स्यते (इति) (मया) न वेद्यते ॥ ६१ ॥

HINDI TRANSLATION :—चाहे हुए होने पर भी कठिनता से मिलने वाला वह, तपस्या के कारण दुर्बल तथा सहेलियों से आँसुओं के साथ देखी हुई इस सहेली (पार्वती) को इन्द्र के द्वारा वर्षा के रोके जाने से दुःखी, हल चली हुई पृथ्वी को इन्द्र की तरह कब अनुग्रहीत करेगा (यह) मैं नहीं जानती ॥ ६१ ॥

ENGLISH TRANSLATION :—I do not know when he, difficult to be obtained though sought after, will favour

this our friend, emaciated by penance (and) looked at by her friends with tears, as Indra favours the ploughed earth distressed by his holding off the rain 61

Purport in Sanskrit :—सत्यमेवाभिलषितोऽपि शिवो दुष्प्रापः, यतः स इयता समयेनापि पार्वत्या न लब्धः। तस्येमां चित्तवृत्तिं दृष्ट्वा मया ज्ञातु न शक्यते यत् स कियत्कालानन्तरं वर्षाभावादत्यन्तं पीडितां महीं इन्द्र इवेमां तपश्चरणात्कृशीभूताम् अस्माकं सखीमनुग्रहीष्यति, यां दृष्ट्वा वय तत्सख्यो निरन्तरमश्रूणि मुञ्चामः ॥ ६१ ॥

अगूढसद्भावमितीङ्गितज्ञया
निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमा-
मपृच्छदव्यञ्जितहर्षलक्षणः ॥ ६२ ॥

अगूढेति। इङ्गितज्ञया पार्वतीहृदयाभिज्ञया 'इङ्गितं हृद्गतो भावः' इति सज्जनः। तया गौरीसख्या इति एव अगूढसद्भावं प्रकाशितसदभिप्रायं यथा तथा निवेदितः ज्ञापित । नैष्ठिकसुन्दरः निष्ठा मरणमवधिर्यस्य स नैष्ठिकः यावज्जीवब्रह्मचारी सुन्दरो विलासी। नैष्ठिकश्चासौ तथोक्तः । द्वयोरन्यतरस्य विशेषणत्वविवक्षायां विशेषणसमासः। किन्तु नैष्ठिकत्वविशेषणेन कामित्वविरोधः। अथवा देवस्यालौकिकमहिमत्वादुभयं तात्त्विकमिति न विरोध । अव्यञ्जितहर्षलक्षणः अव्यञ्जितं हर्षलक्षणं मुखरागादिहर्षलिङ्गं यस्य तथाभूतः सन्। अयि गौरी। अयीति कोमलामन्त्रणे। इदं त्वत्सखीभाषितं एवम्। सत्यं किमित्यर्थ । परिहासः

केलिर्वा । 'द्रवकेलिपरीहासाः' इत्यमरः । इति एवं उमां अपृच्छन् पृष्टवान् ॥ ६२ ॥

PROSE ORDER :—इङ्गितज्ञया तया इति अगूढसद्भावं निवेदित नैष्ठिकसुन्दरः अव्यञ्जितहर्षलक्षणः (सन्) अयि ! इदं एवं (अथवा) परिहासः इति इमां अपृच्छत् ॥ ६२ ॥

NOTES .—इङ्गितज्ञया—(इङ्गित + √ज्ञा + कः + आ) इङ्गितं (हृद्गतं भावं) जानाति इति इङ्गितज्ञा, तया इङ्गितज्ञया who knew the real but convert purpose or intention (of Parvati) इङ्गितं also means 'a notion or gesture indicating one's intention,' but here it means 'intention ' 'इङ्गितं हृद्गतो भावः ' इति सज्जनः । तया—by that friend of Parvati अगूढसद्भावं—(√गुह् to hide + क्तः = गूढः) सन् भावः सद्भावः, न गूढः सद्भावः (यथार्थाभिप्रायः) यस्मिन् कर्मणि यथा स्यात् तथा अगूढसद्भावं (Adv to निवेदितः) not hiding her noble intentions निवेदितः—विज्ञापितः, उक्तः addressed Passive Past Participle. नैष्ठिकसुन्दरः । नैष्ठिकः—(निष्ठा + ठञ् — इक) निष्ठा (मरणं), तत्पर्यन्तं ब्रह्मचर्येण तिष्ठति इति नैष्ठिकः (यावज्जीवब्रह्मचारी) or निष्ठाकालं यावदस्य ब्रह्मचर्यमिति नैष्ठिकः a life-long religious student who observes the vow of celibacy. The word निष्ठा means ' end ; extreme point ', hence death. निष्ठानिष्पत्तिनाशान्ताः' इत्यमरः । ठञ् suffix is added by ' तदस्य ब्रह्मचर्यम् ' पा० ५.१ ५७. It is changed into इक । नैष्ठिकश्चासौ सुन्दरश्च नैष्ठिकसुन्दरः the handsome Brahmachárin (*i e* Shiva). अव्यञ्जितहर्षलक्षणः —न व्यञ्जितं (प्रकटितम्) हर्षस्य लक्षणं (चिह्नम्) येन सः

अव्यञ्जितहर्षलक्षणः who did not show signs of delight. Though Shiva was rejoiced at heart to see that Parvati had so much love for him, but he betrayed no sign of it **एवं**—true, was it really so, as told by Parvati's friend **परिहास**—(**परि**+√**हस्**+**घञ्**) a joke **अपृच्छत्**—asked. √**प्रच्छ्** is **द्विकर्मक** *i. e* it governs two objects ; here **उमाम्** is one object and the other object is the clause ' **अयि, इदं एवं (उत) परिहासः ?**' 62

Change of Voice —**इङ्गितज्ञया तया इति अगूढसद्भावं निवेदितेन नैष्ठिकसुन्दरेण अव्यञ्जितहर्षलक्षणेन अयि अनेन एवं (भूयत) (अथवा) परिहासेन इति एवं अपृच्छ्यत ॥ ६१ ॥**

Hindi Translation :—**(पार्वती के) आन्तरिक भाव को जानने वाली उससे इस प्रकार (पार्वती के) श्रेष्ठ अभिप्राय को स्पष्ट करके कहे हुए उस सुन्दर आजन्म ब्रह्मचारी ने प्रसन्नता के चिह्नों को सूचित न करते हुए ही पार्वती से पूछा— क्यों जी, क्या यह ऐसे ही है अथवा हँसी है ? ॥ ६२ ॥**

English Translation —Thus informed by her, who knew the intentions of Parvati's heart, not hiding her noble thoughts, that handsome, life-long Brahmachárin, without betraying signs of delight, asked Umá whether it was so or a joke 62

Purport in Sanskrit —**पार्वत्यभिप्रायवेदिन्या तत्सख्या पार्वत्याः अनुरागविषये स्पष्टमुक्तः सरूपवान् स ब्रह्मचारी नितरां हृष्टो जातः, परं स्वहर्षं निगूहन् स पार्वतीमपृच्छत्—यत्तत्सख्या कथितं वृत्तं सत्यमासीत् उताहो हास्यमात्रमेव ॥ ६२ ॥**

अथाग्रहस्ते मुकुलीकृताङ्गुलौ
समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथंचिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवागभाषत ॥ ६३ ॥

अथेति । अथ अनन्तर अद्रे तनया पार्वती मुकुलीकृताङ्गुलौ सपुटीकृताङ्गुलौ । अग्रश्चासौ हस्तश्चेति समानाधिकरण-समास । 'हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदात्' इति वामनः। तस्मिन् अग्रहस्ते स्फटिकाक्षमालिकां स्फटिकानां अक्षमालिकां समर्पयन्ती आमुञ्चती कथञ्चित् महता कष्टेन चिरव्यवस्थापितवाक् चिरेण स्वीकृतवाक् । एतेन लज्जोपरोधौ व्यज्यते। मिताक्षर परिमितवर्ण यथा तथा अभाषत बभाषे ॥ ६३ ॥

PROSE ORDER —अथ अद्रे तनया मुकुलीकृताङ्गुलौ अग्रहस्ते स्फटिकाक्षमालिकां समर्पयन्ती चिरव्यवस्थापितवाक् कथञ्चिद् मिताक्षरं अभाषत ॥ ६३ ॥

NOTES :—अद्रेः—पर्वतस्य of the mountain, *i e*, of the Himálaya 'अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः' इत्यमरः। तनया—पुत्री the daughter, *i e*, Párvati मुकुली-कृताङ्गुलौ। मुकुली कृता —(मुकुल+च्विः+कृता) अमुकुला मुकुलाः कृताः इति मुकुलीकृता. (संपुटीकृता) joined or brought together like a bud ; formed in the shape of a bud. मुकुल—a bud च्वि suffix is added to nouns or indeclinables to express that a person or thing, not being like what is denoted by the base to which it is added, becomes or is made like it Here the

fingers, which were not joined in the form of a bud, were joined in that manner ' (अभूततद्भावे) कृभ्वस्तियोगे संपद्यकर्त्तरि च्वि ' पा० ५ ४ ५० Before च्वि the ending अ or आ is changed to इ, but not that of indeclinables. इ or उ is lengthened and ऋ changed to री । Then the termination (च्वि) is dropped and the verbal or other forms of कृ, भू and अस् roots are added to the base regarded as a preposition मुकुलीकृताङ्गुलौ—मुकुलीकृताः अङ्गुलयो यस्य सः, तस्मिन् of which the fingers were joined like a bud अग्रहस्ते-अग्रश्चासौ हस्तश्च इति अग्रहस्तः, तस्मिन् in her forehand The compound is Karmadháraya But in a Karmadharaya compound both the members are identical with each other , for instance in श्वेतकमल, श्वेतत्व (whiteness) and कमल (a lotus) are identical, while in अग्रहस्त, अग्र is a part of हस्त and they are not identical with each other. They may, however, be regarded as such metaphorically, through their relation of अवयव and अवयविन् *Cf.* ' हस्ताग्र अग्रहस्तयोः गुणगुणिनोर्भेदाभेदात् ' वामनः । or हस्तस्य अग्रे इति अग्रहस्ते. The compound may be regarded a member of the group of राजदन्तादि and thereby हस्त can be made the second member of the compound instead of the first स्फटिकाक्षमालिकाम् —स्फटिकानां स्फटिकनिर्मिता वा अक्षमालिका स्फटिकाक्षमा-लिका, ताम् a rosary made of crystal beads or, a

crystal rosary. Here अक्षमालिका means simply 'a rosary.' समर्पयन्ती—(सम्+√अर्प्+णिच्+शतृ+ङीप्) आमुञ्चती putting : holding. चिरव्यवस्थापितवाक्—चिरेण व्यवस्थापिता वाक् यया सा चिरव्यवस्थापितवाक् having put in order (in her mind) the speech for a long time, *i. e.*, having pondered for a long time as to what to say and what not. कथञ्चित्—with great difficulty. Because she was moved very much, or she was feeling shy of speaking in such a matter. मिताक्षरम्—(√मा+क्तः=मितम्) मितानि अक्षराणि यस्मिन् कर्मणि यथा स्यात्तथा मिताक्षरम् in limited words. अभाषत—spoke. Imperfect third pers. sing. of √भाष्. 63.

CHANGE OF VOICE :—अथ अद्रेः तनयया मुकुलीकृताङ्गुलौ अग्रहस्ते स्फटिकाक्षमालिकां समर्पयन्त्या चिरव्यवस्थापितवाचा कथञ्चिद् मिताक्षरं अभाष्यत ॥ ६३ ॥

HINDI TRANSLATION :—इसके अनन्तर पर्वत की पुत्री (पार्वती) स्फटिक की जपमाला को जुड़ी हुई (एकत्रीकृत) अंगुलियों वाले हाथ के अग्रभाग में पकड़ कर, देर तक वचनों को ठीक करके, जैसे तैसे, थोड़े से अक्षरों में बोली ॥ ६३ ॥

ENGLISH TRANSLATION :—Then the daughter of the mountain (*i. e.*, Párvati), putting the crystal rosary into her forehand, of which the fingers had been drawn together in the shape of a bud, spoke with great difficulty, in measured words, having adjusted her speech (in her mind) for a long time. 63.

PURPORT IN SANSKRIT —ब्रह्मचारिणः प्रश्नानन्तरं पार्वती स्फटिकनिर्मितां स्वजपमालां कुड्मलाकाराङ्गुलौ स्वहस्तस्याग्रभागे निश्चलीकृत्य—जपमालाचालनात्किञ्चितकालं विरम्य—चिराय कथनीयविषयं कथनप्रकारञ्च निश्चित्य संक्षिप्तमुत्तरं दातुमुद्यताभूत् ॥ ६३ ॥

यथा श्रुतं वेदविदां वर त्वया
जनोऽयमुच्चैःपदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥ ६४ ॥

किमुवाचेत्याह । यथेति । हे वेदविदां वर वैदिकश्रेष्ठ । त्वया यथाश्रुतं सम्यक् श्रुतम् । श्रुतार्थमेवाह—अयं जन स्वयमित्यर्थः । उच्चैः पदलङ्घनोत्सुकः उच्चैः पदस्य शिवलाभरूपोन्नतस्थानस्य लङ्घने आक्रमणे उत्सुकः । किमत्रायुक्तमित्यत्राह—इदं तप तदवाप्तिसाधनं किल । किलेत्यलीके । अतितुच्छत्वादसाधकमेवेत्यर्थः । तर्हि त्यज्यतामित्याशङ्क्य दुराशा मां न मुञ्चति इत्याशयेनाह—मनोरथानां कामानां अगतिः अविषयः न विद्यते । न हि स्वशक्तिपर्यालोचनया कामाः प्रवर्तन्त इति भावः ॥ ६४ ॥

PROSE ORDER :—(हे) वेदविदां वर ! त्वया यथा श्रुतं, अयं जनः उच्चै-पदलङ्घनोत्सुकः, इदं तपः तदवाप्तिसाधनं किल, मनोरथानां अगतिर्न विद्यते ॥ ६४ ॥

NOTES :—वेदविदां—(√विद् to know + क्विप् = वित्) वेदं विदन्ति इति वेद विदः, तेषां वेदविदां of those who know the Vedas. Decline वेदवित् as वेदवित्, वेदविदौ, वेदविदः । वेदविदम् etc. वर—श्रेष्ठ the best ; the chief. त्वया यथा

श्रुतम्—त्वया सम्यक् आकर्णितम् you have heard the right thing According to Mallinatha यथा is used in the sense of 'truth; correct thing' It may also be taken with the following words viz, त्वया यथा श्रुतं अयं जनः etc, as you have heard this person is anxious to attain the highest post Or, तथा may be provided after यथा, then it will be construed as यथा श्रुतं तत्तथा it is so as as you have heard उच्चै पदलङ्घनोत्सुकः—उच्चैः पदस्य (स्थानस्य) लङ्घने (प्राप्तौ) उत्सुक anxious to attain the lofty post This lofty post is none but to be the wife of Shiva लङ्घन means 'crossing', as well as 'rising to or towards' तदवाप्तिसाधनं—तस्य (उच्चैःपदस्य) अवाप्तेः (प्राप्तेः) साधनं (उपायः) तदवाप्तिसाधनम् a means of obtaining that किल—indeed. But Mallinatha takes it in the sense of 'falsely' (अलीके) i. e, the penance which is a means of attaining it, does not seem to be so. अगतिः—अवरोधः, विश्रान्तिः non-reaching; unsuccessfulness 'मनोरथानां अगतिर्न विद्यते' is a general statement meaning that nothing is inaccessible to desire 64

CHANGE OF VOICE :—(हे) वेदविदां वर ! त्वं यथा श्रुतवान् अनेन जनेन उच्चैः पदलङ्घनोत्सुकेन (भूयते) अनेन तपसा तदवाप्तिसाधनेन (भूयते) किल, मनोरथानां अगत्या न विद्यते ॥ ६४ ॥

HINDI TRANSLATION :—हे वेद के ज्ञाताओं में श्रेष्ठ ! तुम ने जैसा सुना है (वह ठीक है), यह व्यक्ति ऊँचे पद की प्राप्ति

का इच्छुक है ; यह तपस्या उसकी प्राप्ति का उपाय है ; इच्छाओं की विफलता नहीं होती ॥ ६४ ॥

ENGLISH TRANSLATION —O one, who is the best among those who know the Vedas, (it is so) as you have heard , this person is anxious to attain the high post This penance is a means of getting that , nothing is beyond the reach of desire 64

PURPORT IN SANSKRIT:—वर्णिन. प्रश्नमाकर्ण्य पार्वती तं प्रतिवदति—' हे वेदज्ञातॄणां श्रेष्ठ ! साधो ! त्वया मे सखीमुखात् यत्किञ्चिदप्याकर्णितं तत् यथार्थमेव , अहं सत्यमेव शिवप्राप्तिरूपमुच्चस्थानमधिगन्तु कृतनिश्चया उन्मनाश्चास्मि । इयं मे तपस्या निश्चयमेव तस्य मे मनोरथस्य पूर्त्यर्थं विद्यते, मम कामना चावश्यं सफला भविष्यति यतो मनोरथेन सर्वमपि लब्धुं शक्यते ॥ ६४ ॥

अथाह वर्णी विदितो महेश्वर-
स्तदर्थिनी त्वं पुनरेव वर्त्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं न च कर्त्तुमुत्सहे ॥ ६५ ॥

अथेति । अथ वर्णी ब्रह्मचारी । 'वर्णिनो ब्रह्मचारिणः' इत्यमरः । आह उवाचेत्यर्थः 'आहेति भूतार्थे लट् प्रयोगो भ्रान्तिमूलः' इत्याह वामनः । किमित्याह—महेश्वरः महादेवः विदितः । मया ज्ञायत इत्यर्थः । बुद्ध्यर्थत्वात् वर्त्तमाने क्तः प्रत्ययः । तद्योगात् षष्ठी च । येन त्वं प्राग्भग्नमनोरथा कृतेति भावः । पुनरेव त्वं तमीश्वरमर्थयते तदर्थिनी एव तत्कामैव वर्तसे । तत्प्रभावमनुभूयापीति भावः । अनुसरणे को दोषस्तत्राह—अमङ्गलाभ्यासरतिं अमङ्गलाचारे

रतिर्यस्य तं तथोक्तं तं ईश्वरं विचिन्त्य विचार्य तवानुवृत्तिं अनुसरणं कर्त्तुं न उत्सहे च। नानुमन्तुं शक्नोमीत्यर्थः ॥ ६५ ॥

PROSE ORDER :—अथ वर्णी आह—महेश्वरः विदितः, त्वं पुनः एव तदर्थिनी वर्तसे, च तं अमङ्गलाभ्यासरतिं विचिन्त्य तव अनुवृत्तिं कर्त्तुं न उत्सहे ॥ ६५ ॥

NOTES —वर्णी—Brahmachárin See notes on वर्णिनं in verse 52 आह—उवाच said It being Present tense, third person, sing , its use in the sense of the Past tense is open to question. But according to some commentators आह may be used with अथ on the authority of 'तदादौ च '। भोजसूत्रम्। आह is the alternative substitute for √ब्रू ' to speak ' in all the numbers of the third person and, sing and dual of the second person ' ब्रुवः पञ्चानामादित आहो ब्रुवः ' पा० ३ ४ ८४ Thus √ब्रू is conjugated in the present tense as—ब्रवीति—आह, ब्रूत —आहतुः, ब्रुवन्ति—आहुः । ब्रवीषि —आत्थ, ब्रूथः—आहथुः, ब्रूथ । ब्रवीमि, ब्रूवः, ब्रूमः । महेश्वरः—(महा+ईश्वर) महांश्चासौ ईश्वरः महेश्वर (महादेव) Shiva The word महत् is changed to महा when it forms the first member of a Karmadharaya or a Bahuvrihi compound, or when the termination जातीय follows ' आन्महतः समानाधिकरणजातीययोः, पा० ६.३ ४६. विदितः—ज्ञातः is known In विदितः (√विद्+क्तः) क्त suffix is added by ' मतिबुद्धिपूजार्थेभ्यश्च ' पा० ३ २ १८८. in the sense of the present tense The subject of विदितः *viz.*, मन is understood. The Brahmachárin means to

say that he knew Maheshwara as one who against the desire of Párvati burnt Kámadeva and did not agree to marry her एव—अपि। तदर्थिनी—(तत्+अर्थ+इनिः+ङाप्) अर्थ. अस्या अस्तीति अर्थिनी, तस्य अर्थिनी तदर्थिनी (तदभिलाषिणी) longing for him; seeking him. अमङ्गलाभ्यासरति—न मङ्गलं अमङ्गलं, तस्य (अशुभस्य) अभ्यासे (निरन्तरसेवने) रति यस्य सः अमङ्गलाभ्यासरतिः, तम् who is fond of using inauspicious things (such as funeral pyre, ashes, skull-bone, etc.) *Cf.* 'आलेपो भस्मितं विभूषितमहिर्वासः पितॄणां वने, वेतालाः परिचारका प्रतिदिनं वृत्तिश्च भिक्षामयी। इत्थं यस्य शुभेतराणि चरितान्याख्यान्ति सर्वे जनास्तस्मिन्मौग्ध्यवशान्मतिस्तव रुचिं बध्नाति किं ब्रूमहे।' पार्वतीपरिणय ४ १२ अनुवृत्ति—अनुसरणं, अनुमोदनम् to follow; to give my approval. न उत्सहे—I dare not √सह् 'to bear' means 'to dare' with the preposition उत्. The ascetic says when Shiva had insulted Párvati once and he had inborn fondness for inauspicious things he was not ready to approve of the idea of Párvati to marry him. 65.

Change of Voice :—अथ, वर्णिना (ऊचे)—(अहं) महेश्वरं विदितवान्, त्वया पुनरेव तदर्थिन्या वृत्यते, च तं अमङ्गलाभ्यासरतिं विचिन्त्य (मया) तव अनुवृत्तिं कर्त्तुं न उत्सह्यते ॥ ६५ ॥

Hindi Translation :—तब ब्रह्मचारी बोला—महादेव को मैं जानता हूँ; तू फिर भी उसी के लिये इच्छा वाली है;

(मैं) तो उसको अशुभ वस्तुओं से प्रेम करने वाला जान कर तुम्हारा अनुकरण करने (अर्थात् तुम्हारी तरह सोचने) का साहस नहीं कर सकता ॥ ६५ ॥

English Translation :—Then the ascetic said—Maheshwara is well-known, and yet thou has a longing for him ; knowing him to possess fondness for the use of inauspicious things, I dare not see eye to eye with you. 65.

Purport in Sanskrit :—पार्वत्याः वचनमाकर्ण्य स ब्रह्मचारी कथयति—'अहं शिवं सम्यग्जानामि, अन्येऽपि च तं जानन्ति । तस्य चिताभस्मकपालाद्यशुभवस्तुषु प्रीतिर्विद्यते । तथापि त्वं तत्प्राप्त्यर्थं तपोमग्ना तिष्ठसीत्याश्चर्यम् । अहं शिवस्य याथार्थ्यं विचार्य तव कार्यमनुमन्तुं नोद्यतोऽस्मि ॥ ६५ ॥

अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः ।
करेण शंभोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम् ॥ ६६ ॥

अवस्त्विति । अवस्तुनि तुच्छवस्तुनि निर्बन्धोऽभिनिवेशः परं प्रधानं यस्यास्तस्याः संबुद्धिः अवस्तुनिर्बन्धपरे पार्वति । आमुक्तविवाहकौतुकः आमुक्तमासञ्जितं विवाहे यत्कौतुकं हस्तसूत्रं तद्यस्य सः ते अयं करः । 'कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले' इति शाश्वतः । वलयीकृताहिना भूषणीकृतसर्पेण शंभोः महादेवस्य करेण करणभूतेन तत्प्रथमावलम्बनं तदेव प्रथमं तत्प्रथमम् । अपरिचितत्वादतिभयंकरमिति भावः । तच्च तदवलम्बनं ग्रहणं चेति कथं

नु सहिष्यते । न कथंचिदपि सहिष्यते इत्यर्थ । अग्रतो यद्भावि तद्दूरेऽवतिष्ठतां प्रथमं करग्रह एव दुःसह इति भावः ॥ ६६ ॥

PROSE ORDER —(हे) अवस्तुनिर्बन्धपरे । आमुक्तविवाहकौतुकः अयं ते करः शंभोः वलयीकृताहिना करेण तत्प्रथमावलम्बनं कथं नु सहिष्यते ? ॥ ६६ ॥

NOTES —अवस्तुनिर्बन्धपरे—न वस्तु अवस्तु (तुच्छवस्तु), तस्मिन् निर्बन्ध (आग्रहः) परः (प्रधानः) यस्याः सा अवस्तुनिर्बन्धपरा, तस्याः सम्बोधने अवस्तुनिर्बन्धपरे one who is solely attached to an unworthy object , who is desirous of an unworthy object अवस्तु an unworthy object, *i e*, Shiva. Here the negative अ (न) is in the sense of अप्राशस्त्य (not good ; disparagement), which is one of its six senses—' तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः । ' निर्बन्ध—persistence in ; obstinacy for. आमुक्तविवाहकौतुकः—आमुक्तं (धारित) विवाहस्य कौतुकं (मङ्गलसूत्रं) यस्मिन् स आमुक्तविवाहकौतुकः round which the nuptial string has been tied. आमुक्तं—(आ+ √मुञ्च्+क्तः) tied विवाहकौतुकम्—the nuptial thread. ' कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले ' इति शाश्वत. । A coloured thread is tied round the wrist on the occasion of marriage and other solemn ceremonies. शंभो —of Shiva. वलयीकृताहिना—(वलय+च्वि+कृतः= वलयीकृतः) अवलयो वलयो यथा संपद्यते तथा कृतः वलयीकृतः (वलयरूपेण धृतः) ; वलयीकृतः अहिः (सर्पः) यस्मिन् स वलयीकृताहि. तेन round which a snake has been borne

as a bracelet, i.e. decked with snakes, girdled with a serpent as with a bracelet. Shiva wears Vásuki round his wrist as a bracelet. वलय—a bracelet 'आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम्' इत्यमरः। For the formation of वलयीकृत with च्विः see notes on मुकुलीकृत in verse 63. तत्प्रथमावलम्बनम्—तदेव प्रथमं तत्प्रथम्; तत्प्रथमं च तदवलम्बनं (तत् ग्रहणं) तत्प्रथमावलम्बनम् the first clasp. कथं नु सहिष्यते—how will it bear? i.e., it will not be able to bear. *Cf* 'तस्योद्वाहनकाले च हा हा कर्त्तुं भविष्यति। फणिकंकणसंयोगं यदा ते कंकणं भवेत्।' शिवपुराणम् ॥ ६६ ॥

CHANGE OF VOICE.—(हे) अवस्तुनिर्बन्धपरे! आमुक्तविवाहकौतुकेन अनेन ते करेण शम्भोः वलयीकृताहिना करेण तत्प्रथमावलम्बनं कथं नु सहिष्यते ॥ ६६ ॥

HINDI TRANSLATION:—हे तुच्छ वस्तु के पीछे पड़ी हुई (पार्वति)! विवाह के धागे (कलावे) से युक्त यह तेरा हाथ, जिसमें सांप कड़े की तरह पहना हुआ है ऐसे शिव के हाथ से पहिले पहिल पकड़ने को किस प्रकार सहन कर सकेगा? ॥ ६६ ॥

ENGLISH TRANSLATION.—O one who is intent on an unworthy object, how will this thy hand, with the marriage-string tied round it, bear the first clasp of Shambhu's hand girdled with a serpent as with a bracelet? 66

PURPORT IN SANSKRIT:—हे तुच्छपदार्थे आग्रहवति पार्वति! अशुभवस्तुधारी शिवः स्वहस्ते सर्पं कङ्कणत्वेन धारयति,

तस्मात् यदा स विवाहकाले मङ्गलसूत्रधारिणं तव पाणि स्वकरेण ग्रहीष्यति तदा त्व तस्य करस्पर्शमसहमाना भीता स्वं पाणिमपनेष्यसि येन पाणिग्रहणसंस्कारे एव विघ्नो भविता। एवं 'प्रथमग्रासे एव मक्षिकापातः' अन्यत्किमपि तु दूरे आस्ताम् ॥ ६६ ॥

त्वमेव तावत्परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः।
वधूदुकूलं कलहंसलक्षणं
गजाजिनं शोणितबिन्दुवर्षि च ॥ ६७ ॥

त्वमेवेति । हे गौरि । त्वं एव स्वयं आत्मना। तावत् इति मानार्थे। यावन्मात्रं विचारणीयंतावन्मात्रमित्यर्थः । इदमेवोदाहृतं च गणव्याख्याने । परिचिन्तय पर्यालोचय। किमिति । कलहंस-लक्षणं कलहंसचिह्नम्। 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरः। वध्वा नवोढाया दुकूलं वधूदुकूलम् । 'वधूः स्नुषा नवोढा स्त्री' इति विश्वः। तथा शोणितबिन्दुवर्षि शोणितबिन्दून्वर्षतीति तथोक्तम्। आर्द्रमित्यर्थः। गजाजिन च कृत्तिवासश्च। तत्पिनाकिन इत्याशयः। एते कदाचित् जात्वपि योगं संगति अर्हतः यदि अर्हतः किम्। एतत्त्वमेव चिन्तयेति पूर्वेणान्वय । पाणिग्रहणकाले वधूवरयोर्व-स्त्रान्तग्रन्थिः क्रियते । कृत्तिवाससा पाणिपीडने तु दुकूल-धारिण्यास्तव स कथं संघटिष्यत इति भावः ॥ ६७ ॥

Prose Order :—(हे गौरि) त्वमेव स्वयं तावत् परि-चिन्तय (यत्) कलहंसलक्षणं वधूदुकूलं शोणितबिन्दुवर्षि गजा-जिनं च—एते कदाचिद् योगं अर्हतः यदि ॥ ६७ ॥

Notes :—तावत्—तद् परिमाणमस्य इति तावत् (तत्+वतुप्)—यावदावश्यकं तावत् adequately ; fully. It may also mean 'in the first place.' In तावत्, तत् is

made ना by ' आ सर्वनाम्नः ' पा० ६ ३ ९१ । कलहंसलक्षण—कलहंसः लक्षणं यस्य तत् कलहंसलक्षणम् on which the figures of swans are painted ' चिह्नं लक्ष्म च लक्षणम् ' इत्यमरः । or, कलहंसवत् लक्षणं (स्वरूपं) यस्य तत् कलहंसलक्षणम् which is (white) like a swan कलहंस is a name of several species of goose ' कादम्बः कलहंसः स्यात् ' इत्यमरः ; वधूदुकूलं—वध्वाः दुकूलं (पट्टवस्त्रम्) the fine raiment or cloth of a newly married woman ' वधू—a newly married woman ' वधूः स्नुषा नवोढा स्त्री ' इति विश्वः दुकूलम्—a kind of plant and also very fine cloth or raiment made of the inner bark of this plant. शोणितबिन्दुवर्षि—(√वर्ष + णिनिः) शोणितस्य बिन्दून् वर्षतीति शोणितबिन्दुवर्षि dripping blood-drops गजाजिनम्—गजस्य अजिनं (चर्म) गजाजिनम् hide of an elephant ' अजिनं कृत्तिः चर्म ' इत्यमरः । It is mentioned in mythological books that Shiva after killing Gajasura danced with his body covered with the skin of the demon which was dripping with blood, and used it afterwards as a trophy कदाचित्—कस्मिन्नपि काले even in the least. योगम्—सङ्गतिम् coming together The ascetic means to say that leaving other things aside even the articles of dresses of Parvati and Shiva differ very much from each other, and when there is so much incongruity about the outer things how far it was proper for Parvati to have a yearning for Shiva 67.

CHANGE OF VOICE —(हे गौरि) त्वया एव स्वयं तावत् परिचिन्त्यतां (यत्) कलहंसलक्षणेन वधूदुकूलेन शोणितबिन्दुवर्षिणा गजाजिनेन च—एताभ्यां कदाचिद् योगो अर्ह्यते यदि ॥ ६७ ॥

HINDI TRANSLATION :—(हे गौरि) तुम ही स्वयं अच्छी तरह सोचो कि कहीं हंसों के चित्रों से युक्त नव विवाहिता बहू का रेशमी वस्त्र और रक्त से सनी हुई (महादेव की) हाथी की खाल—ये दोनों कभी भी एक साथ रहने योग्य हैं ॥ ६७ ॥

ENGLISH TRANSLATION —Do thou thyself think over sufficiently, if these two things ever deserve to be brought together fine garment of a newly married woman, with the figures of swans painted on it and (Shiva's) elephant-hide dripping blood-drops ? 67.

PURPORT IN SANSKRIT —हे पार्वति, मे कथनमेकतः कृत्वा त्वमेव स्वयं विचारय यत् विवाहसंस्कारे ग्रन्थिबन्धनकाले ते महार्हस्य हंसचित्रयुक्तस्य क्षौमवस्त्रस्य शिवस्य च रक्तबिन्दून् क्षरता हस्तिचर्मणा सह संयोगः (ग्रन्थिबन्धनं वा) कथं भविष्यति । तव तु महार्हं पट्टवस्त्रं शिवस्य च हस्तिनश्चर्म, तयोः संयोग एव नार्हति । युवयोर्वस्तुषु महान् भेद इति तात्पर्यम् ॥ ६७ ॥

चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु ॥ ६८ ॥

चतुष्केति । चतुष्कपुष्पप्रकरावकीर्णयोः चतुष्के गृहविशेषे च पुष्पप्रकरस्तत्रावकीर्णयोर्न्यस्तयोः । कुसुमास्तृतदिव्यभवनभूसंचारोचितयोरित्यर्थः । तव पादयोः अलक्तकाङ्कानि लाक्षारञ्जितानि पदानि पादाकाराणि पादन्यासचिह्नानि । 'पदं शब्दे च वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः' इति विश्वः । विकीर्णाः विक्षिप्ता केशाः शवशिरोरुहाः यासु तासु विकीर्णकेशासु । 'अतस्थं तत्र दृष्टं च' इति वचनात् 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति विकल्पाच्च ङीप् । परेतभूमिषु प्रेतभूमिषु । श्मशानेष्वित्यर्थः । परः अपि शत्रुरपि कः नाम अनुमन्यते । न कोऽपीत्यर्थः । नामेति कुत्सायाम् । पिनाकपाणिपाणिग्रहणे तस्य परेतभूसंचारित्वेन साहचर्यात्तवापि तत्र संचारोऽवश्यम्भावीति भावः ॥ ६८ ॥

Prose Order —परः अपि कः नाम चतुष्कपुष्पप्रकरावकीर्णयोः तव पादयोः अलक्तकाङ्कानि पदानि विकीर्णकेशासु परेतभूमिषु अनुमन्यते ? ॥ ६८ ॥

Notes —परः—शत्रुः an enemy 'अभिघातिपरारातिप्रत्यर्थिपरिपन्थिन' इत्यमरः । नाम—It is used in the sense of कुत्सा (reproach) चतुष्कपुष्पप्रकरावकीर्णयोः । चतुष्कं—चत्वारो अवयवा यस्य तत् चतुष्कं (चतुर्+कन्) a quadrangular courtyard (used for receiving guests) ; a hall supported by four pillars ; a house consisting of four halls (चतुःशालम्) । कन् suffix is add to form a noun by 'सङ्ख्यायाः सञ्ज्ञासङ्घसूत्राध्ययनेषु' पा० ५.१.५८ । प्रकरः—(√कॄ+अप्)—समूहः group or heap. अवकीर्ण—(अव+कॄ+क्तः Past part) scattered ; here—'placed.' चतुष्के (गृहविशेषे) पुष्पाणां प्रकरे अवकीर्णयोः placed on groups of

flowers in the quadrangular courtyard It is an Adj. of पादयोः and so the sense is that the feet which are accustomed to tread in courtyards or rooms where flowers are scattered in abundance. अलक्तकाङ्कानि—अलक्तक (लाक्षारस) अङ्कः (चिह्नं) येषु तानि having marks of red dye See notes on अलक्तक in verse 34. It is well-known that red dye is applied to feet by ladies to decorate them. पदानि—पदचिह्नानि foot-prints. ' पदं शब्दे च वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः ' इति विश्वः । पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु ' इत्यमरः । विकीर्णकेशासु—(वि+√कॄ+क्तः) विकीर्णाः केशाः यासु ताः विकीर्णकेशाः, तासु spread over with the hair (of corpses) परेतभूमिषु । परेतः—(परा√इ to go+क्त) परं लोकं इतः (गत) परेतः or परा (दूरं) इतः इति परेतः a dead person ; lit gone away. प्रेत (प्र+√इ+क्तः) has also the same meaning परेतानां भूमिषु परेतभूमिषु in the grounds of the dead, *i e*, burning-grounds कः अनुमन्यते—who would consent or approve of it ! Shiva is said to live in the cemetery grounds (*Cf.* ' वासः पितृणां वने ' and so if Párvati was wedded to him she too would have to tread there, which would be in great contrast with his walking in the flower-covered, apartments of her palace 68.

Change of Voice :—परेण अपि केन नाम चतुष्कपुष्पप्रकरावकीर्णयोः तव पादयोः अलक्ताङ्कानि पदानि विकीर्णकेशासु परेतभूमिषु अनुमन्यन्ते ? ॥ ६८ ॥

HINDI TRANSLATION —चतुष्कोण आँगन अथवा कमरों में (बिखरे) फूलों पर पड़ने वाले तुम्हारे पैरों के लाक्षारस के चिह्नों को बनाने वाले पदचिह्नों के (मुर्दों के) बालों से युक्त श्मशान-भूमि में पड़ने की अनुमति कौन सा शत्रु भी दे सकता है ? ॥ ६८ ॥

ENGLISH TRANSLATION —Who, even an enemy, would consent the foot-prints, leaving marks of red dye, of thy feet treading upon groups of flowers (scattered) in quadrangular courtyard, being placed upon cemetery grounds spread over with the hair ? 68

PURPORT IN SANSKRIT —हे गौरि त्वं स्वपितुर्गृहे पुष्पास्तृतेषु प्राङ्गणादिषु भागेषु चलसि शिवश्च श्मशानवासी। तस्माद्विवाहानन्तरं तस्य वासस्थानं गत्वा लाक्षारसयुक्ताभ्यां पादाभ्यां मृतपुरुषाणां केशादिभिः संकुलासु श्मशानभूमिषु ते सञ्चलनं कश्चिच्छत्रुरपि नानुज्ञास्यति मित्रस्य तु का कथा ? न त्वं श्मशानवासयोग्या, तत्र ते वासः शत्रुणामपि दुःखकारकः ॥ ६८ ॥

अयुक्तरूपं किमतः परं वद
त्रिनेत्रवक्षः सुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन्हरिचन्दनास्पदे
पदं चिताभस्मरजः करिष्यति ॥ ६९ ॥

अयुक्तेति । त्रिनेत्रवक्षः त्र्यम्बकालिङ्गनमित्यर्थः । तव तत्सम्बन्धितया सुलभं अपि सुप्राप च । भवतीति शेषः । तवेति शेषे षष्ठी । 'न लोकाव्यय०—' इत्यादिना कृद्योगलक्षणषष्ठ्या निषेधात् । अतः पर अस्मत्त्रिनेत्रवक्षोलाभादन्यद् अयुक्तरूपं अत्यन्तायुक्तं किं वद । न किंचिदित्यर्थः । 'प्रशसायां रूपम्' इति रूपप्प्रत्ययः । कुतः । यत्

यस्मात्कारणात् हरिचन्दनास्पदे हरिचन्दनस्यास्पदे स्थानभूते अस्मिन् स्तनद्वये चिताभस्मरजः चिताभस्म श्मशानभस्म तदेव रजश्चूर्णम् । कर्त्तु । पदं करिष्यति पदं निधास्यति । भर्तुर्भवस्य भस्माङ्गरागादिति भावः ॥ ६६ ॥

PROSE ORDER :—(त्वमेव) वद अतः परं अयुक्तरूपं किं यत् त्रिनेत्रवक्षः सुलभं चिताभस्मरजः तव अपि हरिचन्दनास्पदे अस्मिन् स्तनद्वये पदं करिष्यति ? ॥ ६६ ॥

NOTES :—अतः परम् more than this अयुक्तरूपं—अतिशयेन युक्तं युक्तरूपम्, तन्न भवतीति अयुक्तरूपम् (न+युक्त+रूपप्) अत्यन्तमनुचितम् or, न युक्तं अयुक्तं, प्रशस्तं अयुक्तं अयुक्तरूपम् excessively unfit • unsuitable. रूपम् is added in the sense of प्रशसा (praise or excessiveness of something) by 'प्रशंसायां रूपम्' पा० ५ ३.६६ । Here it expresses excessiveness of unsuitableness त्रिनेत्रवक्षःसुलभम्—त्रीणि नेत्राणि यस्य सः त्रिनेत्र (शिवः) तस्य वक्षः त्रिनेत्रवक्षः, तत्र सुलभं त्रिनेत्रवक्षःसुलभम् which is easily found on the bosom of the three-eyed God (i e, Shiva) or, which is easy to be obtained from the bosom of the three-eyed God. It is an Adj. of चिताभस्मरजः । The न of त्रिनेत्र is not changed to ण because it is included in the group known as क्षुभ्नादि—'क्षुभ्नादिषु च' पा० ८.४ ३९ । Mallinátha has construed it in a different way, *viz*, त्रिनेत्रवक्षः तव अपि सुलभ अतः परं अयुक्तरूमं किम् ? What can be more unsuitable than that the (embrace of the) bosom of the three-eyed God be easily obtainable for you. In this case त्रिनेत्रवक्षः is separated from सुलभं while in

the former the whole त्रिनेत्रवक्षःसुलभं is one compound चिताभस्मरजः—चितायाः भस्म एव रज the ashes of the funeral pyres (which are applied to his body by Shiva) *Cf* आलेपो भस्मितं' quoted in notes on verse 65 हरिचन्दनास्पदे—हरेः विष्णोरिन्द्रस्य वा चन्दनं हरिचन्दनं, तस्य आस्पदं तस्मिन् हरिचन्दनास्पदे a place for sandal-wood paste. 'हरिचन्दनमस्त्री स्यात् त्रिदशानां महीरुहे । नपुंसक तु गोशीर्षे ज्योत्स्नाकुङ्कुमयोरपि' इति मेदिनी। स्तनद्वये—स्तनयोः (कुचयोः) द्वयं (युगलं) स्तनद्वयं, तस्मिन् on your breasts पदं—स्थानं place According to Mallinátha the latter half of the verse is to be construed as—यत् हरिचन्दनास्पदे अस्मिन् स्तनद्वये चिताभस्मरजः पदं करिष्यति *i e*, because the powder of the ashes of funeral pyres will make its abode in the pair of your breasts which have hitherto been a place for sandal-wood paste Though the construction is different the sense remains the same 69.

CHANGE OF VOICE :—(त्वयैव) उद्यतां, अतः परं अयुक्तरूपं किम् यत् त्रिनेत्रवक्षः सुलभेन चिताभस्मरजसा तव अपि हरिचन्दनास्पदे अस्मिन् स्तनद्वये पदं करिष्यते ॥ ६९ ॥

HINDI TRANSLATION :—(तुम ही) बताओ, इससे बढ़कर और अनुचित क्या हो सकता है कि तीन नेत्रों वाले (शिव जी) की छाती पर लगी हुई चिता की राख तुम्हारे भी इन दोनों स्तनों पर, जो कि चन्दन के स्थान हैं, जगह बना लेगी ॥ ६९ ॥

ENGLISH TRANSLATION —Say, what can be more improper than that the powder of the ashes of the

funeral pyres, easy to be obtained from the bosom of the three-eyed God, will make its home on the pair of thy breasts which have been a place for sandal paste 69

PURPORT IN SANSKRIT :—हे पार्वति ! महादेवः स्वशरीरे चितायाः भस्म लिम्पति । तस्मात् समागमकाले यदा स त्वामालिङ्गिष्यति तदा चन्दनलेपयोग्य ते वक्षो भस्मयुक्तं भविष्यति, यद्धि नितरामनुचितं प्रतिभाति ॥ ६९ ॥

इयं च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥ ७० ॥

इयमिति । इयं च ते तव पुरतः आदावेव अन्या विडम्बना । परिहास इत्यर्थः । का सेत्यत्राह—ऊढया परिणीतया । वहेः कर्मणि क्तः । वारणराजहार्यया त्वया अधिष्ठितं आरूढं वृद्धं उक्षाणं वृद्धोक्षम् । 'अचतुर'—इत्यादिना निपातः । विलोक्य महाजनः साधुजनः स्मेरमुखः स्मितमुखः भविष्यति उपहसिष्यति यत् । इयमिति पूर्वेण सम्बन्धः । स्मेरेति 'नमिकम्पिस्म्यज०'—इत्यादिना रप्रत्ययः ॥ ७० ॥

PROSE ORDER :—(किं) च पुरतः इयं अन्या ते विडम्बना यद् ऊढया वारणराजहार्यया त्वया अधिष्ठितं वृद्धोक्षं विलोक्य महाजनः स्मेरमुखः भविष्यति ॥ ७० ॥

NOTES :—पुरतः—सर्वस्मात् पूर्वमेव first of all, *i. e.*, before you go to the house of Shiva and live with him It is an indeclinable formed by adding तस् to

धुर । विडम्बना—(वि + √डम्ब् to throw + युच्—अन + आ) हास्यकारणं matter for laughing ; disgrace ऊढया—(√वह् to carry + क्तः + आ = ऊढा) कृतविवाहया by her who had been married Passive past part of √वह् in the sense of 'to marry.' Adj of त्वया । वारणराजहार्यया—वारणानां (हस्तीनां) राजा वारणराज , तेन हर्तुं (नेतुं) योग्या वारणराजहार्या, तया fit to be borne by the lord of elephants Because she was a princess In वारणराज, राजन् is made राज by adding टच् to it by 'राजाहःसखिभ्यष्टच्' पा० ५.४.९१. i e, the words राजन्, अहन् and सखि, when at the end of a Tatpurusha, drop the final vowel together with the following consonant, if there be any, and add अ. The compound then is declined like the words ending in अ. हार्यया—Instrumental sing of हार्या—√हृ + ण्यत् fit to be borne. अधिष्ठितं—(अधि + √स्था + क्त) आरूढं ridden by ; occupied by वृद्धोक्षम्—वृद्धं उक्षं वृद्धोक्षं or वृद्धश्चासौ उक्षा (वृषभः) च वृद्धोक्षः, तं an old bull. The reference is to the bull of Shiva. The word उक्षन् (a bull) is changed to उक्ष at the end of a Karmadháraya compound by adding अ to it by 'अचतुर०...जातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः' पा० ५.४.७७. महाजनः—महांश्चासौ जनः महाजनः (सभ्य लोकः) great men. It gives the idea of many as well as of great or respectable. स्मेरमुखः । स्मेर—(√स्मि to smile + र) स्मयते इति स्मेरः smiling. र is added by 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' पा० ३.२.१६७. स्मे

(मन्दहासयुक्तं) मुखं यस्य स स्मेरमुखः with smiling countenance 70

CHANGE OF VOICE :—(किं) च पुरतः अनया अन्यया तें विडम्बनया (भूयते) यद् ऊढया वारणाराजहार्यया त्वया अधिष्ठितं वृद्धोक्षं विलोक्य महाजनेन स्मेरमुखेन भविष्यते ॥ ७० ॥

HINDI TRANSLATION :—सबसे पहिले यह तुम्हारी और दूसरी हँसी होगी कि श्रेष्ठ हाथी पर चढ़ने योग्य, विवाहित तुमको (शिवजी के) बुड्ढे बैल पर बैठे देखकर बड़े आदमी मुस्कराने लग जावेंगे ॥ ७० ॥

ENGLISH TRANSLATION —Then, first of all, there will be another humiliation for thee when great men will have smiling countenances on seeing thee, fit to be borne by a lordly elephant, riding an old bull, after marriage 70

PURPORT IN SANSKRIT :—हे पार्वति ! शिवस्य वाहनं वृषभोऽस्ति, तस्माद्विवाहानन्तरं यदा हस्तिराजवहनयोग्या त्वं तस्य वृद्धं वृषभमारुह्य तत्स्थानं गमिष्यसि तदा सर्वेऽपि प्रेक्षकास्त्वां दृष्ट्वा हसिष्यन्ति ॥ ७० ॥

द्वयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया पिनाकिनः ।
कला च सा कान्तिमती कलावत—
स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥७१॥

द्वयमिति । पिनाकिन· ईश्वरस्य समागमप्रार्थनया प्राप्तिकाम-

नया क्रियमाणयेति शेषः। सम्प्रति द्वयं शोचनीयतां शोच्यत्वं गतम्। किं तदाह—सा प्रागेव हरशिरोगता। अत्र सेति प्रसिद्धार्थत्वान्न यच्छब्दापेक्षा। तदुक्तं काव्यप्रकाशे—'प्रकान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपादानं नापेक्षते।' इति। कान्तिमती। नित्ययोगे मतुप्। कलावतः चन्द्रस्य कला षोडशो भागः च। अस्य लोकस्य नेत्रकौमुदी। नेत्रानन्दिनीत्यर्थः। त्वं च। कान्तिमतीत्वनेत्रकौमुदीत्वविशेषणयोरुभयत्राप्यन्वयः। प्रागेकैव शोच्या। संप्रति तु त्वमप्यपरेति द्वयं शोच्यमिति पिण्डितार्थः। शोच्यत्वं च निकृष्टाश्रयणादिति भाव ॥ ७१ ॥

PROSE ORDER :—पिनाकिनः समागमप्रार्थनया सम्प्रति कलावतः सा कान्तिमती कला च अस्य लोकस्य नेत्रकौमुदी त्वं च द्वयं शोचनीयतां गतम् ॥ ७१ ॥

NOTES :—पिनाकिनः—of the holder of the Pináka bow Some books read instead of it कपालिनः—(कपाल + इनिः = कपालिन्) कपालं (मृतमुण्डं) अस्यास्तीति कपालिन्, तस्य of one who bears skulls, *i e* of Shiva. It fits in the context better than पिनाकिनः। समागमप्रार्थनया—समागमस्य (सहवासस्य) प्रार्थना समागमप्रार्थना, तया by the desire for union (with Shiva) सम्प्रति—अधुना now कलावतः—(कला + मतुप् = कलावत्) प्रशस्ताः प्रचुराः वा कलाः सन्ति अस्य इति कलावान् (चन्द्रः) तस्य of the moon (possessed of digits) The म of मतु is changed to व when affixed to words ending in म् or अ, short or long, or having either for their penultimate 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' पा० ८ २ ६ सा—प्रसिद्धा which is well-known to be held by Shiva

on his forehead Here मा is not followed by, या, which should have been according to the general rule 'यत्तदोर्नित्यसम्बन्धः', because 'when the sense can be easily known the relative pronoun may be left understood *Cf* 'प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपादानं नापेक्षते ।' कान्तिमती—(कान्ति + मतुप् + ङीप्) कान्तिः (द्युतिः) अस्याः अस्तीति कान्तिमती bright ; possessed of lustre Adj of कला as well as of त्वं (पार्वती) कला —a digit of the moon, which is borne on his forehead by Shiva नेत्रकौमुदी । कौमुदी—चन्द्रप्रभा the moon-light. 'चन्द्रिका कौमुदी ज्योत्स्ना' इत्यमरः । It is also used for a thing which is pleasant like the moon-light नेत्रकौमुदी—नेत्रयोः कौमुदी like moon-light for the eyes of people A handsome woman is often called as such, because she is regarded agreeable to the eyes like the moon-light *Cf* 'त्वं कौमुदी नयनयोः अमृतं त्वमङ्गे' उत्तररामचरितम् ३ २६ It is an Adj. of त्वं as well as of कला । द्वयं—two things शोचनीयताम् (√शुच् + अनीय + ता) शोकविषयताम् deplorableness गतम्—प्राप्तम् have become.

In the Kávya Prakash this verse has been quoted as an instance of the fault अक्रमत्व *i e*, the absence of the syntactical order of words, because the particle च has been placed after लोकस्य instead of त्वं, which is its proper position, for it is the word त्वं and not लोक that is meant to be conjoined with कला ।

The ascetic means to say that Shiva, who bears skulls on his body, is not the right person to possess such beautiful things as the digit of the moon and Párvati 71

CHANGE OF VOICE :—पिनाकिनः समागमप्रार्थनया सम्प्रति कलावतः तया कान्तिमत्या कलया अस्य लोकस्य नेत्रकौमुद्या त्वया च (इति) द्वयेन शोचनीयतां गतेन (अभावि) ॥ ७१ ॥

HINDI TRANSLATION :—महादेव के साथ रहने की इच्छा से अब चन्द्रमा की वह चमकती हुई कला और इस संसार के नेत्रों की चन्द्रिका तू दोनो ही शोचनीय हो गयीं ॥ ७१ ॥

ENGLISH TRANSLATION —By (their) earnest desire for union with Shiva, two things have now become deplorable , that bright digit of the moon and thyself, who art the moonlight of the eyes of this world 71

PURPORT IN SANSKRIT :—हे गौरि ! मृतमुण्डधारी महादेवस्तु तादृशोऽमाङ्गलिको यत् शुभमपि वस्तु तत्संसर्गेण शोकविषयतां याति । तथा हि—पूर्वस्मिन् काले तु तस्य मस्तके वासाच्चन्द्रमसः कला शोचनीयाऽभूत् , इदानीञ्च ज्योत्स्नेव सर्व-जगतः नेत्राणामानन्दकारिणी त्वं तत्सहवासेच्छां कुर्वन्ती शोच-नीया भविष्यसि । किमतः परं दुःखकरम् ? ॥ ७१ ॥

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥ ७२ ॥

'कन्या मृगयते रूपं माता वित्तं पिता श्रुतम् । बान्धवाः कुल-मिच्छन्ति मिष्टान्नमितरे जनाः ।' इति लोकानामाभाषणम् । तत्र किञ्चिदपि नास्तीत्याह—वपुरिति । वपु तावदस्य विरूपाणि विकृतरूपाण्यक्षीणि नेत्राणि यस्य तद् विरूपाक्षम् । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इति षच् प्रत्ययः । वैरूप्यं च त्रिनेत्रत्वा-दिति क्षीरस्वामी । अतो न सौन्दर्यवार्त्तापीत्यर्थः । अलक्ष्यमज्ञातं जन्म यस्य तस्य भावस्तत्ता । कुलमपि न ज्ञायत इत्यर्थः । 'अल-क्षिता जनि ' इति पाठे जनिरुत्पत्तिरलक्षिता न ज्ञाता । 'जनि-रुत्पत्तिरुद्भव ' इत्यमर । वसु वित्तं दिगम्बरत्वेन एव निवेदितम् । नास्तीति ज्ञापितमित्यर्थ । यदि वित्तं भवति तदा कथं दिगम्बरो भवति । अतो ज्ञेयं निर्धनोऽयमिति । किं बहुना । हे बालमृगाक्षि पार्वति वरेषु वोढृषु । 'वरौ जामातृवोढारौ ' इति विश्वः । यत् रूपवित्तादिकं मृग्यते कन्यातद्वन्धुभिरन्विष्यते तत् त्रिलोचने त्र्यम्बके व्यस्तं एकं अपि । समस्तं मा भूदिति भावः । अस्ति किम् नास्त्येवेत्यर्थ ॥ ७२ ॥

Prose Order :—(अस्य) वपु. विरूपाक्षम्, अलक्ष्य-जन्मता, वसु दिगम्बरत्वेन निवेदितम् । (हे) बालमृगाक्षि ! यद् वरेषु मृग्यते तत् त्रिलोचने व्यस्तं अपि अस्ति किम् ? ॥ ७२ ॥

Notes :—वपु —शरीरं the body. विरूपाक्षम्—(विरूप + अक्षि + षच्) विरूपं (विकृतं) अक्षि (नेत्रं) यस्य यस्मिन् वा तद् विरूपाक्षम् having deformed eye. Shiva's third eye is described as fiery and tawny-coloured. When explained thus the compound refers to the third eye only, but when explained in the following way it will refer to the state of possessing three eyes—विरूपाणि अक्षीणि यस्मिन् having odd number of eyes. अक्षि is

made अक्ष by dropping इ and adding अ (पच्) instead of it, when at the end of a Bahuvrihi compound. 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् पच्' पा० ५ ४ ११३। अलक्ष्य-जन्मता—न लक्ष्यं अलक्ष्यं (अज्ञातम्), अलक्ष्यं जन्म यस्य स अलक्ष्यजन्मा, तस्य भाव अलक्ष्यजन्मता (जन्म+तल्) whose birth or parentage is unknown Some books read अलक्षिता जनि for अलक्ष्यजन्मता। जनि means उत्पत्ति birth वसु—धनम् wealth 'रत्ने धने वसु' इत्यमर· Decline वसु as वसु, वसुनी, वसूनि । वसु, वसुनी, वसूनि । वसुना, वसुभ्यां, वसुभिः । etc दिगम्बरत्वेन—दिश एव अम्बराणि (वस्त्राणि) यस्य स दिगम्बर, तस्य भावः दिगम्बरत्वम्, तेन by his having the quarters for his garments ; by his nudity Shiva is described naked and putting on only the elephant's hide निवेदितं—विज्ञापितम् is indicated , is shown. When he cannot afford to have proper garments he must be an extremely poor man बालमृगाक्षि—(बालमृग+अक्षि+षच्+ङीप्) बालश्चासौ मृग बालमृग , बालमृगइव अक्षिणी यस्या सा बालमृगाक्षी, तस्या सम्बोधने O thou possessing eyes like those of a young fawn. यद्—whatever qualities. These are mentioned in the verse—" कन्या मृगयते रूपं माता वित्तं पिता श्रुतम्। बान्धवा कुलमिच्छन्ति मिष्टान्नमितरे जनाः।" वरेषु—व्रियते इति वर (√वृ+अप्) तेषु with regard to bridegrooms. मृग्यते—is sought. Passive present of √मृग् so seek. त्रिलोचने—त्रीणि लोचनानि यस्य सः त्रिलोचनः, तस्मिन् in the three-eyed God (*i e.,*

Shiva). व्यस्तम्—(वि + √अस् to throw + क्तः) एकैकम् even one ; separately ; scattered. It is the opposite of समस्तम्. The ascetic means to say that even one of the required qualities of a bridegroom is not found in Shiva, to say nothing of the aggregate of all of them. 72.

CHANGE OF VOICE :—(अस्य) वपुषा विरूपाक्षेण (भूयते) अलक्ष्यजन्मतया (भूयते) वसु दिगम्बरत्वं निवेदितवत्; (हे) बालमृगाक्षि यत् (जनाः) वरेषु मृगयन्ते तेन त्रिलोचने व्यस्तेन अपि भूयते ? ॥ ७२ ॥

HINDI TRANSLATION :—(इस महादेव का) शरीर विकृत आँख वाला है, जन्म अज्ञात है, धन उसकी नग्नता बताती है ; (हे) मृगशावक के समान नेत्र वाली, जो बातें वरों में खोजी जाती हैं, क्या उनमें से एक भी इस तीन आँखों वाले में है ? ॥ ७२ ॥

ENGLISH TRANSLATION :—His body possesses deformed eyes, his birth is unknown, (and his) wealth is shown by his having the quarters for a garment (*i.e.*, nudity). O thou possessing eyes like those of a young fawn, whatever is sought in a bridegroom, is that even in part found in the three-eyed one ? 72.

PURPORT IN SANSKRIT :—हे मृगशावकनयने पार्वति ! सौन्दर्यं, धनं, विद्या, कुलञ्चेति चत्वारि वस्तूनि परीक्ष्य कन्यार्थं वराः स्वीक्रियन्ते, परं महादेवे त्वेतेषु एकमपि वस्तु नास्ति चतुर्णां

तु का कथा? यतस्तस्य शरीरं पिङ्गलनेत्रयुक्तं नेत्रत्रययुक्तं वास्ति तस्मान्न स सुन्दरः, यतस्तस्योत्पत्तिविषये न किमपि ज्ञायते तस्मात् स कुलीन इति कथयितुं न शक्यते, यतश्च स नग्नो दिगम्बरो वास्ति तस्मात्स निर्धन इति विज्ञायते। शिवो न केनापि प्रकारेण ते योग्य इति तात्पर्यम् ॥ ७२ ॥

निवर्तयास्माद्सदीप्सितान्मनः
क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया ॥ ७३ ॥

निवर्तयेति। अस्मात् असदीप्सितात् अनिष्टमनोरथात् मनः निवर्तय निवारय। तद्विधः स पूर्वोक्ता विधा प्रकारो यस्य तथोक्तः। अमङ्गलशील इत्यर्थः। क्व। महदन्तरमित्यर्थः। पुण्यलक्षणा प्रशस्तभाग्यचिह्ना त्वं च क्व। अतो न तवायमर्ह इत्यर्थः। तथा हि। साधुजनेन। 'साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्' इति विश्वः। श्मशानशूलस्य श्मशानभूमिनिखातस्य मध्यशङ्कोः वैदिकी वेदोक्ता। यूपो नाम पशुबन्धनसाधनभूतः संस्कृतदारुविशेषस्तस्य सत्क्रिया प्रोक्षणाभ्युक्षणादिसंस्कारः यूपसत्क्रिया न अपेक्ष्यते नेष्यते। यथा श्मशानशूले यूपसत्क्रिया न क्रियते तथा त्वमपि तस्मै न घटस इति तात्पर्यार्थः ॥ ७३ ॥

PROSE ORDER :—(हे गौरि) अस्माद् असदीप्सिताद् मनः निवर्तय, तद्विधः क्व? पुण्यलक्षणा त्वं च क्व? साधुजनेन श्मशानशूलस्य वैदिकी यूपसत्क्रिया न अपेक्ष्यते ॥ ७३ ॥

NOTES :—असदीप्सितात्। ईप्सितात्—(√आप्+सन्+क्तः) मनोरथात् desire. For the formation of ईप्सित see

notes on ईप्सित in verse 5 न सत् असत्; असच्च तदीप्सितं च असदीप्सितं, तस्मात् from the evil desire, *viz.* marrying Shiva. Ablative case is used of that from which one is kept off 'वारणार्थानामीप्सितः' पा० १ ४ २७। तद्विधः—सा विधा (प्रकारः) यस्य सः तद्विधः of that sort, *i e*, as described in the foregoing shlokas क—क— These two particles are used to indicate great disparity between two things Here they show the great difference with regard to beauty etc between Shiva and Parvati See notes on verse 4 पुण्यलक्षणा—पुण्यानि (शुभानि) लक्षणानि (चिह्नानि) यस्याः सा possessed of auspicious marks The statement contained in the first two lines is corroborated by means of an instance (दृष्टान्त) in the last two lines. साधुजनेन—साधुश्चासौ जनस्तेन (पण्डितजनेन) by good persons श्मशानशूलस्य —श्मशाने श्मशानस्य वा शूलम् (शङ्कु) श्मशानशूलं, तस्य of the stake used for impaling criminals in a cemetery ground वैदिकी—(वेद+ठञ्—इक+ङीप्) वेदे भवा वैदिकी (वेदोक्ता) as ordained in the Vedas ठञ् is added by the rule 'अध्यात्मादिभ्यश्च'। यूपसत्क्रिया। यूपः—a sacrificial post to which beasts are tied in sacrifices. सत्क्रिया—संस्कारः a purificatory ceremony, such as washing etc यूपस्य सत्क्रिया यूपसत्क्रिया or यूपोचिता सत्क्रिया यूपसत्क्रिया the ceremonies with regard to a sacrificial post. न अपेक्ष्यते—न इष्यते is not desired. A stake is used for unholy purposes while a sacrificial

post is used for sacred purposes—how can, then, the rites prescribed for the latter be performed in case of the former? And just as it is improper to do so, so is your relation with Shiva 73

CHANGE OF VOICE —(हे गौरि) अस्माद् अमदीप्सिताद् (त्वया) मनः निवर्त्यताम्, तद्विधेन क (भूयते) पुण्यलक्षणाया त्वया च क (भूयते)? साधुजनः श्मशानशूलस्य वैदिकीं यूपसत्क्रियां न अपेक्षते ॥ ७३ ॥

HINDI TRANSLATION :—(हे पार्वति) इस बुरी इच्छा से मन हटा लो; इस प्रकार का वह कहाँ और शुभ चिह्नो वाली तुम कहाँ? श्रेष्ठ पुरुष श्मशान की शूली का वेदों में बताया हुआ यज्ञस्तम्भ सम्बन्धी संस्कार नहीं करते ॥ ७३ ॥

ENGLISH TRANSLATION —Turn thy heart from this evil desire, how widely different are the two—he of that sort and thee possessed of auspicious marks? Good persons do not perform with regard to a stake in the cemetery the purificatory ceremonies proper for a sacrificial post as ordained in the Vedas 73

PURPORT IN SANSKRIT :—हे पार्वति! चिताभस्मकपालाद्यशुभवस्तुषु प्रीतिकारिणि शिवे शुभचिह्नान्वितायां त्वयि च महदन्तरम्, तस्माच्छिवप्राप्तिरूपानुचिता कामना त्वया त्याज्या। यथा हि पण्डिताः श्मशानस्थितस्य शङ्कोः यूपसम्बन्धिनं वेदोक्तं संस्कारं न कुर्वन्ति तथैव त्वयाप्यमाङ्गलिकः स माङ्गलिक इव न कमनीयः ॥ ७३ ॥

इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया।

विकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्यगुपान्तलोहिते ॥ ७४ ॥

इतीति । इति एवं प्रकारेण द्विजातौ द्विजे प्रतिकूलवादिनि सति । प्रवेपमानाधरलक्ष्यकोपया प्रवेपमानेन चञ्चलेनाधरोष्ठेन लक्ष्यः अनुमेयः कोपः क्रोधो यस्यास्तथोक्तया तया पार्वत्या उपान्तलोहिते प्रान्तरक्ते विलोचने विकुञ्चितभ्रूलतं विकुञ्चिते कुटिलिते भ्रूलते यस्मिंस्तत्तथा । सभ्रूभङ्गमित्यर्थः । तिर्यक् साचि आहिते निहिते । अनादरात्तिर्यगैक्ष्यतेत्यर्थः ॥ ७४ ॥

PROSE ORDER :—द्विजातौ इति प्रतिकूलवादिनि (सति) प्रवेपमानाधरलक्ष्यकोपया तया उपान्तलोहिते विलोचने विकुञ्चितभ्रूलतं तिर्यग् आहिते ॥ ७४ ॥

NOTES :—द्विजातौ—द्वे जाती (जन्मनी) यस्य स द्विजातिः, तस्मिन् the Bráhmana प्रतिकूलवादिनि—प्रतीपं कूलात् प्रतिकूलं against the current, hence against one's wishes प्रतिकूलं वदतीति प्रतिकूलवादिन् (वद्+णिनिः) तस्मिन् talking against her wish Párvati was least prepared to listen to such an adverse criticism of her beloved, hence प्रवेपमानाधरलक्ष्यकोपया—(प्र+√वेप्+शानच्) प्रवेपमानेन (कम्पमानेन) अधरेण (अधरोष्ठेन) लक्ष्यः (अनुमेयः) कोपो यस्याः सा प्रवेपमानाधरलक्ष्यकोपा, तया whose anger could be guessed by her quivering the nether lip. It is well-known that the lower-lip begins to tremble if an attempt is made to speak while in anger. उपान्तलोहिते—अन्तस्य समीपं उपान्तं ; उपान्तयोः (प्रान्तभागयोः) लोहिते (रक्ते) उपान्तलोहिते red at the

corners Adj. of विलोचने the eyes विकुञ्चितभ्रूलतम्। विकुञ्चिता—(वि+√कुञ्च् to contract+क्तः) कुटिलतां नीता contracted ; curved (in a frown) भ्रूलता—भ्रूरेव लता भ्रूलता creeper-like eyebrows विकुञ्चिता भ्रूलता यस्मिन् कर्मणि तद् विकुञ्चितभ्रूलतम् in which the creeper-like brows were contracted तिर्यक्—(तिरस्+√अञ्च्+क्विन्) obliquely, sideways तिरस् is changed to तिरि before अञ्च् by 'तिरसस्तिर्यलोपे' पा० ६ ३ ६४। आहिते—(आ+√धा+क्त) कृते ; प्रेरिते *i. e.*, were cast It is natural that Párvati's anger was excited when the ascetic talked ill of her beloved 74

Change of Voice :—द्विजातौ इति प्रतिकूलवादिनि (सति) प्रवेपमानाधरलक्ष्यकोपा सा उपान्तलोहिते विलोचने विकुञ्चितभ्रूलतं तिर्यग् आहितवती ॥ ७४ ॥

Hindi Translation :—उस ब्राह्मण के इस प्रकार (उसकी इच्छा के) विरुद्ध बोलने पर, जिसका क्रोध निचले ओंठ के फड़फड़ाने से प्रकट हो रहा था ऐसी उस (पार्वती) ने कोनों की ओर लाल नेत्रों से भौंओं को टेढ़ा कर के (उस पर) तिरछी निगाह डाली ॥ ७४ ॥

English Translation —When the Bráhmana was talking so adversely, askance eyes, red at the corners (and) with the creeper-like eye-brows contracted (in frown) were cast (at him) by her whose anger was visible from her quivering nether lip 74.

Purport in Sanskrit :—शिवनिन्दारूपं ब्रह्मचारिणस्तत्कथनं श्रुत्वा पार्वती नितरां कुपिता जाता , क्रोधेन च तस्या

अथरोगाट्टाऽकस्मात नेत्रे च प्रान्तभागयोः रक्ते जाते तथा च सा तन्मुखाद् दृष्टिमाकृष्य भ्रुव कुटिलां कृत्वावज्ञया तिर्यगवालोकत ॥ ७४ ॥

उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥ ७५ ॥

उवाचेति । अथ एनं ब्रह्मचारिणं उवाच च । किमिति । परमार्थतः तत्त्वतः हरं न वेत्सि न जानासि नूनम् । कुतः । यतः मां एव उक्तया रीत्या आत्थ ब्रवीषि । ' ब्रुवः पञ्चानामादितः '—इति सूत्रसिद्धि । अज्ञानादेवाय शिवद्वेषस्तवेत्याशयेनाह—मन्दा मूढाः । मूढाल्पापटुनिर्भाग्या मन्दाः ' इत्यमरः । लोकसामान्यमितरजनसाधारणं न भवति इति अलोकसामान्यं अचिन्त्यहेतुकं दुर्बोधकारणकं महात्मनां चरित द्विषन्ति हेत्वपरिज्ञानाद्दूषयन्ति । विद्वांसस्तु कोऽप्यत्र हेतुरस्तीति बहु मन्यन्त इत्यर्थः ॥ ७५ ॥

PROSE ORDER :—(गौरी) एन उवाच च, नून परमार्थतः हरं न वेत्सि, यतः मां एवं आत्थ, मन्दाः अलोकसामान्यं अचिन्त्यहेतुकं महात्मनां चरितं द्विषन्ति ॥ ७५ ॥

NOTES :—एनं—एतं ब्रह्मचारिणं to this Brahmacharin. एनं is the optional form of इदम् and एतत् in the Accusative sing to be used when there is अन्वादेश *i e*, their proper forms have already been used in a previous clause. ' द्वितीयाटौस्वेनः ' पा० २ ४.३४ । नूनं—निश्चयेन certainly. परमार्थत—परमश्चासौ अर्थश्च परमार्थः (सत्यं),

नस्मात् परमार्थतः (परमार्थ+तसिल्) in reality, truly; correctly परमार्थ means the highest sense or truth. तसिल् is added in the sense of the Ablative by 'पञ्चम्यास्तसिल्' पा० ५ ३ ७ । न वेत्सि—न जानासि thou knowest not This is a refutation of the ascetic's assertion 'विदितो महेश्वरः' in verse 65 आत्थ—ब्रवीषि thou sayest Present tense, second pers sing of √ ब्रू 'to speak' ब्रू is replaced by आह and सिप् the termination by थल् । See notes on आह in verse 56 Now, Parvati supports this charge by means of a general statement which means that the dull-minded find fault with the life of the great, which has something unusual about it and the purpose of which can not be easily understood मन्दाः—मूढाः idiots, dull-witted 'मूढाल्पापटुनिर्भाग्या मन्दा' इत्यमरः । अलोकसामान्यम्—न लोकानां लोकेषु वा सामान्यं (साधारणं) इति अलोकसामान्यम् or, न विद्यते लोके सामान्यं यस्य तत् which is not in common with that of other people, *i e* which has something extraordinary about it अचिन्त्यहेतुकम्—(न+√ चिन्त्+यत्=अचिन्त्यं) चिन्तयितुं योग्यं चिन्त्यं; न चिन्त्य अचिन्त्यं (विचारयितुमशक्यम्) which can not be grasped अचिन्त्यः हेतुः (कारणं) यस्य तत् अचिन्त्यहेतुकम् the motive of which can not be understood Parvati means to say that it was not easy for the Brahmacharin to know as to why Shiva lived in nudity and did other similar things कप् is added to हेतु because it is at the end

of a Bahuvrihi compound, by ' शेषाद् विभाषा ' पा० ५ ४ १५४ । महात्मनाम्—महान् आत्मा येषां ते महात्मानः, तेषाम् of the magnanimous , of the great-minded चरितं—चरित्रं the life द्विषन्ति—द्वेषेण पश्यन्ति hate , look at it with jealousy For the idea *Cf*, ' दाह्यमाना सुतीव्रेण नीचाः परशयोग्निना । अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते ।

The figure of speech used in this verse is अर्थान्तरन्यास in which a statement is corroborated by means of a general statement 75.

Change of Voice :—(गौर्या) अयं ऊचे च—नूनं (त्वया) परमार्थतः हरो न विद्यते, यत. (त्वया) अहं एवं उच्ये । मन्दैः अलोकसामान्यं अचिन्त्यहेतुक महात्मनां चरितं द्विष्यते ॥ ७५ ॥

Hindi Translation :—(पार्वती) उससे बोली—सचमुच तुम वास्तविक रूप से महादेव को नहीं जानते, क्योंकि मुझ से इस प्रकार कहते हो । मूर्ख लोग अलौकिकतापूर्ण एवं जिसका उद्देश्य आसानी से नहीं समझा जा सकता ऐसे महात्माओं के चरित्र से शत्रुता करते हैं ॥ ७५ ॥

English Translation —And she said to him—' Indeed thou dost not know Shiva correctly, since thou talkest thus to me The dull-witted bear enmity against the course of life of the great, which is not in common with that of other people and the purpose of which is difficult to be understood ' 75

Purport in Sanskrit :—स्वकोपमवज्ञाञ्च प्रदर्श्य पार्वती ब्रह्मचारिणमाह—' यतस्त्वं शिवस्य याथार्थ्यं न जानासि तस्मादेवं

कथयसि। इदञ्चमुविज्ञानमेव समारे यन् त्वमिवान्येऽपि मूढ-पुरुषा अनन्यसाधारणमविज्ञेयकारणञ्च महापुरुषाणां चरित्रं द्वेष-भावेनाधिक्षिपन्ति ॥ ७५ ॥

विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिषः सतः
किमेभिराशोपहतात्मवृत्तिभिः ॥ ७६ ॥

सम्प्रति । अमङ्गलाभ्यासरतिं (५।६५) इत्याद्युक्तदूषणजातं विपदित्यादिभिः षड्भिः श्लोकैः परिहर्तुमारभते—विपदिति । विपत्प्रतीकारपरेण । अनर्थपरिहारार्थिनेत्यर्थ । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति दीर्घः । भूतिसमुत्सुकेन ऐश्वर्यकामेन वा मङ्गलं गन्धमाल्यादिकं निषेव्यते । शरणे रक्षणे साधुः शरण्यः । 'तत्र साधुः' इति यत्प्रत्ययः । 'शरणं गृहरक्षित्राः' इत्यमरः । जगत शरण्यस्तस्य जगच्छरण्यस्य निराशिषः निरभिलाषस्य सत शिवस्य । 'आशीरुरगदंष्ट्रायां विप्रवाक्याभिलाषयोः' इति शाश्वतः । आशोपहतात्मवृत्तिभि आशया तृष्णयोपहता दूषितात्म-वृत्तिरन्तःकरणवृत्तिर्येषां ते एभिः मङ्गलैः किम् । वृथेत्यर्थः । पूर्वं मङ्गलमित्येकवचनस्य जात्यभिप्रायत्वादेभिरिति बहुवचनेन परामर्शो न विरुध्यते । इष्टावाप्त्यनिष्टपरिहारार्थिनो हि मङ्गला-चारनिर्बन्धः । तदुभयासंसृष्टस्य तु यथाकथंचिदास्ताम् । को दोष इत्यर्थः । एतेन 'अमङ्गलाभ्यासरतिम्' (५।६५) इत्युक्तं प्रत्युक्तम् ॥ ७६ ॥

PROSE ORDER :—विपत्प्रतीकारपरेण वा भूतिसमुत्सुकेन मङ्गलं निषेव्यते, जगच्छरण्यस्य निराशिषः सतः (शिवस्य) आशोपहतात्मवृत्तिभिः एभिः किम् ? ॥ ७६ ॥

NOTES :—In this and the following five verses Párvati refutes the charges levelled against Shiva by the ascetic. In this shloka is refuted the criticism contained in 'अमङ्गलाभ्यासरति' etc. verse No 65 विपत्प्रतीकारपरेण। प्रतीकारः—(प्रति+√कृ+घञ्) परिहारः warding off. इ of प्रति is lengthened by 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' पा० ६ ३ १२२ विपदां प्रतीकारः परः (इष्टः) यस्य सः विपत्प्रतीकारपर, तेन who is anxious to ward off calamities. भूतिसमुत्सुकेन—भूतौ (ऐश्वर्ये) समुत्सुक भूतिसमुत्सुकः, तेन भूतिसमुत्सुकेन eager to obtain prosperity 'भूतिर्भस्मनि सम्पदि' इत्यमरः। मङ्गलं—auspicious things निषेव्यते—(नि+√सेव्+य+ते) are resorted to, are attended to. स of √सेव् is changed to ष् by 'परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्' पा० ८।३।६१। जगच्छरण्यस्य—जगत्+शरण्यस्य। शरण्यः—(शरण+यत्) शरणे साधुः (समर्थः) शरण्यः who is capable of providing shelter. यत् is added by 'तत्र साधुः' पा० ४.४ ९८ जगतां शरण्यस्य जगच्छरण्यस्य who is the protector of the worlds. निराशिष—निर्गता आशीः (इच्छा) यस्मात् स निराशीः, तस्य निराशिषः who has no desire. आशीः means 'desire' 'आशीः उरगदंष्ट्रायां विप्रवाक्याभिलाषयोः' इति शाश्वतः। Mark the contrast between विपत्प्रतीकारपर and जगच्छरण्य and भूतिसमुत्सुक and निराशीः Párvati means to say that it is not only that Shiva is not विपत्प्रतीकारपर and भूतिसमुत्सुक but he is जगच्छरण्य and निराशीः, and when he is as such

it matters little if he is अमङ्गलाभ्यासरति। सतः—being. Gen. sing of सत्, pres part of √अस् to be आशोपहतात्मवृत्तिभिः—आशया (तृष्णया) उपहता आत्मन वृत्तिः यैः तानि आशोपहतात्मवृत्तीनि, तैः आशोपहतात्मवृत्तिभिः which corrupt or vitiate the functions of the soul by producing desire. It qualifies एभिः which stands for मङ्गलै.। When Shiva has no desire whatsoever he need not care for auspicious things 76

CHANGE OF VOICE :—विपत्प्रतीकारपरः वा भूतिसमुत्सुकः (जन) मङ्गल निषेवते, जगच्छरण्यस्य निराशिषः सत (शिवस्य) आशोपहतात्मवृत्तिभिः एभिः किम् ? ॥ ७६ ॥

HINDI TRANSLATION :—आपत्ति को हटाने में लगा हुआ अथवा ऐश्वर्य की कामना वाला व्यक्ति शुभ वस्तुओ की खोज में रहता है , संसार के रक्षक एवं निरीह (इच्छारहित) के लिये तृष्णा के द्वारा आत्मा के चलन को बिगाड़ने वाली इन शुभ वस्तुओं से क्या प्रयोजन ? ॥ ७६ ॥

ENGLISH TRANSLATION —Auspicious things are resorted to by one, who is anxious to ward off calamities or eager to attain prosperity What has he, who is the protector of the world and is free from desires, to do with these which spoil the functions of the soul by (producing) desire 76

PURPORT IN SANSKRIT .—'शिवोऽमङ्गलाभ्यासरतिः' इति ब्रह्मचारिणः कथितं पार्वती प्रतिवदति—यत् त एव जना मङ्गलकारीणि वस्तूनि सेवन्ते ये विपत्त्याभिभूता भवन्त्यथ वा सम्पत्तिप्राप्त्यर्थं समुत्सुका भवन्ति। शिवस्तु सर्वेषां रक्षकस्स्वयं

न कदाचिदपि विपदाभिभूयते. स आप्तकामश्च तस्मान्न स किमपि वस्तु कामयते । अतस्तस्यैभिरन्तःकरणतृष्णावर्धकैर्मङ्गलैः किं प्रयोजनम् ? ॥ ७६ ॥

अकिंचनः सन्प्रभवः स संपदां
त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ॥ ७७ ॥

अकिंचन इति । स हरः । न विद्यते किंचन द्रव्यं यस्य स अकिंचनः दरिद्रः सन् संपदां प्रभवत्यस्मादिति प्रभवः कारणम् । पितृसद्मगोचरः श्मशानाश्रयः सन् त्रिलोकनाथ त्रयाणां लोकानां नाथः । 'तद्धितार्थ'—इत्यादिनोत्तरपदसमासः । स देवो भीमरूपः भयकराकार सन् शिव सौम्यरूप इति उदीर्यते उच्यते । अतः पिनाकिन हरस्य याथार्थ्यविद यथाभूतो अर्थो यथार्थस्तस्य भावो याथार्थ्यं तत्त्वं तस्य विदः न सन्ति । लोकोत्तरमहिम्ना निर्लेपस्य यथाकथंचिदवस्थान न दोषायेति भाव । एतेन 'अवस्तुनिर्बन्धपरे' (५।६६) इति परिहृतं वेदितव्यम् ॥ ७७ ॥

Prose Order —सः अकिञ्चन सन् सम्पदां प्रभव, पितृसद्मगोचरः (सन्) त्रिलोकनाथः, स भीमरूपः शिव इति उदीर्यते, पिनाकिनः याथार्थ्यविद न सन्ति ॥ ७७ ॥

Notes :—अकिञ्चनः—न विद्यते किंचन (द्रव्यं) यस्य सः अकिंचन· who possesses nothing *i e*, is poor. It is a Tatpurusha compound and not a Bahuvrihi, formed irregularly under the class मयूरव्यंसकादि by 'मयूरव्यंसकादयश्च' पा० २ १ ७२. सम्पदां—सम्पत्तीनां of riches.

प्रभवः—(प्र+√भू+अप्) प्रभवन्त्यस्मादिति प्रभवः (उत्पत्तिस्थानम्) source ; producer पितृसद्मगोचरः—पितृणां (भूतानां) सद्म (स्थान) गोचर (आश्रयः) यस्य स पितृसद्मगोचरः who lives in the abode of the dead *i e*, in the cremation-ground *Cf* 'वासः पितृणां वने'। सद्मन्—गृहं an abode 'गृह गेहोदवसितं वेश्म सद्म निकेतनम्, इत्यमरः। Decline सद्मन् as सद्म, सद्मनी, सद्मानि etc गोचरः—dwelling-place Primarily it means 'a pasture ground for cattle' त्रिलोकनाथ—त्र्यवयवो लोकस्त्रिलोकः, (मध्यमपदलोपिसमासः) तस्य नाथः Lord of the three regions. Or, according to Mallinátha त्रयाणां लोकानां नाथ त्रिलोकनाथः, but this is not without doubt See notes on त्रिलोकसौन्दर्यम् in verse 41 भीमरूप—बिभेति अस्मादिति भीमम्, भीमं रूपं यस्य सः भीमरूपः who is of terrible form शिवः—the auspicious one ; benign. उदीर्यते—(उद्+√ईर्+य+ते) कथ्यते is said √ईर् to shake or to go, when preceded by उत् means 'to say'. पिनाकिनः—शिवस्य of the Pináka-holder See notes on this word in verse 56 याथार्थ्यविदः। याथार्थ्यम्—यथाभूतोऽर्थो यथार्थ (प्रादिसमासः), यथार्थस्य भावः याथार्थ्यं (यथार्थ+ष्यञ्) तत्त्व reality याथार्थ्यं विदन्ति (जानन्ति) इति याथार्थविदः (√विद्+क्विप्) who know the reality.

Párvati says that no one can form on accurate idea of Shiva, who is possessed of contradictory qualities, such as, being poor he is the source of all wealth, though living in the cemetery-ground he is the lord

of all the three worlds and though of terrible form he is auspicious When it is so the remarks about Shiva by the ascetic do not hold good. This verse is a reply to verses 66, 67 and 68 77.

CHANGE OF VOICE :—तेन अकिंचनेन सता संपदां प्रभवेण (भूयते), पितृवनगोचरेण (सता) त्रिलोकनाथेन (भूयते), न भीमरूप (सन्तं) (जनाः) शिव इति उदीरयन्ति, पिनाकिनः याथार्थ्यविद्भि न भूयते ॥ ७७ ॥

HINDI TRANSLATION —वह निर्धन होते हुए भी सम्पत्तियों का उत्पत्ति स्थान है, मृतकों की भूमि में रहता हुआ भी तीनों लोकों का स्वामी है, वह भयङ्कर आकार वाला भी लोगों से कल्याणकारी कहा जाता है, शिव की वास्तविकता को जानने वाले (पुरुष) नहीं हैं ॥ ७७ ॥

ENGLISH TRANSLATION —Though poor, he is the source of wealth, living in the cemetery ground, he is the lord of the three worlds, being of terrible form, he is called auspicious There is none who knows the reality about the Pinaka-holder (*i e*, Shiva) 77

PURPORT IN SANSKRIT :—यद्यपि शिवो भूषणवस्त्रादिभिः रहितः स्वय निर्धनः परं स सर्वप्रकारकाणां धनानामुत्पादकः, यद्यपि स गृहहीन श्मशानवासी तथापि स त्रयाणामपि लोकानां प्रभुः, एवमेव च यद्यपि सर्पादिभिरावृतो भयानकरूपः परं स शिवः (कल्याणकारी) कथ्यते । एतेन ज्ञायते यत्संसारे शिवस्य याथार्थ्येन ज्ञातारो न सन्ति । तव कथनमप्ययथातथम् ॥ ७७ ॥

विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथ वेन्दुशेखरं
न विश्वमूर्त्तेरवधार्यते वपुः ॥ ७८ ॥

देवस्य लौकिकं अलौकिकं च प्रसाधनं नास्तीत्याशयेनाह— विभूषणेति । विश्वं मूर्त्तिर्यस्येति विश्वमूर्तेः अष्टमूर्तेः शिवस्य वपुः शरीरं भूषणैरुद्भासत इति विभूषणोद्भासि स्यात् । पिनद्धभोगि आमुक्तभुजङ्गम वा स्यात् । पिनद्धेति नह्यतेरपिपूर्वात्कर्मणि क्तः । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।' इत्यकारलोपः । गजाजिनालम्बि स्यात् । अथ वा दुकूलधारि स्यात् । कपालमस्यास्तीति कपालि ब्रह्मशिरःकपालशेखरं वा स्यात् ' अथ इन्दुशेखरं वा स्यात् । न अवधार्यते न निर्धार्यते । सर्वं सम्भवतीत्यर्थः । एतेन ' त्वमेव तावत् ' (५।६७) श्लोकोक्तं प्रत्युक्तमिति ज्ञेयम् ॥ ७८ ॥

PROSE ORDER :—विश्वमूर्तेः वपुः न अवधार्यते, विभूषणोद्भासि वा पिनद्धभोगि, गजाजिनालम्बि वा दुकूलधारि, कपालि वा अथवा इन्दुशेखरं स्यात् ॥ ७८ ॥

NOTES :—विश्वमूर्तेः—विश्वं मूर्ति (स्वरूपं) यस्य स विश्वमूर्ति तस्य विश्वमूर्तेः of him whose form is the universe *i e*, of Shiva न अवधार्यते—न निश्चीयते is not known definitely, √धृ to hold when preceded by अव means 'to determine accurately' विभूषणोद्भासि । उद्भासि—(उत् + √भास् + णिनिः) उद्भासते इति उद्भासि (शोभि) shining विभूषणैः उद्भासते इति विभूषणोद्भासि resplendent with ornaments. पिनद्धभोगि । पिनद्ध —(अपि + √नह् to bind + क्त)

बद्धः tied. अ of अपि is optionally dropped by 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः', so also अपिनद्धः। भोगिन्—(भोग+इनिः) भोगः (फणः) अस्यास्तीति भोगिन् possessing hood i e, a serpent 'उरगः पन्नगो भोगी जिह्मगः पवनाशनः' इत्यमरः। पिनद्धाः भोगिनः यस्मिन् तत् पिनद्धभोगि engirdled or wrapped by serpents. गजाजिनालम्बि—गजस्य अजिनं (चर्म) आलम्बते इति गजाजिनालम्बि (आ+√लम्ब्+णिनिः) covered with elephant's hide. अजिनं—skin 'अजिन कृत्तिः चर्म' इत्यमरः। दुकूलधारि—दुकूलं (क्षौम) धारयति इति दुकूलधारि (√धृ+णिनिः) putting on silken garments कपालि—(कपाल+इनि) कपालं (शिरोऽस्थि) यस्मिन् अस्तीति कपालि having a skull (in the crest) According to the mythological books Shiva holds in his crest a skull of Brahman's head *Cf.* 'जगत्सिसृक्षासमयेषु वेधसां प्रणामलोलानि शिरांसि पादयोः। जगद्विरामेषु कपालशेषतां गतानि तिष्ठन्ति जटासु धूर्जटेः। According to another legend 'Shiva once got very angry with Brahman on hearing the latter's proud declaration that he (Shiva) had sprung from his forehead, etc , and created in anger the fierce Kálabhairava, who severed one of the heads of Brahman with his nails. Shiva, therefore, wore, as Kálabhairava, the skull of Brahman's head इन्दुशेखरं—इन्दुः शेखरो (शेखरे वा) यस्य तत् having moon on its crest. विभूषणोद्भासि etc. are Adjectives of वपुः and so in neuter gender nom. singular.

Párvati means to say that Shiva's form is a puzzle for the people, which they can never solve. Therefore to say that his form is such and such is not right. This is a reply to verses 66, 67 and 71. 78.

CHANGE OF VOICE :—विश्वमूर्त्तेः वपुः (जना) न अवधारयन्ति, (तेन) विभूषणोद्भासिना वा पिनद्धभोगिना, गजाजिनालम्बिना वा दुकूलधारिणा, कपालिना वा अथवा इन्दुशेखरेण भूयते ॥ ७८ ॥

HINDI TRANSLATION :—जगत्स्वरूप (शिव) का शरीर निश्चय तौर पर ज्ञात नहीं है ; वह आभूषणों से चमकता हुआ है अथवा सांपों से लपेटा हुआ, हाथी के चर्म से ढका हुआ है अथवा रेशमी वस्त्र से, सिर में कपाल धारण किये हुए है या चन्द्रमा (की कला) ॥ ७८ ॥

ENGLISH TRANSLATION —The body of him whose form is the Universe can not be determined, it may be resplendent with ornaments or wrapped with serpents, it may be covered with elephant-hide or silken garments, or it may have a skull or the moon on its crest 78

PURPORT IN SANSKRIT :—जगत्स्वरूपस्य शिवस्य रूपं प्रकारतः परिमाणतश्चाविज्ञेयमेव । न तद्विषये किञ्चिदपि परमार्थतः कथयितुं शक्यते यतः शिवो देहशोभार्थमाभूषणानि धारयन् सर्पानपि धत्ते ; क्षौमवस्त्रावृतो हस्तिचर्मापि धारयति तथा च मृतमुण्डयुक्तश्चन्द्रकलाभूषितोऽप्यस्ति । एवं विरोधात्मकस्य तदीयस्वरूपस्य याथार्थ्यं ज्ञातुं न कोऽपि पारयति ॥ ७८ ॥

तदङ्गसंसर्गमवाप्य कल्पते
ध्रुवं चिताभस्मरजो विशुद्धये ।
तथा हि नृत्याभिनयक्रियाच्युतं
विलिप्यते मौलिभिरम्बरौकसाम् ॥ ७९ ॥

' अयुक्तरूप किमतः परं वद ' इति (५।६९) श्लोकोक्तं प्रत्याह —तदङ्गेति । तदङ्गसंसर्गं तस्य शिवस्याङ्गं तस्य संसर्गं अवाप्य आसाद्य चिताभस्मरजः चिताभस्मैव रजो विशुद्धये कल्पते । अलं पर्याप्नोतीत्यर्थः । अलमर्थयोगात् ' नमः स्वस्तिस्वाहा—' इत्यादिना चतुर्थी । ध्रुवं शोधकत्व प्रमाणसिद्धमित्यर्थः । प्रमाणमेवाह— तथा हि । प्रसिद्धमेवेत्यर्थ । नृत्याभिनयक्रियाच्युत नृत्ये ताण्डवे योऽभिनयोऽर्थव्यञ्जकचेष्टाविशेषः स एव क्रिया तया निमित्तेन च्युतं पतितम् । चिताभस्मरजः इति शेषः । अम्बरौकसां देवानां मौलिभिः विलिप्यते ध्रियते । अशुद्धं चेत्कथमिन्द्रादिभिर्ध्रियेतेत्यर्थापत्तिरनुमान वा प्रमाणमित्यर्थः ॥ ७९ ॥

Prose Order :—चिताभस्मरज अपि तदङ्गसंसर्गं अवाप्य ध्रुवं शुद्धये कल्पते, तथा हि नृत्याभिनयक्रियाच्युतं (तत्) अम्बरौकसां मौलिभिः विलिप्यते ॥ ७९ ॥

Notes :—चिताभस्मरजः—चितायाः भस्म एव रजः (अनुलेपनचूर्ण) चिताभस्मरज the powder in the form of the ashes of funeral pyre Or, चितायाः भस्मना रज (चूर्ण) चिताभस्मरज the particles of the ashes of the funeral pyre (with which Shiva besmears his body) तदङ्गसंसर्ग—तस्य (शिवस्य) अङ्गस्य (देहस्य) संसर्गः (संपर्क) तदङ्गसंसर्ग contact with his body. अवाप्य—प्राप्य having

obtained ध्रुवं—निश्चयेन indeed, surely. शुद्धये—पवित्रताकरणाय for purification; sanctifying Dative is used by the rule 'क्लृपि संपद्यमाने च' which means 'a noun expressive of the purpose for which anything is done, or the result to which anything leads is put in the Dative case' नृत्याभिनयक्रियाच्युतम्। अभिनय—हृद्गतभावाभिव्यञ्जकशरीरचेष्टाः movements of the body indicative of internal feelings, gesticulations नृत्ये (ताण्डवे) अभिनयः एव क्रिया नृत्याभिनयक्रिया, तया च्युतम् नृत्याभिनयक्रियाच्युतम्। dropped down by the movements of the body while dancing Adj of तत् understood Shiva's dance is known as ताण्डव, which is a very vehement dance अम्बरौकसाम्—अम्बरं (व्योम) ओकः (गृहं) येषां ते अम्बरौकसः तेषां whose abode is in the heaven, *i e*, gods (then to say nothing of human beings). ओकः—गृह 'ओकः सद्मनि चाश्रये' इत्यमर। मौलिभि—शिरोभि on heads or foreheads. विलिप्यते—is rubbed, is applied

Párvati says that Shiva's body is so much sanctifying that even the ashes of the funeral pyre are made purifying and fit for the use of gods by its contact This is a reply to 'एष् चिताभस्मरजः करिष्यति' in verse 69 79

Change of Voice:—चिताभस्मरजसा अपि तवाङ्गसंसर्गं अवाप्य ध्रुवं शुद्धये कल्प्यते, तथा हि नृत्याभिनयक्रियाच्युत (तत्) अम्बरौकसां मौलयः विलिम्पन्ति ॥ ७९ ॥

Hindi Translation:—चिता की राख भी उस (शिव)

के शरीर से छूकर वास्तव में शुद्धि की करने वाली हो जाती है, इसीलिये (शिव के) नाचने से गिरी हुई (वह धूल) देवताओं के शिरों से लगायी जाती है ॥ ७९ ॥

ENGLISH TRANSLATION :—Certainly the particles of ashes of the funeral pyre become sanctifying by coming in contact with his body, and so they are rubbed on the heads of the dwellers of heaven (i.e. gods) when dropped down by the movements of the body during the dance 79

PURPORT IN SANSKRIT :—शिवस्य देहस्तु तथा पावनोऽस्ति यत्तत्संपर्केण चिताभस्मापि परेषां शुद्धिकारकं भवति । अनेनैव कारणेन नृत्यकाले तस्य देहाच्च्युतान् रजःकणान् उत्थाप्य देवाः स्वशिरःसु लिम्पन्ति । यद्धि देवानामपि शुद्धिकारकं तत्किमपावनं भवेदिति कथनं व्यर्थमेव ॥ ७९ ॥

असंपदस्तस्य वृषेण गच्छतः
प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना
विनिद्रमन्दाररजोरुणाङ्गुली ॥ ८० ॥

यदुक्तं 'दिगम्बरत्वेन निवेदितं वसु' (५।७२) 'इयं च तेऽन्या पुरतो विडम्बना' (५।७२) इत्यादि च तत्रोत्तरमाह—असंपद इति । प्रभिन्नदिग्वारणवाहनः प्रभिन्नो मदस्रावी दिग्वारणो दिग्गजो वाहनं यस्य सः । ऐरावतेनोढ इत्यर्थः । वृषा देवेन्द्रः असंपदः दरिद्रस्य वृषेण गच्छतः वृषभारूढस्य तस्य ईश्वरस्य पादौ मौलिना मुकुटेन उपगम्य प्रणम्येत्यर्थः । विनिद्रमन्दाररजोरुणाङ्गुली विनिद्राणां

विकम्पितानां मन्दाराणां कल्पतरुकुसुमानां रजोभि परागैररुणा अङ्गुनयो ययोस्तौ यथोक्तौ करोति । दिग्गजेराहिणामिन्द्रादीनामपि वन्द्यस्येन्दुमोलेः किं सपदा वृषारोहणे वा को दोष इत्यर्थ ॥ ८० ॥

PROSE ORDER —प्रभिन्नदिग्वारणवाहन वृषा उपगम्य असम्पद वृषेण गच्छन तस्य पादौ मौलिना विनिद्रमन्दाररजोरुणाङ्गुली करोति ॥ ८० ॥

NOTES.—प्रभिन्नदिग्वारणवाहनः । प्रभिन्न —(प्र + √भिद् + क) मदयुक्त shedding ichor (मद) । Literally it means whose temples are split open (for shedding ichor) 'प्रभिन्नो गर्जितो मत्त' इत्यमरः । दिग्वारण —दिश (प्राचीदिशः) वारण (हस्ती) दिग्वारण the elephant of the eastern quarter (which belongs to Indra and is named ऐरावत) He is one of those elephants which, according to mythology, stand in the four or eight quarters of the sky and support the earth वारणः—an elephant 'मतङ्गजो गजो नाग कुञ्जरो वारणः करी' इत्यमर । वाहन—(वह् + ल्युट्—अन) यानम् a conveyance प्रभिन्न दिग्वारण वाहन यस्य सः प्रभिन्नदिग्वारणवाहन having for his vehicle the rutting elephant of the (eastern) quarter Or, according to some interpretors—प्रभिन्नाः (पराभूताः) दिग्वारणाः (स्वातिरिक्ता दिग्गजा.) येन स प्रभिन्नदिग्वारण , तादृश वाहन यस्य स प्रभिन्नदिग्वारणवाहन who has for his vehicle the elephant of the (eastern) quarter, who has routed other elephants of the quarters वृषा—वर्षतीति वृषा

इन्द्रः Indra 'वासवो वृत्रहा वृषा' इत्यमरः । See notes on it in verse 61 उपगम्य—(उप+√गम्+ल्यप्) समीपं आगत्य coming near; approaching असम्पदः—नास्ति संपद् यस्य सः असम्पत्, तस्य of him who possesses no wealth. वृषेण—वृषभेण on a bull. 'उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः' इत्यमरः । तस्य—शिवस्य of him (Shiva) मौलिना—शिरसा by his head. विनिद्रमन्दार-रजोरुणाङ्गुली । विनिद्र—विगता निद्रा यस्य स विनिद्रः (विकसितः) a full-blown flower. मन्दार—देववृक्ष one of the five trees of paradise Here, the flowers of that tree, so मन्दारस्य इमे मन्दाराः (मन्दार+अण्) । अण् is dropped and hence no change in the word प्रभिन्नानां मन्दाराणां रजोभि (परागैः) अरुणा (रक्ता) अङ्गुलयो ययोस्तौ प्रभिन्नमन्दाररजोरुणाङ्गुली whose toes are made red with the pollen-dust of the full blown flowers of the heavenly trees Adj of पादौ । The colour of the toes of Shiva's feet is changed by the colour of Mandar flowers borne on the head by Indra

This verse is a suitable reply to 'इयं च तेऽन्या पुरतो विडम्बना' verse No 70, and contains a contrast between वृष (a bull) and दिग्वारण (an elephant of the quarters) Párvati says it is immaterial if Shiva has a bull for his vehicle when Indra whose vehicle is ऐरावत coming to him bows his head before him It shows the real greatness of Shiva 80

CHANGE OF VOICE —प्रभिन्नदिग्वारणवाहनेन वृष्णा उपगम्य असम्पद् वृषेण गच्छत तस्य पादौ मौलिना विनिद्रमन्दाररजोरुणाङ्गुली क्रियेते ॥ ८० ॥

HINDI TRANSLATION —किसी प्रकार की सम्पत्ति न रखने वाले, बैल पर चढ़ने वाले, उस (शिव) के पैरों को, मद बहाने वाला (पूर्व) दिशा का हाथी जिसकी सवारी है ऐसा इन्द्र समीप आकर अपने सिर द्वारा, खिले हुए देववृक्षों के पुष्पों के पराग से लाल अङ्गुली वाला करता है ॥ ८० ॥

ENGLISH TRANSLATION —India, whose vehicle is the rutting elephant of the (eastern) quarter, coming near, makes with his head the feet of him who is wealthless and who rides a bull, possessing toes (made) red by the pollen-dust of the full blown flowers of the heavenly trees 80-

PURPORT IN SANSKRIT —यद्यपि स शिव स्वयं निर्धनो वृद्धोक्षवाहनश्च परं जगत्यसाधारणैश्वर्यवान् मघवापि यस्य हि हस्तिराज ऐरावतो वाहनं तत्समक्षमागत्य सत्कारप्रदर्शनार्थं स्वर्गवृक्षपुष्पभूषितं स्वशिरस्तच्चरणयोर्नमयति येन शिवस्य पादाङ्गुलयः पुष्परागेण रागयुक्ता भवन्ति । यस्य हि इन्द्रादयोऽपि चरणसेवका स कियन्महानिति कथनेनास्ताम् ॥ ८० ॥

विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति ॥ ८१ ॥

यदुक्तं 'अलक्ष्यजन्मता' (५।७२) इति तत्रोत्तरमाह—विवक्षतेति। च्युतात्मना नष्टस्वभावेनाऽत एव दोषं दूषणं विवक्षता वक्तुमिच्छता अपि त्वया ईशं प्रति एकं अलक्ष्यजन्मता इत्येतदेकम्। वच इत्यर्थ। साधु भाषित सम्यगुक्तम्। कुत। यं ईश्वरं आत्मभुवः अपि ब्रह्मणोऽपि। 'ब्रह्मात्मभू सुरज्येष्ठ'। कारणं आमनन्ति' उदाहरन्ति। विद्वांस इति शेष। 'पाघ्राध्मास्थाम्नादाण्'—इत्यादिना मनादेशः। स ईश्वर, कथ लक्ष्यप्रभवः लक्ष्यजन्मा भविष्यति। अनादिनिधनस्य भगवत कारणशङ्का कलङ्कश्च नाविष्यत इत्यर्थ ॥ ८१ ॥

PROSE ORDER :—च्युतात्मना दोषं विवक्षता अपि त्वया ईशं प्रति एकं साधु भाषितम्, यं आत्मभुव अपि कारणं आमनन्ति सः कथं लक्ष्यप्रभव भविष्यति ॥ ८१ ॥

NOTES —च्युतात्मना—च्युत (पतित) आत्मा (अन्तःकरण) यस्य स च्युतात्मा, तेन one possessing a depraved soul. Párvati calls the ascetic so because he talked so much ill of Shiva विवक्षता—(√वच्+सन्+शतृ) वक्तुं इच्छति विवक्षति, विवक्षति इति विवक्षन् (वक्तुं इच्छन्), तेन विवक्षता by one who wants to speak. Instrumental sing of विवक्षन् Present part of the Desiderative of √वच्, The suffix सन् is added to express desire अपि—though you wanted to point out Shiva's faults you have unconsciously said one good point about him. ईशं प्रति—महेशं प्रति with regard to the Lord Accusative is used because of प्रति। 'अभित परित समया निकषा हा प्रतियोगेऽपि।' साधु—सम्यक् a good point viz अलक्ष्यजन्मता in verse 72 आत्मभुवः—(आत्मन्+√भू+

क्विप्) आत्मना (स्वयमेव) भवतीति आत्मभू (ब्रह्मा), तेन आत्मभुवा of the self existent i e of Brahman 'ब्रह्मा आत्मभूः सुरज्येष्ठः परमेष्ठी पितामहः' इत्यमरः। कारण—the cause of birth, the creator Cf 'यो वै ब्रह्माणं विदधाति पूर्वम्' said of the Lord of universe आमनन्ति—प्रतिपादयन्ति describe; celebrate, consider √म्ना to praise; to learn, is changed to मन in the सार्वधातुक लकारs by 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' । पा० ८३७८ । which replaces √पा etc by पिब etc respectively लक्ष्यप्रभवः—प्रभवति अस्मात् इति प्रभव (उत्पत्तिस्थानम्), लक्ष्य (ज्ञेयः) प्रभव यस्य सः लक्ष्यप्रभवः whose origin is known or visible

The ascetic had said अलक्ष्यजन्मता about Shiva in bad sense, but Párvati has wisely interpreted it in a good sense and has thus given a suitable reply to him 81

Change of Voice :—च्युतात्मा दोषं विवक्षन् अपि त्वं ईश प्रति एकं साधु भाषितवान्, यः आत्मभुवः अपि कारणं आम्नायते तेन कथं लक्ष्यप्रभवेण भविष्यते ? ॥ ८१ ॥

Hindi Translation —नीच आत्मा वाले, दोषों को कहने की इच्छा करते हुए भी तूने महेश के बारे में एक अच्छी बात कह दी; जिसे (विद्वान् लोग) ब्रह्मा का भी कारण बताते हैं उसकी उत्पत्ति किस प्रकार जानी जा सकती है ? ॥ ८१ ॥

English Translation —Thou, of depraved soul, although wishing to speak the faults (of Shiva) hast

said one good point about the Lord How can he, who is celebrated as the cause of even the self-existent (Brahman), have his birth known ? 81

PURPORT IN SANSKRIT :— हे ब्रह्मचारिन्'! शिवस्य दोषान् दर्शयता पतितात्मना त्वया तद्विषये 'अलक्ष्यजन्मता' इति यत्कथितं तत्तु सम्यग्भाषितम् । यो हि शिवो जगदुत्पादकस्य ब्रह्मणोऽप्युत्पादकस्तस्योत्पत्तिविषये कश्चिदपि किमपि ज्ञातुं कथं शक्नोति ? ॥ ८१ ॥

अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ॥ ८२ ॥

अलमिति । अथ वा विवादेन कलहेन अलम् । त्वया तावत् यथा येन प्रकारेण स ईश्वरः श्रुतः अशेषं कात्स्न्र्येन तथाविधः तावत्प्रकारः एव अस्तु । मम मनः तु अत्र ईश्वरे भावैकरसं भावः शृङ्गार एकोऽद्वितीयो रस आस्वाद्यो यस्य तत्तथा स्थितम् । तथा हि । कामवृत्तिः स्वेच्छाव्यवहारी वचनीयं अस्थानसङ्गापवादं न ईक्षते न विचारयति । न हि स्वेच्छासंचारिणा लोकापवादाद्बिभ्यतीति भावः ॥ ८२ ॥

PROSE ORDER :—(हे विप्र) विवादेन अलम्, त्वया स यथा श्रुतः अशेषं तावदस्तु, मम मनः अत्र भावैकरसं स्थितम्, कामवृत्तिः वचनीयं न ईक्षते ॥ ८२ ॥

NOTES :—विवादेन—(वि+√वद्+घञ्) वाक्कलहेन quarrels or dispute. Instrumental is used because

of अलं which is used in the sense of ' enough ' See notes on अलं समाधिना in verse 45. यथा—as ; of whatever sort तथाविध —तथा विधा (प्रकारः) यस्य स तथाविधः so ; of that sort अशेष—न शेषः यस्मिन् कर्मणि तद् अशेषम्, fully , without any reservation अत्र—in Shiva भावैकरसं—भावः (प्रेम , शृङ्गारः) एकः (अनन्य.) रसः (आनन्दो) यस्य तत् predominated solely by the sentiment of love ; entirely swayed by the feeling of love. Or, भावे (भक्तौ) एकः रसः (आनन्दो) यस्य तत् भावैकरसं which finds delight only in devotion for Shiva. भावः—love See notes on भावस्थं in verse 58 स्थितम्—निश्चलं is fixed or set (on him) कामवृत्तिः—कामं (यथेच्छं) वृत्तिः (वर्त्तनं) यस्य स who acts as he likes, or, कामः (इच्छा) वृत्तिः यस्य स who follows his will वचनीयम्—(√वच् + अनीयर्) निन्दां ; लोकापवादं ill-talk, bad report न ईक्षते—न विचारयति does not take into consideration ; does not care for. ' न कामवृत्तिर्वचनीयमीक्षते ' is a general statement meaning that a person who follows his own will does not care for other's adverse criticism This defends Párvati's conduct in not caring for the opinion of the ascetic because she had set her heart on Shiva. 82.

Change of Voice :—विवादेन अलम् त्वं तं यथा श्रुतवान् तथाविधेन अशेषं तावद् भूयताम्, मम मनसा अत्र भावैकरसेन स्थितम् ; कामवृत्तिना वचनीयं न ईक्ष्यते ॥ ८२ ॥

HINDI TRANSLATION :—वाद्विवाद न करो, तुमने वह जिस प्रकार का सुना है वह चाहे बिलकुल वैसा ही हो (पर) मेरा मन उसमें एकमात्र प्रेमपूर्ण होकर लगा हुआ है ; इच्छा के अनुसार कार्य करने वाला व्यक्ति बदनामी की परवाह नहीं करता ॥ ८२ ॥

ENGLISH TRANSLATION —Enough of disputing, let him be exactly as you have heard of him. My mind predominated solely by the feeling of love is fixed on him, one who acts as he likes does not care for ill-report 82

PURPORT IN SANSKRIT :—हे वर्णिन्! शिवविषयकोक्तिप्रत्युक्तिकरणेन न कोऽपि लाभो दृश्यते यतस्त्वं शिवद्वेषी तद्दोषद्रष्टा च। त्वं शिवविषये यत्किमपि जानासि तत्तथैवास्तु तन्निराकरणेन न किमपि प्रयोजनं सेत्स्यति। शिवद्वेषकथनेन मे मनोऽपि तदनुरागं न त्यक्ष्यति यतोऽहमनन्यभावेन तस्मिन्ननुरक्ता। न हि प्रियस्य दोषदर्शनेन तं प्रति कश्चिदुदासीनो भवति ॥ ८२ ॥

निवार्यतामालि किमप्ययं बटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥ ८३ ॥

निवार्यतामिति। हे आलि सखि। 'आलिः सखी वयस्या च' इत्यमरः। स्फुरितोत्तराधरः स्फुरणभूयिष्ठोष्ठः अयं बटुः माणवकः पुनः किं अपि विवक्षुः वक्तुमिच्छुः। ब्रुवः सन्नन्तादुप्रत्ययः निवार्यताम्। तर्हि वक्तुमेव कथं न ददासीत्याह—तथा हि। यः महतः पूज्यान् अपभाषते अपवदति न केवलं स पाप-

भाक् भवति । किन्तु तस्मात् अपभाषमाणात्पुरुषात् यः शृणोति सोऽपि पापभाक् । भवतीति शेषः । अत्र स्मृतिः—‘ गुरोः यत्र परीवादो न श्रोतव्यः कथंचन । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः । ’ इति ॥ ८३ ॥

Prose Order :—(हे) आलि ! स्फुरितोत्तराधरः पुनः किं अपि विवक्षुः अयं वटुः निवार्यताम् ; यः महतः अपभाषते न केवलं सः (अपि तु) य तस्मात् शृणोति सः अपि पापभाग् (भवति) ॥ ८३ ॥

Notes :—आलि—सखि O friend. ‘ आलिः सखी वयस्या च ’ इत्यमरः । स्फुरितोत्तराधरः—It may be expounded in a number of ways, *viz*, (i) उत्तरश्च (उत्तरोष्ठश्च) अधरश्च (अधरोष्ठश्च) उत्तराधरं ; स्फुरितं (किंचिच्चलितं) उत्तराधरं यस्य सः स्फुरितोत्तराधरः whose upper and lower lips are quivering (as in the act of speaking) (ii) स्फुरितं (कम्पनं) उत्तरं (अधिकं) यस्मिन् सः स्फुरितोत्तरः , स्फुरितोत्तरः अधरः यस्य सः स्फुरितोत्तराधरः whose lower lip is quivering very much In this case उत्तर has been interpreted as meaning ‘ excessiveness ’ In the compound स्फुरितं उत्तरं यस्मिन् सः स्फुरितोत्तरः (बहुव्रीहि) the word उत्तर, which, being an Adj , would have been the first member, has been made the second by ‘ वाहिताग्न्यादिषु च ’ पा० २.२.३७ And if this be not possible it may be expounded as (iii) स्फुरितेन उत्तरः (युक्तः) स्फुरितोत्तरः, स्फुरितोत्तरः अधरः यस्य सः whose lower lip was quivering. In this case the word उत्तर gives the sense

of 'mixed with.' विवक्षुः—(वच्+सन्+उः) वक्तुं इच्छुः विवक्षुः desirous of speaking Noun from the Desiderative of √वच्, See notes on विवक्षन् in verse 81. बटुः—a boy, Brahmachárin. निवार्यताम्—(नि+√वृ+य×लोट्) निषिध्यताम् should be checked or warded off Passive Imperative third pers. singular. महतः—about the great Accusative plu of महत् अपभाषते—निन्दां करोति abuses; talks ill. पापभाक्—(पाप+√भज्+णिवः) पापं भजते (सेवते) इति पापभाक् a sinner For the sense *Cf.* 'गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते। कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यत ॥' मनुस्मृति। The fact that Párvati was not prepared to listen to the ill-talk about Shiva, shows that she was sincerely devoted to him 83

Change of Voice —(हे) आलि! स्फुरितोत्तराधरं पुनः किं अपि विवक्षु इमं बटुं (त्वं) निवारय, येन महान्तः अपभाष्यन्ते न केवल तेन (अपि तु) येन तस्मात् श्रूयते तेन अपि पापभाजा (भूयते) ॥ ८३ ॥

Hindi Translation :—हे सखि, जिसके ओठ फड़फड़ा रहे हैं ऐसे कुछ और बोलने की इच्छा वाले इस बालक को दूर कर दो (या रोक दो) केवल वही नहीं जो बड़ों की निन्दा करता है अपि तु वह भी जो उससे सुनता है पाप का भागी होता है ॥ ८३ ॥

English Translation —O friend, check this boy whose upper and lower lips are quivering (and so)

seems to be desirous of speaking more Not only he who talks ill of the great, but also he who listens to him is a sinner 83

PURPORT IN SANSKRIT :—ब्रह्मचारिणः कथितं प्रत्याख्याय ब्रह्मचारिणश्च विवादात् विरमितुमादिश्य पार्वती स्वां सखीं कथयति—यत् 'हे सखि ! अस्माकं पुरतः स्थितोऽयं वर्णी कम्पमानाधरत्वात् पुनरप्यधिकां शिवनिन्दां कर्त्तुमुद्यतो दृश्यते तस्मादितो निस्सार्यताम्। एतेन कथिता शिवनिन्दास्माभिर्न श्रवणीया यतो न केवलं स एव पुरुषः पापमवाप्नोति यो महापुरुषाणां निन्दां करोति, अपि तु सोऽपि दोषी यस्तामाकर्णयति'। ८३ ॥

इतो गमिष्याम्यथ वेति वादिनी
चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्बे वृषराजकेतनः ॥ ८४ ॥

सम्प्रति गन्तव्यपक्षमाश्रयते। इत इति। अथवा इत अन्यत्र गमिष्यामि इति वादिनी वदन्ती स्तनभिन्नवल्कला स्तनाभ्यां भिन्नवल्कला रयवशात्कुचस्रस्तचीरा बाला पार्वती चचाल। वृषराजकेतनः वृषभध्वजः च स्वरूपं आस्थाय निजरूपमाश्रित्य कृतस्मितः सन्। तां पार्वतीं समाललम्बे जग्राह ॥ ८४ ॥

PROSE ORDER :—अथवा (अहं) इतः गमिष्यामि इति वादिनी बाला स्तनभिन्नवल्कला चचाल, वृषराजकेतनः च स्वरूपं आस्थाय कृतस्मित तां समाललम्बे ॥ ८४ ॥

NOTES :—इतः—(इदं+तसिल्) अस्मात् स्थानात् from this place वादिनी—(√वद्+णिनि+ङीप्) वदन्ती who

was thus saying. स्तनभिन्नवल्कला—स्तनाभ्यां (पञ्चमी) भिन्न (स्रस्तं) वल्कलं यस्याः सा with the bark-garment slipping from her breasts (because of their being elevated or her being in haste) Or स्तनाभ्यां (तृतीया) भिन्नं (त्रुटितं) वल्कलं यस्याः सा whose bark-garment was being torn by her breasts (because of their being elevated). For the second interpretation which does not suit the context so much as the first one, *Cf.* 'बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेध-विशीर्णसंहति' । verse 8 above चचाल—(√चल्—लिट्) गन्तुमारेभे started वृषराजकेतनः—वृषो (वृषभो) राजा वृष-राजः, वृषराज केतन (ध्वजा) यस्य स वृषराजकेतनः or वृषराजः केतने यस्य स वृषराजकेतनः one whose emblem is a bull In वृषराजः, राजन् is made राज by the addition of टच् by 'राजाहःसखिभ्यष्टच्' पा० ५ ४.९१ । केतन—केत्यते (ज्ञायते) अनेन इति केतनं an emblem ; a banner. स्वरूपं आस्थाय—assuming his own form कृतस्मितः—कृतं स्मितं येन सः who was smiling समाललम्बे—(आ + √लम्ब् + लिट्) जग्राह held (her) 84.

CHANGE OF VOICE :—अथवा (मया) इतः गमिष्यते इति वादिन्या बालया स्तनभिन्नवल्कलया चेले, वृषराजकेतनेन च स्वरूपं आस्थाय कृतस्मितेन सा समाललम्बे ॥ ८४ ॥

HINDI TRANSLATION :—या (मैं) यहाँ से चली जाऊँगी इस प्रकार कहने वाली वह कुमारी, जिसके स्तनों पर से वल्कल वस्त्र खिसक गया था, चलने लगी ; (तब) बैल जिसका ध्वजा-

चिह्न है ऐसे (शिव) ने अपना रूप धारण कर मुस्कराते हुये उसको पकड़ लिया ॥ ८४ ॥

English Translation :—Or, I shall go from here, so saying the maiden, with the bark-garment slipping from her breasts, started, (just then) the bull-emblemed God, assuming his own form, held over, with a smile. 84

Purport in Sanskrit :—' हे सखि ! यदि चायं ब्रह्मचारी अस्मात्स्थानादन्यत्र न गमिष्यति तर्ह्यहं स्वयमेवान्यत्र यास्यामि ' इति कथयित्वा पार्वती चलितुमुद्यताभूत् वल्कलञ्च रयवशात्तत्स्तनाभ्यामधः स्रस्तम्, परं तस्मिन्नेव काले शिवो निजां यथार्थामाकृतिमाश्रित्य मन्दहासञ्च कृत्वा पार्वतीं जग्राह ॥ ८४ ॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ८५ ॥

तमिति । तं देवं वीक्ष्य वेपथुमती । सरसांगयष्टिः खिन्नगात्री । महादेवदर्शनेन देव्याः सात्त्विकभावोदय उक्तः । निक्षेपणाय अन्यत्र विन्यासाय उद्धृतं उत्क्षिप्तं पदं अङ्घ्रिं उद्वहन्ती । शैलाधिराजतनया पार्वती मार्गाचलव्यतिकराकुलिता मार्गेऽचलस्तस्य व्यतिकरेण समाहृत्या अवरोधेनेति यावत् । आकुलिता संभ्रमिता सिन्धुः नदी इव । ' देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् ' इत्यमरः । न ययौ न तस्थौ । लज्जयेति भावः । वसन्ततिलकावृत्तमेतत् ॥ ८५ ॥

PROSE ORDER :—तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिः निक्षेपणाय उद्धृतं पदं उद्वहन्ती शैलाधिराजतनया मार्गाचलव्यतिकराकुलिता सिन्धुरिव न ययौ, न तस्थौ ॥ ८५ ॥

NOTES :—वीक्ष्य—(वि+ईक्ष्+ल्यप्) दृष्ट्वा having seen. वेपथुमती । वेपथुः—(√वेप् to tremble+अथुच्) कम्पनं trembling It is a noun formed by adding अथुच् by 'ट्वितोऽथुच्' पा० ३ ३ ८९. वेपथुः (कम्पं) अस्याः अस्तीति वेपथुमती (वेपथु+मतुप्+ङीप्) कम्पयुक्ता trembling. वेपथु is one of the सात्त्विकभावs *i. e.*, the various states of body caused by some natural emotion They are eight in number, namely—'स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विकाः गुणाः ।' Here वेपथु was caused by the sudden sight of Shiva and particularly by his touch. सरसाङ्गयष्टिः—अङ्गंयष्टिरिव इति अङ्गयष्टिः (शरीरं) a slender form ; a fairy-figure. रसेन सह वर्त्तमाना सरसा (सस्वेदा); सरसा अङ्गयष्टिः यस्याः सा सरसाङ्गयष्टिः whose slender form was perspiring. सरसा—wet, hence perspiring. This perspiration also was caused by the touch of Shiva. निक्षेपणाय—(नि+√क्षिप्+ल्युट्—अन=निक्षेपणं) भूमौ विन्यासाय to step forth ; to walk away. The Dative is used because निक्षेप expresses the purpose for which the foot was raised. *Cf.* तादर्थ्ये चतुर्थी वाच्या'। उद्धृतं उत्थापितम् raised. उद्वहन्ती—(उद्+√वह्+शतृ+ङीप्) having ; lit. carrying on. शैलाधिराजतनया—शिलानां समूहः शैलः (पर्वतः) (शिला+अण्) a mountain. शैलानां

अधिराजस्य तनया शैलाधिराजतनया the daughter of the lord of mountains, i e, Párvati मार्गाचलव्यतिकराकुलिता । अचलः—न चलति इति अचलः (√चल्+अच्) पर्वतः a mountain. 'अद्रिगोत्र गिरि ग्रावा अचल शैल शिलोच्चयाः' इत्यमरः । व्यतिकरः—सम्पर्कः contact; विघ्नः an obstruction मार्गे अचलस्य व्यतिकरेण आकुलिता मार्गाचलव्यतिकराकुलिता hampered by coming in contact with a mountain on its way Adj of सिन्धुः—नदी a river. 'देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्' इत्यमरः । ययौ —(√या+लिट्) जगाम went. तस्थौ—(√स्था+लिट्) स्थिता stayed

Párvati who was ready to start, seeing Shiva in her front could not make her mind to go or to stay—she wanted to go because she had started and she wanted to stay because she liked to be with Shiva. This state of Párvati is well compared with a river which is impeded on its way by a hill

The metre of this and the following shloka is वसन्ततिलका which is defined as—"उक्ता वसन्ततिलका तभजा जगौ गः ।" 85

CHANGE OF VOICE :—तम् वीक्ष्य वेपथुमत्या सरसाङ्गयष्ट्या निक्षेपणाय उद्धृतं पदं उद्वहन्त्या शैलाधिराजतनयया मार्गाचलव्यतिकराकुलितया सिन्ध्वा इव न यये न तस्थे ॥ ८५ ॥

HINDI TRANSLATION :—उसको देख कर कांपती हुई, पसीने से युक्त शरीर वाली, चलने के लिये उठाये हुये पैर वाली

पर्वतराजपुत्री, रास्ते में पहाड़ से रोकी हुई नदी की तरह न तो जा सकी और न ठहर सकी ॥ ८५ ॥

English Translation —On seeing him, the daughter of the lord of mountains, trembling, her slender body covered with perspiration and having her foot raised to step forth could neither go nor stay, like a river hampered by the obstruction of a mountain in the way 85.

Purport in Sanskrit :—महादेवस्य दर्शनेन तत्स्पर्शेण च पार्वत्या देहे कम्पस्वेदस्तम्भाद्याः सात्विकभावाः प्रादुर्भूताः, येन सा गन्तुमुद्यताऽपि तथैव ततश्चलितुं न शशाक यथा हि निम्नस्थलं गच्छन्ती नदी सम्मुखागतेन पर्वतेन निरुद्धाग्रे गन्तुं न प्रवर्तते न च प्रवाहवेगात् स्थातुमपि शक्नोति । गमनोत्सुकापि पार्वती शिवसान्निध्येन किं कर्त्तव्यविमूढा जाता ॥ ८५ ॥

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ८६ ॥

अद्येति । चन्द्रमौलौ शिवे । हे अवनताङ्गि पार्वति अद्य प्रभृति अस्माद्दिनादारभ्येत्यर्थः । प्रभृतियोगादद्येति सप्तम्यर्थवाचिना पञ्चम्यर्थो लक्ष्यते । तव तपोभिः क्रीतः । 'दासृ दाने' । दासते आत्मानं ददातीति दासः । अस्मि इति वादिनि वदति सा देवी अह्नाय सपदि । 'स्राग्झटित्यञ्जसाह्नाय द्राङ्मङ्क्षु सपदि द्रुतम्' इत्यमरः । नियमजं तपोजन्यं क्लमं क्लेशं उत्ससर्ज । फलप्राप्त्या

क्लेशं विसस्मारेत्यर्थः । तथा हि क्लेशः फलेन फलसिद्ध्या पुनर्नवतां विधत्ते पूर्ववदेवाक्लिष्टतामापादयतीत्यर्थः । सफलः क्लेशो न क्लेश इति भावः ॥ ८६ ॥

PROSE ORDER :—(हे) अवनताङ्गि अद्य प्रभृति त्वया तपोभिः क्रीतः तव दासः अस्मि, चन्द्रमौलौ इति वादिनि सा अह्नाय नियमजं क्लमं उत्ससर्ज हि क्लेशः फलेन पुनः नवतां विधत्ते ॥ ८६ ॥

NOTES —अवनताङ्गि-अवनत (नम्र) अङ्गं यस्या. सा अवनताङ्गी, तस्याः सम्बोधने अवनताङ्गि O one possessed of stooping limbs (on account of the breasts) See notes on संनतगात्रि in verse 39 अद्य—अस्मिन् अहनि अद्य today अद्य प्रभृति—from today Though अद्य has the sense of the Locative case it has been used with प्रभृति and so it gives the sense of the Ablative. See also notes on तदा प्रभृति in verse 55 क्रीतः—purchased. दासः—दासते आत्मानं ददाति इति दासः—a slave चन्द्रमौलौ —Locative of चन्द्रमौलि moon-crested God. See notes on शशिमौलि in verse 60 वादिनि—(वद्+णिनिः =वादिन्) वदति इति वादिन्, तस्मिन् while he was speaking so. अह्नाय—झटिति at once 'स्राग्झटिति अञ्जसा अह्नाय द्राङ्मङ्क्षु सपदि द्रुतम्' इत्यमरः। नियमजं—(नियम+√जन्+डः) नियमात् (व्रतात्) जातं (उत्पन्नं) नियमजं Caused by penance क्लमं-श्रान्तिं fatigue. उत्ससर्ज—तत्याज gave up ; forgot. √सृज् to create, means 'to leave' with उत्। Párvati forgot all the fatigue because she had obtained Shiva, for whom she had

been practising hard penance for so many days. This action of Párvati is supported by a general statement—क्लेशः फलेन हि पुनर्नवतां विधत्ते । क्लेशः—क्लमः fatigue , pain. फलेन—by the attainment of fruit. पुनः—again नवतां—नूतनताम् freshness विधत्ते—करोति does √धा to put on, means 'to do' with वि. Note that √धा is उभयपदी, so दधाति and धत्ते (लट्) । It means that a person forgets all about his fatigue and becomes refreshed by the attainment of the fruit of his exertion 86.

CHANGE OF VOICE :—(हे) अवनताङ्गि ! अद्य प्रभृति त्वया तपोभिः क्रीतेन (मया) तव दासेन भूयते ; चन्द्रमौलौ इति वादिनि तया अह्नाय नियमजः क्लमः उत्ससृजे, हि क्लेशेन फलेन पुनः नवता विधीयते ॥ ८६ ॥

HINDI TRANSLATION :—हे झुके हुये अङ्ग वाली, आज से लेकर मै तुझ से तपस्या के द्वारा मोल लिया हुआ तेरा सेवक हूँ , महादेव के इस प्रकार कहने पर वह एक दम तपस्या से हुई थकावट को भूल गई (क्योंकि) वास्तव में फल मिल जाने से परिश्रम नवीनता उत्पन्न करता है ॥ ८६ ॥

ENGLISH TRANSLATION —O one of stooping limbs, henceforth I am thy slave, bought by thee with thy austerities '—as the moon-crested God said these words, she immediately forgot the exhaustion caused by penance ; for fatigue gives freshness by the attainment of its fruit 86

PURPORT IN SANSKRIT :—शिवविषयकं पार्वत्या अचलानुरागं स्वोपस्थित्या तदीयसात्विकभावञ्च दृष्ट्वा शिवः पार्वतीं प्राह– ' हे सुन्दरि पार्वति ! अस्माद्दिनादारभ्याहं ते सेवको जात ; अवश्यमेवाहं-ते कामनां सफलां करिष्यामि ।' शिवस्यैतत्कथनमाकर्ण्य पार्वती क्षणेनैव तपःक्लेशरहिता बभूव, यतो हि फले प्राप्ते सति तत्प्राप्त्यर्थं कृतः क्लेशो न दुःखयति ॥ ८६ ॥

इति महाकविश्रीकालिदासविरचिते कुमारसंभवे महाकाव्ये
तपःफलोदयो नाम पञ्चमः सर्गः ।

U. P. INTERMEDIATE EXAMINATION PAPERS.

1937

Q. I. Translate into English or Hindi:—

प्रयुक्तसत्कार विशेषमात्मना न मां परं संप्रतिपत्तुमर्हसि ।
यतः सतां संनतगात्रि संगतं मनीषिभिः साप्तपदीनमुच्यते ॥

A—Hindi Translation :—(तुमने) अपने आप जिसका विशेष आदर किया है ऐसे मुझको कोई दूसरा (अजनबी) मानना उचित नहीं है ; क्योंकि हे सुन्दरि बुद्धिमान लोग सज्जनों की मित्रता को सात शब्दों के बोलने (या) पैरों के चलने से होने वाली कहते हैं ।

English Translation :—It does not behove thee to regard me as a stranger, to whom special hospitality has been accorded by thee, for, O, one of stooping body the friendship of good people is declared by the wise to be formed after seven words have been exchanged between them (or) after seven steps have been walked together.

Q. II. Write a grammatical note on साप्तपदीनम्

A—सप्तानां पदानाम् समाहारः सप्तपदम् (द्विगु समासः) सप्तपदेन (सप्तभिः पदैः वा) अवाप्यते इति साप्तपदीनम् । The word पद् has two meanings *viz.*, 'a word' and a footstep, so the expression means 'which is

formed by uttering seven words ' or ' by walking over seven steps together ' *i e.*, friendship. The word has lost literal sense and is used for friendship. It is regularly formed to indicate this meaning by the Sutra " साप्तपदीनं सख्यम् " ।

Q. III. Explain any two of the following with reference to the context in Hindi and English or Sanskrit :—

(*a*) क ईप्सितार्थस्थिर निश्चयं मन· पयश्च निम्नाभिमुखं प्रतीपयेत् ।

(*b*) न धर्म वृद्धेषु वय· समीक्ष्यते ।

Ans. (*a*) जब पार्वती जी ने शंकर जी को पाने के वास्ते कठोर तप करने का विचार कर लिया और अपनी माता के बहुत समझाने पर भी न माना उस समय कवि अपना यह वक्तव्य प्रकट करता है—चाही हुई वस्तु के लिये दृढ़ निश्चय वाले मन को और नीचे की ओर जाते हुये जल को कौन पलट सकता है। भाव यह है कि जिस प्रकार जल जो नीचे की ओर बह रहा है नहीं रोका जा सकता उसी प्रकार यदि किसी व्यक्ति ने किसी वस्तु के पाने का दृढ़ संकल्प कर लिया है तो उसके मन को भी कोई नहीं रोक सकता। इसमें अर्थान्तरन्यास अलंकार है। when Párvati made up her mind to perform penance to get Shiva for her husband, her mother tried her best to dissuade her from her

determination, but was not successful In that connection the poet makes his remark—who can turn back a mind of firm determination for (the achievement of) a desired object, or water flowing towards a low ground ? The sense is that as water flowing to a lower level cannot be checked similarly a mind of firm determination cannot be dissuaded from determination

यदा पार्वती शिवं पतिं वरयितुं तप कर्तुम् च मनसि-निश्चितवती तदा तस्याः माता ताम् तस्मात् महतः मुनिव्रतात् निवारयितुं प्रयत्नं कृतवती किन्तु तस्याः श्रम व्यर्थः अभूत्। अस्मिन्नेव प्रसङ्गे कविः अर्थान्तरन्यासेन कथयति—यथा अधः गच्छन्तं जलं रोद्धुं कोऽपि न समर्थो भवति तथैव कृतदृढनिश्चयं मनोऽपि स्वविचारात् निवारयितुं न कोऽपि समर्थः।

(*b*) न धर्म वृद्धेषु वयः समीक्ष्यते।

पार्वती ने जङ्गल में जाकर इतनी कठिन तपस्या किया कि उसको देखने के वास्ते बड़े बड़े मुनि आने लगे इसी संबंध में कवि कहता है यद्यपि पार्वती की अवस्था कम थी तो भी उसको देखने के वास्ते बड़े बड़े मुनि लोग जो आये इसका कारण यह है कि धर्म में बढ़े हुये व्यक्तियों की आयु नहीं देखी जाती। उनके गुण का आदर होता है। When Párvati went to the forest she performed such a severe penance that many sages came to see her and in that connection the poet says that it was

विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥
महार्हशय्यापरिवर्तनच्युतैः
स्वकेशपुष्पैरपि या स्मदूयते ।
अशेत सा बाहुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवलम् ॥

III. Explain any two of the following with reference to the context in Hindi or English

(*a*) न कामवृत्तिर्वचनीयमीक्ष्यते

(*b*) न रत्नमन्विष्यति मृग्यते हि तत्

(*c*) पदं सहेत भ्रमरस्य पेलवं
शिरीष पुष्पं न पुनः पतत्रिणः

IV (*a*) Explain the formation of यदृच्छया and निषेदुषी in *2 a*.

(*b*) Parse प्रचक्रमे in Question I (*a*).

Ans I (*a*) सा देवी पार्वती यदा यस्मिन् काले तावता तावत्प्रमाणेन पूर्वतपःसमाधिना पूर्वेणानुष्ठीयमान प्रकारेण तपोनियमेन काङ्क्षितं अभीष्टम् फलं लभ्यं लब्धुं शक्यं न अमंस्त मेने अशक्यम् अमंस्तेत्यर्थः तदा तत्काले अविलम्बेनेत्यर्थः स्वशरीरमार्दवम् स्वशरीरस्य कोमलतां मृदुत्वं वा अनपेक्ष्य अविगणय्य महत् दुस्तरं तपः चरितुं साधयितुं प्रचक्रमे उपचक्रमे । यदा पूर्वोक्त-प्रकारेण तप आचरंती पार्वती स्वाभीष्टसंसिद्धौ ससन्देहा जाता तदा सा निजदेहस्य मृदुत्वम् अनादृत्य कठिनतरं तपः कर्तुं निश्चितवती ।

(*b*) यदा पार्वती ब्रह्मचारिवेषधारिणम् शिवम् "इतो गमिष्यामीति कथयित्वा गन्तुमुद्यताभवत् तदा शिवः तां स्वरूपमास्थाय समालम्बे। तदा तं देवं शिवम् वीक्ष्य दृष्ट्वा वेपथुमती कम्पयुक्ता सरसांगयष्टिः स्विन्नगात्री महादेवदर्शनेन देव्याः सात्विकभावोदय उक्तः। निक्षेपणाय अन्यत्र विन्यासाय उद्धृतं पदम् उद्वहन्ती धारयन्ती शैलाधिराजतनया पर्वतराजकन्या मार्गाचल व्यतिकराकुलिता मार्गे अचलः तस्य व्यतिकरेण समाहत्या अवरोधेनेति यावत् आकुलिता संभ्रमिता सिन्धुः नदी इव न ययौ नागच्छत् न तस्थौ लज्जयेतिभावः। गमनोत्सुकापि पार्वती शिवसान्निध्येन किं कर्तव्यविमूढा जाता।

Ans II (*a*) सबसे पहले यह तुम्हारी और दूसरी हंसी होगी कि श्रेष्ठ हाथी पर चढ़ने योग्य विवाहित तुमको (शिवजी के) बुड्ढे बैल पर बैठे देखकर बड़े आदमी मुस्कराने लगेंगे। Then, first of all, there will be another humiliation for thee, when great men will have smiling countenances on seeing thee, fit to be borne by a lordly elephant, riding an old bull, after marriage

(*b*) जो अत्यधिक मूल्यवाली सेज पर करवट लेने से गिरे हुये अपने बालों के फूलों से भी कष्ट पाती थी वह अब अपनी लता के समान भुजा की तकिया लगाकर नंगी भूमि पर ही सोती और बैठती थी। She who would feel pain even by the flowers dropped down from her hair by the rollings on her

costly bed slept and sat on the bare earth using her creeper-like arm as a pillow

Ans III (a) जब ब्रह्मचारी का रूप धारण कर शङ्करजी ने पार्वती को बहुतेरा समझाया और अपना (शङ्करजी का) दोष भी उनको बताया और यह भी कहा कि ऐसे पति की इच्छा न करो तब पार्वती जी ने कहा कि अब रहने दो वाद विवाद मत करो। मैं उनके गुण व अवगुण की परवाह नहीं करती क्योंकि इच्छा के अनुसार कार्य करने वाला व्यक्ति बदनामी की परवाह नहीं करता।

(b) ब्रह्मचारि वेषधारी शिव ने पार्वती से तपस्या करने का कारण पूछा। और अनेकों तर्कनायें करते हुए कहा कि यदि हे पार्वती तुम पति पाने की इच्छा से तपस्या कर रही हो तो व्यर्थ है क्योंकि रत्नों की खोज लोग स्वयम् करते हैं और रत्न किसी की खोज नहीं करता। अर्थात् हे पार्वती तुम तो स्त्री हो तुम्हें पाने के वास्ते तो लोग स्वयम् प्रयत्न करेंगे तुम पति खोजने के वास्ते नाहक तपस्या कर रही हो।

(c) जब पार्वती ने तपस्या करने का पूर्ण निश्चय कर लिया उस समय उनकी माता ने उनके निश्चय से उनको हटाना चाहा और उसी संबंध में समझाती हुई उन्होने कहा कि तुम्हारे कोमल शरीर तथा कठिन तपस्या में बड़ा अन्तर है। कमल का फूल भौंरे का ही बोझ संभाल सकता है पक्षियों का नहीं अर्थात् तुम तपस्या के कठिन दुःख को नहीं सहन कर सकती।

VI. (*a*) यदूढ़या—यत्+ऊढ़या=वह+क+आ (टाप्)—
उढ़ा तया ऊढ़या
निषेदुषी—नि+सद्+क्वसु+ङीप् ।

(*b*) प्रचक्रमे—यह प्र पूर्वक क्रम धातु के लिट् के अन्य पुरुष का एक वचन है। प्र+क्रम्+लिट् अन्य पुरुष एकवचन।

QUESTIONS 1939.

I. Explain the following in Sanskrit in tika form .—

(*a*) किमित्यपास्याभरणानि यौवने
धृतंत्वया वार्धकशोभिवल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते ॥

or

(*b*) अथाजिनाषाढ़धरः प्रगल्भवाग्
ज्वलन्निव ब्रह्ममयेन तेजसा
विवेश कश्चिज्जटिलस्तपोवनम्
शरीरबद्धः प्रथमाश्रमो यथा

II. Translate the following into English or Hindi

(*a*) कियच्चिरं श्राम्यसि गौरि विद्यते
ममापि पूर्वाश्रमसञ्चितं तपः

तदर्धभागेन लभस्व काङ्क्षितं
वर तमिच्छामि च साधु वेदितम्

or

(b) उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम्
अलोकसामान्यमचिन्त्यहेतुकम्
द्विषन्ति मन्दाश्चरितं महात्मनाम्

III Explain the following in Hindi or English.

(a) क्लेश फलेन हि पुनर्नवतां विधत्ते।

(b) शरीरमाद्यं खलुधर्मसाधनम्

IV (a) Explain the formation of वार्धक ।

(b) Account for the Case in यद्यरुणाय in I (a)

Ans. 1939

I (a) गुप्तवेषधारी शिवः पार्वतीं तपसः कारणं पृच्छति—हे गौरि किम् कस्माद्धेतोः यौवने युवावस्थायामेव त्वया आभरणानि अपास्य विहाय त्यक्त्वा वार्धकशोभि वृद्धस्यभावः वार्धकम् तत्रशोभत इति वार्धकशोभि वल्कलम् धृतम् प्रदोषे रजनीमुखे स्फुटाः प्रकटाश्चन्द्रतारकाश्च यस्याः सा स्फुटश्चन्द्रतारका अर्थात् चन्द्रमसा तथा तारागणैः च युक्ता विभावरी रात्रिः अरुणाय सूर्यसुताय कल्पते यदि अरुणं गन्तुं कल्पते किम् वद ब्रूहि । दीप्यमानशशाङ्कतारके प्रदोषे यद्यरुण उदेति ततो विभूषणापहारेण तव वल्कलाधारणं संघटत इतिभावः।

(b) अथ अनन्तरम् यदा पार्वत्या महत्तपः कृतं तदेत्यर्थः अजिनाषाढधरः अजिनं कृष्णमृगत्वक् आषाढः प्रयोजनमस्येत्याषाढः पालाशदण्डः तयोर्धरः कृष्णमृगत्वक्धारी तथा पालाश दण्डधारी प्रगल्भवाक् प्रगल्भावाक् यस्य सः प्रौढवचनः ब्रह्ममयेन वैदिकेन तेजसा ब्रह्मवर्चसेनेत्यर्थः ज्वलन् इव स्थितः कश्चिद् अनिर्दिष्टः दविन्त जटावान् ब्रह्मचारीविशेषः शरीरबद्धः शरीरवान् इत्यर्थ प्रथमाश्रमः यथा ब्रह्मचर्याश्रम इव पार्वत्याः तपोवनम् विवेश प्रविष्टवान् इत्यर्थः।

II. (a) O, Gauri, how long wilt thou torture your self ? I too have religious merit accumulated in my first stage of life. Do thou get thy desired husband by (the grant of) a half of it , him, however, I desire to know well (fully) "

(b) And him she thus addressed :—" Indeed, thou dost not know Shiva aright, since thou talkest thus to me The dull-witted find fault with the course of life of the magnanimous which is not in common with that of other people, and the motive of which is difficult to divine

III. (a) जब पार्वती की तपस्या से प्रसन्न होकर शिवजी ने उनको साक्षात दर्शन दिया और कहा कि हे पार्वती आज से मैं तुम्हारा दास हो गया हूँ उस समय पार्वती

बड़ी प्रसन्न हुईं और उनका सारा कष्ट दूर हो गया। क्योंकि फल मिल जाने पर (मनोरथ सफल हो जाने पर) सब कष्ट भूल जाता है। उसी बात को कवि ने यहाँ बतलाया है।

(*b*) पार्वती जी की तपस्या से प्रसन्न होकर शङ्कर जी ब्रह्मचारी का वेष धारण कर उनके पास गये थे और उनसे सत्कार पाकर पूछने लगे कि हे पार्वती सब कुशल तो है क्योंकि शरीर ही सब धर्मों का साधन है। यही बात कवि ने अर्थान्तरन्यास से कहा है। यदि शरीर कुशल रहेगा तो सभी धर्मकृत्य ठीक से हो सकेंगे।

IV (*a*) For the formation of वार्धक see note श्लोक 44.

(*b*) अरुणाय—' क्लृपिसंपद्यमाने च' से इसमें चतुर्थी हुई है। अर्थात् जहाँ पर कोई वस्तु किसी वस्तु के वास्ते पर्याप्त दिखाई जाती है वहाँ चतुर्थी होती है।

QUESTIONS 1940.

I. Explain the following in Sanskrit in tika form :—

(*a*) शुचौ चतुर्णाम् ज्वलतां हविर्भुजाम्
शुचिस्मिता मध्यगता सुमध्यमा
विजित्य नेत्रप्रतिघातिनीं प्रभा
मनन्यदृष्टि सवितारमैक्षत

(*b*) अकिञ्चनः सन्प्रभवः स सम्पदाम्
त्रिलोकनाथः पितृसद्मगोचरः
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः

II. Translate the following into English or Hindi.

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ।

III. Explain the following in Hindi or English.

(*a*) मनोरथानामगतिर्न विद्यते

(*b*) द्विषन्तिमन्दाश्चरितं महात्मनाम्

(*c*) कः करं प्रसारयेत्पन्नगरत्न सूचये ।

IV. Account for the case ending in चन्द्रमौलौ II (*a*)

Ans. 1940

I (*a*) अस्मिन् श्लोके कविः पार्वत्याः तपस्यां वर्णयति । शुचौ ग्रीष्मर्तौ शुभिस्मिता विशदमन्दहासा सुमध्यमा शोभनकटियुक्ता पार्वती ज्वलतां दीप्तिमतां चतुर्णाम् हविर्भुजाम् अग्नीनाम्मध्यगता सती नेत्रप्रतिघातिनीं नेत्रे प्रतिहन्तीति तां नेत्रप्रतिघातिनीं प्रभां सौर्यं तेज. विजित्य अनन्यदृष्टिः न विद्यते अन्यत्रदृष्टिः यस्या सा अनन्यदृष्टि सती एकाग्रदृष्टिः सवितारम् सूर्यम् ऐक्षत ददर्श ।

(*b*) ब्रह्मचारिमुखात् शिवस्यनिन्दां श्रुत्वा पार्वती कथयति हे बटु—सः हरः अकिञ्चन सन् निर्धनोऽपिसन् सम्पदां ऐश्वर्यस्य प्रभव कारणं पितृसद्मगोचरःसन् श्मशानाश्रय. सन् त्रिलोकनाथ: त्रयाणाम् लोकानां नाथः स भीमरूप: भयङ्कराकार: सन् शिवः सौम्यरूप इति उदीर्यते कथ्यते अत: पिनाकिनः हरस्य याथार्थ्य विदः यथाभूतोऽर्थो यथार्थस्तस्य भावो याथार्थ्यम् तत्वतस्य विद: न सन्ति। लोकोत्तरमहिम्ना निर्लेपस्य यथाकथञ्चिदवस्थानं न दोषायेतिभाव.।

II. "O thou of stooping limbs, hence forth I am thy Slave, bought by thy austerities"—as the Moon crested God said these words, she immediately forgot (all) her exhaustion caused by the austerities, for, fatigue gives fresh vigour again by the fruition (*i. e.* the achievement of the desired object).

III. (*a*) जब ब्रह्मचारी का रूप धारण कर शंकरजी पार्वती से उनकी तपस्या का कारण पूछने लगे तो पार्वती ने उनको उत्तर दिया कि हे ब्रह्मचारी मैं बड़े भारी पद को पाने की (अर्थात् शङ्कर को पाने की) इच्छा से यह तप कर रही हूँ। क्योंकि मनुष्य की इच्छायें कहीं नहीं जा सक्तीं अर्थात् मनुष्य हर एक वस्तु की इच्छा कर सकता है। पार्वती के कहने का भाव यही है कि चूंकि मनुष्य के इच्छाओं का अन्त नहीं है अतएव मैं भी शंकर जी को पति पाने की इच्छा से तपस्या कर रही हूँ।

(b) जब ब्रह्मचारी शङ्कर जी की निन्दा करने लगा तो उस समय पार्वती ने कहा कि तुम शङ्कर जी को ठीक से नहीं समझते हो जो ऐसा कहते हो। क्योंकि मन्द पुरुष महात्माओं के चरित्र की निंदा करते ही हैं।

(c) पार्वती से तप करने का कारण पूछते हुए ब्रह्मचारी शङ्कर जी ने कहा है पार्वती यह तो हो नहीं सकता कि किसी अपमान के कारण से तुम तपस्या कर रही हो कारण कि पिता के घर में अपमान कैसे हो सकता है। इसी बात को पुष्ट करते हुए कवि कहता है कि सर्प की मणि को कौन छू सकता है। भाव यह कि तुम्हारा अपमान करना सर्प की मणि को छूने के समान है।

IV. चन्द्रमौलौ—में ' यस्यच भावेनभावलक्षणं से सप्तमी हुई है।

QUESTIONS 1941.

I Explain the following in tika form

(a) विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा
जगच्छरण्यस्य निराशिषः सतः
किमेभिराशोपहतात्मवृत्तिभिः

(b) अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः

करेण शंभोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम्

II Translate the following into English or Hindi.

(a) मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना
तुषारवृष्टिक्षतपद्मसम्पदाम्
सरोजसंधानमिवाकरोदपाम्

(b) अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते

III. Explain in Hindi or English

(a) भवन्तिसाम्येऽपि निविष्टचेतसाम्
वपुर्विशेषेष्वतिगौरवाः क्रिया

(b) अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया

IV. (a) Expound the समास in तुषारवृष्टिक्षत पद्म संम्पदाम्

(b) Explain the formation of.
शरण्य, सुगंधि,

Ans. 1941

(a) यदा ब्रह्मचारी " शिवः अमङ्गलाभ्यासरतिः " इति पार्वतीमकथयत तदा सा तं ब्रह्मचारिणमकथयत—

विपत्प्रतीकारपरेण अनर्थपरिहारार्थिना इत्यर्थ. भूतिम्मुमुक्षुकेन वा ऐश्वर्यकामेन वा मङ्गलं निषेव्यते गन्धमाल्यादिकं निषेव्यते अर्थात् ये जनाः भूतिमिच्छन्ति ते मङ्गलवस्तूनि सेवन्ते किंतु जगच्छरण्यस्य संसारस्य यः शरणभूतोऽस्ति तस्य तथा निराशिष निरभिलाषस्य सतः शिवस्य आशोपहतात्मवृत्तिभि. आशया तृष्णया उपहता दूषितात्मवृत्तिः अन्त करणवृत्तिः येषां तैः एभिः मङ्गलैः किम् अर्थात् शिवस्तु कस्यापि वस्तुनः आशां न करोति स तु स्वयं लोकाय शरणं दातु समर्थः अतएव तस्य मङ्गलवस्तुभिः किम् ।

(*b*) पार्वतीप्रतिशिवस्य एतद्वच —

अवस्तुनिर्बंधपरे अवस्तुनि तुच्छवस्तुनि निर्बंधोऽभिनिवेशः पर प्रधानं यस्या. तस्याः संबुद्धि तुच्छवस्तुनि अभिलाषवति आमुक्ताविवाहकौतुकः आमुक्तम् आसञ्जितम् विवाहे यत्कौतुकं हस्तसूत्रं तद्यस्य सः ते अयं करः वलयीकृताहिना भूषणीकृतसर्पेण शंभोः महादेवस्य करेण करणभूतेन तत्प्रथमावलम्बनं तदेव प्रथमं तत्प्रथमम् अपरिचितत्वादति भयंकरमिति भावः तदवलम्बन ग्रहणं चेति कथं नु सहिष्यते । कथमपिनेत्यर्थः ।

II. (*a*) By her face, which was as fragrant as the lotus (itself) and which shone, with the quivering leaf of the nether lip, she at night restored the (beauty of) lotuses to the waters (of the stream) the wealth of which was destroyed by the showers of snow.

(*b*) "O thou of stooping limbs, henceforth I am thy slave, bought by the austerities"—as the Moon-crested God said these words, she immediately forgot (all) her exhaustion caused by the austerities : for, fatigue gives fresh vigour again by the fruition (*i e.* the achievement of the desired object)

III. (*a*) जब शंकर जी ब्रह्मचारी का रूपधारण कर पार्वती के पास आये तब पार्वती ने उठकर उनका खूब सत्कार किया इसी विषय पर कवि कहता है कि विशेष व्यक्तियो में लोगो का कृत्य भी आदर पूर्ण होता है अर्थात् यद्यपि कोई बराबर वाला भी हो तो भी स्थिर चित्त लोग विशेष व्यक्तियो मे विशेष प्रकार का व्यवहार करते हैं।

(*b*) शङ्कर को अपना पति न बनाने के लिये मना करते हुये ब्रह्मचारी ने पार्वती से कहा तुम शिव के योग्य नहीं हो। उसी बात को कवि समझाता है कि यज्ञस्तम्भ के लिये जो वेद की क्रिया प्रयुक्त की जाती है वह क्रिया श्मशान के खम्भे के लिये नहीं की जा सकती। अथात् पार्वती के योग्य शिव नहीं हैं।

IV. तुषारवृष्टिक्षतपद्मसम्पदाम्—तुषार वृष्ट्या क्षता पद्मसंपदो यासां तासां तुषारवृष्टिक्षतपद्मसम्पदाम्

(*b*) शरण्य—शरणेसाधुः शरण+यत् सुगंधि—सुगंधोऽस्यास्तीति—सुगंध+इतच्।
